त्रिपुरार्णवतन्त्रम्

कुलपतिश्रीविद्यानिवासमिश्रप्ररोचनया

श्रीसीतारामशास्त्रिकविराज-श्रीरुद्रदेवत्रिपाठिभ्यां
प्रणीतया भूमिकया च समलङ्कृतम्

सम्पादक :
डॉ० शीतलाप्रसाद-उपाध्यायः

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी

श्रीसीतारामशास्त्रिकौशल-श्रीविद्येशीपीठेभ्यो
नमामः सूक्तिभिः स एवमुच्यते

त्रिपुरार्णवतन्त्रम्

कुल्लीतिश्रीदिव्यानिवासमिश्रप्रणीतया

सम्पादकः
डॉ॰ श्रीसीताप्रसाद-उपाध्यायः



सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी

YOGATANTRA-GRANTHAMĀLĀ
[Vol. 12]

TRIPURĀRṆAVATANTRA

Foreword By
DR. VIDYANIWAS MISRA
Vice-Chancellor

Introduction by
ŚRĪ SĪTĀRĀMA ŚĀSTRĪ KAVIRĀJA
&
ŚRĪ RUDRADEVA TRIPĀṬHĪ

Edited By
DR. ŚĪTALĀ PRASĀDA UPĀDHYĀYA
Lecturer in Yogatantra Department,
Sampurnanand Sanskrit University
Varanasi

VARANASI
1992

Research Publication Supervisor—
Director, Research Institute,
Sampurnanand Sanskrit University
Varanasi.

❑

Published by—
Dr. Harish Chandra Mani Tripathi
Publication Officer,
Sampurnanand Sanskrit University
Varanasi - 221 002.

❑

Available at—
Sales Department,
Sampurnanand Sanskrit University
Varanasi - 221 002.

❑

First Edition, 1000 Copies
Price Rs. 96.00

❑

Printed by—
Ratna Printing Works
B 21/42A, Kamaccha,
Varanasi - 221 010.

योगतन्त्र-ग्रन्थमाला
[१२]

त्रिपुरार्णवतन्त्रम्

कुलपतिश्रीविद्यानिवासमिश्रप्ररोचनया
विभूषितम्

श्रीसीतारामशास्त्रिकविराज-श्रीरुद्रदेवत्रिपाठिभ्यां
प्रणीतया भूमिकया च समलङ्कृतम्

सम्पादकः
डॉ. शीतलाप्रसाद-उपाध्यायः
प्राध्यापकः,
योगतन्त्रविभागस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये
वाराणसी



वाराणस्याम्

२०४८ तमे वैक्रमाब्दे १९१३ तमे शकाब्दे १९९२ तमे खैस्ताब्दे

अनुसन्धान-प्रकाशन-पर्यवेक्षकः–
निदेशकः, अनुसन्धानसंस्थानस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये
वाराणसी ।

❑

प्रकाशकः–
डॉ. हरिश्चन्द्रमणित्रिपाठी
प्रकाशनाधिकारी,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणसी - २२१ ००२.

❑

प्राप्तिस्थानम्–
विक्रय-विभागः,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणसी - २२१ ००२.

❑

प्रथमं संस्करणम्, १००० प्रतिरूपाणि
मूल्यम्–९६=०० रूप्यकाणि

❑

मुद्रकः–
रत्ना प्रिंटिंग वर्क्स
बी. २१/४२ ए, कमच्छा,
वाराणसी- २२१ ०१०

प्ररोचना

'त्रिपुरार्णव' तन्त्र त्रैपुर-सिद्धान्त का अत्यन्त अपूर्व ग्रन्थ है, जिसके प्रारम्भ में यह लिखा है कि यह एक बड़े ग्रन्थ का संक्षेप है। इसका पाठालोचनपूर्वक सम्पादन इस विश्वविद्यालय के सरस्वतीभवन पुस्तकालय की हस्तलिखित पाण्डुलिपियों के आधार पर हुआ है। मुख्यरूप से सरस्वतीभवन पुस्तकालय की पाण्डुलिपिसंख्या-९०६३७ को इसका आधार बनाया गया; क्योंकि यह मातृका अखण्डरूप से प्राप्त हुई। श्रीविद्या-क्रम के परिनिष्ठित विद्वान् तथा साधक **श्रीसीताराम शास्त्री कविराज** एवं **डॉ० रुद्रदेव त्रिपाठी** ने इसकी भूमिका लिखी है, जिसमें ग्रन्थवैशिष्ट्य और ग्रन्थ-विषयवस्तु का समुचित प्रतिपादन किया गया है। इस भूमिका से इस ग्रन्थ का गौरव बढ़ गया है। इस ग्रन्थ के उद्धरण, जैसा कि भूमिका में लिखा गया है, अनेक सुविख्यात तन्त्र-ग्रन्थों में उपलब्ध हैं। **श्रीविद्यार्णव में विशेषरूप** से त्रिपुरार्णव का उल्लेख है। चूंकि यह विस्तृततर ग्रन्थ का संक्षिप्त रूप है, अतः यह स्वाभाविक है कि त्रिपुरार्णव के नाम से विख्यात अनेक उद्धरण इसमें न मिलते हों; किन्तु जिस प्रकार उपलब्ध **'स्वच्छन्दतन्त्र'** विस्तृततर 'स्वच्छन्द-तन्त्र' का संक्षिप्तरूप है. उसी प्रकार **'त्रिपुरार्णवतन्त्र'** भी, यह तन्त्रों के संकलन की परिपाटी है।

श्रीविद्यार्णव में मातृकार्णव, त्रिपुरार्णव, योगिनीहृदय-प्रभृति का विशेष उल्लेख है। मातृकार्णव की मातृका का नाम अभी तक जानकारी में नहीं है; किन्तु त्रिपुरार्णव में जो विषय है, उसके बारे में यही कहना पर्याप्त है कि उसकी उपासना **परशुरामकल्पसूत्र** के प्रतिपादन से कुछ अधिक विशद है। दीक्षाविधि का, नित्यसपर्याविधि का तथा पूर्णोपचार-पूजा-विधि का वर्णन एवं मुद्राओं के लक्षण बहुत सटीक दिये गये हैं।

इस संस्करण में आथर्वण-मन्त्रों का ऐसा सङ्कलन है, जो रहोयाग के प्रसङ्ग में अन्यत्र नहीं प्राप्त होता। परिशिष्ट में त्रिपुरार्णव के नाम से सङ्गृहीत मन्त्रों को ग्रन्थोल्लेखपूर्वक दिया गया है, जिससे त्रिपुरार्णव की साधना-पद्धति के विस्तार का परिचय मिलता है।

श्रीशीतलाप्रसाद उपाध्याय ने मातृका के सम्पादन में श्रद्धापूर्वक परिश्रम किया है, तदर्थ उन्हें धन्यवाद देता हूँ तथा उपरिलिखित पण्डितद्वय ने अपनी भूमिका एवं विषय-संक्षेप देकर इस ग्रन्थ का गौरव बढ़ाया है, उसके लिए मैं हृदय से उनका आभार मानता हूँ।

मुझे पूर्ण विश्वास है कि **श्रीविद्या** के सिद्धान्त और आचार दोनों पक्षों को स्पष्ट करने में इस ग्रन्थ का विशेष महत्त्व होगा और साधकों द्वारा विशेषरूप से समादृत होगा।

वाराणसी
महाशिवरात्रि,
२०४८ वैक्रमाब्द
(२/३/१९९२ खैस्ताब्द)

विद्यानिवास मिश्र
कुलपति
सम्पूर्णानन्द संस्कृत विश्वविद्यालय
वाराणसी

विषयानुक्रमणिका

विषयाः	पृष्ठाङ्काः
प्ररोचना	अ-आ
त्रिपुरार्णवावतारिका	१-१२
त्रिपुरार्णव का प्रतिपाद्य विषय-संक्षेप	१-१४
देव्या ईश्वरं प्रति त्रिपुरार्णवविषयकप्रश्नः	१
ईश्वरस्योत्तरम्	१
देव्यास्त्रिपुराया दीक्षाविधिदानायेश्वरं प्रति प्रश्नः	२
ईश्वरेण दीक्षाविधिनिरूपणम्	३
दीक्षाविधौ सविस्तरमङ्गविद्याश्रीचक्रराजादिपूजनक्रमनिर्देशः	४
आज्यपात्रप्रणीताप्रोक्षणीचर्वादिहोमद्रव्याणां न्यसनविधिः	६
मूलदेव्या हवनप्रकारोपदेशः	८
देव्याः स्वहृदये ध्यानम्	१०
पञ्चदंश्याः षोडश्या दीक्षासम्प्राप्तिः	११
षडध्वविन्यसनपूर्वकं मन्त्रविन्यासः	१२
पूर्णाभिषेककथनप्रकारोपसंहारः	१४
देव्या ईश्वरं प्रति नित्यरोगिणां विषयकातिगहनदीक्षायाः पृच्छा	१५
ईश्वरस्य प्रश्नरत्नत्वश्लाघयोत्तरणम्	१५
दीक्षाक्रमं विना पापभाक्त्वोक्तिः	१६
श्रीमहाषोडशाक्षर्याः स्वल्पपुण्यैरलभ्यत्वमुपसंहारश्च	१६
देव्या दीक्षाप्राप्त्यनन्तरकर्त्तव्यविषयकप्रश्नः	१७
ईश्वरेण सुविधेरुत्तरमुखेन निरूपणम्	१७
षट्चक्रभेदनपुरःसरं पराशक्तेस्त्रिपुरायाः संस्मृतिः	१७
सर्वोत्तमश्रीनाथस्तोत्रप्रवचनम्	१८
चतुर्धा प्राणायामविधिक्रमः	१९
पराशक्तेर्नानारूपपरिचर्याविधिः	२१
षट्सहस्रसंख्याकजपार्पणविधिः	२२
सन्ध्यादिकप्रातःकृत्योक्त्योपसंहारः	२४
गौर्याः सन्ध्योपास्तेरनन्तरकर्तव्यविषयकप्रश्नः	२५
महेश्वरेण पश्चात्कर्त्तव्योपदेशः	२५
श्रीमातृकादेव्या यन्त्रध्यानविधिक्रमः	२८
कचटतादिस्वराणां विन्यसनक्रमनिर्देशः	३०

गृहादीनां नानादेवतानां ध्यानन्यासादिक्रमः ३२
भूशुद्ध्यादिविध्युपसंहारः ३५
न्यासानन्तरक्रियाविषयको देव्याः प्रश्नः ३६
महेश्वरेण तद्वर्णनम् ३६
चक्रराजस्थापनेन मण्डलेशत्वप्राप्तिफलनिर्देशः ३९
अङ्गदेवतानां पूजनविधि. ४0
एतदनुष्ठानेन वाजपेयफलसम्भूतेर्निर्देशः ४२
त्रिपुरार्णवगोचरपूजाविधिविषयको देव्याः प्रश्नः ४३
महेश्वरेण तद्विधेर्निरूपणम् ४३
पीठशक्त्याद्यर्चनेनोपसंहारः ४५
त्रिपुरायाः त्रिविधपूजाविधिविषयको देव्याः प्रश्नः ४६
शिवेन तद्विधिनिर्वचनम् ४६
सोपचारकत्रिपुरादेव्याः पूजोपसंहारः ५0
अनन्तरकर्मविषयको गौर्याः प्रश्नः ५१
शङ्करेण तद्विधेरुपाख्यानम् ५१
शतधा मूलदेव्या यजनानिर्देशात् सफलोपसंहारः ५३
देव्यास्तदनन्तरीयप्रश्नः ५४
महादेवेन तदनन्तरकृत्याख्यानम् ५४
यथावत्पूजनादिकथनेनोपसंहारः ५६
त्रिपुरार्णवसम्प्रोक्तार्घ्यविधिविषयको देव्याः प्रश्नः ५७
श्रीशिवेन पात्राणामुत्तमविधिश्रावणम् ५७
मध्यस्थापनकादिप्रोक्त्योपसंहारः ६0
देव्याः पार्वत्याः कुलद्रव्यविषयकप्रश्नः ६१
शशिशेखरेण तन्निर्वचनम् ६१
आचार्येण त्रिपुरायै द्रव्यादिनिवेदनेनोपसंहारः ६५
महेशार्घ्यविधिप्रोक्तमन्त्रतत्क्रियाविषयको देव्याः प्रश्नः ६६
वृषभध्वजेन तद्विधिप्रतिपादनम् ६६
हेतुसंस्तुतिपूर्वकोपसंहारः ७0
साङ्गोपाङ्गसोपचारायाः पूजाया अनन्तरक्रियाविषयको
देव्याः प्रश्नः ७१
महादेवेनोत्तरसंज्ञकपूजाविधिप्रवचनम् ७१
शान्तिस्तवपाठेनोपसंहारः ७३
अगजाया बलिमन्त्रविषयकप्रश्नः ७४
त्रिनेत्रेण बलिमन्त्रादिक्रमनिर्देशः ७४

कामबीजविन्यासेनोपसंहारः ७९
गौर्याः स्वात्मीकारविधिविषयकप्रश्नः ८०
महादेवेन तत्क्रमनिरूपणम् ८०
कौलमार्गोपासीनस्य शुभगतिप्राप्त्योपसंहारः ८८
गिरिजाया मुद्राणां लक्षणविषयकः प्रश्नः ८९
शिवेन मुद्रालक्षणख्यापनम् ८९
मुद्राविवरणोक्त्योपसंहारः ९२
पार्वत्या अशक्तविषयायाः पूजायाः सन्दर्भे प्रश्नः ९३
महादेवेन तत्प्रवचनम् ९३
उपासकवैशिष्ट्येनोपसंहारः ९४
देव्या नैमित्तिकपूजाविषयकप्रश्नः ९५
वृषध्वजेन तत्पूजाख्यानम् ९५
सर्वपूजाफलोदयनवरात्रपूजयोपसंहारः ९९
देव्या मालामन्त्रविषयकप्रश्नः १००
ईश्वरेण तत्प्रवचनम् १००
होमद्रव्याहुतिजपान्तेनोपसंहारः १०६
देव्या रहस्यार्चनविषयकप्रश्नः १०७
ईश्वरेण रहोयागप्रवचनम् १०७
मण्डलार्चासु कर्त्तव्यतया पापविशुद्ध्या चोपसंहार १२४
त्रिपुरार्णवोक्तोपयुक्तमन्त्रविषयको देव्याः प्रश्नः १२५
श्रीवृषध्वजेनाथर्वणमन्त्रपाठविधिनिरूपणम् १२५
पूर्णाहुतित्रयाख्यानेन तत्फलनिर्देशेन चोपसंहारः १३६
शैलजया श्रीसूक्तविधिविषयकप्रश्नः १३८
भैरवेण श्रीसूक्तविध्युत्तरदानम् १३८
सविस्तरविधानोक्त्योपसंहारः १३९

श्रीविद्यार्णवे

द्वितीयश्वासे दग्धमन्त्रप्रसङ्गः १४०
मन्त्रप्रसङ्गः १४०
ऋतमन्त्रप्रसङ्गः १४०
गर्जितमन्त्रप्रसङ्गः १४०
मन्त्रप्रसङ्गः १४०
असहमन्त्रप्रसङ्गः १४०
मन्त्रपुरश्चरणप्रसङ्गः १४०
छिन्नमन्त्रप्रसङ्गः १४१

मन्त्रप्रसङ्गः १४१
कुण्ठितमन्त्रप्रसङ्गः १४१
रुष्टमन्त्रप्रसङ्गः १४१
अवमानितमन्त्रप्रसङ्गः १४१
मन्त्रप्रसङ्गः १४२
द्वादशश्वासे द्वारपूजाप्रसङ्गः १४२
चतुर्दशश्वासे कामेश्वरीनित्यायजनप्रसङ्गः १४२
भगमालिनी नित्यायजनप्रसङ्गः १४२
नित्यक्लिन्ननित्यापूजाप्रसङ्गः १४२
भेरुण्डानित्यामन्त्रोद्धारप्रसङ्गः १४२
वह्निवासिनीनित्यापूजाप्रसङ्गः १४३
वज्रेश्वरीनित्यायजनप्रसङ्गः १४३
शिवादूतीनित्यायजनप्रसङ्गः १४३
त्वरितानित्यायजनप्रसङ्गः १४३
कुलसुन्दरीपूजाप्रसङ्गः १४३
बालानित्यानित्ययोरभेदप्रसङ्गः १४३
नीलपताकार्चाप्रसङ्गः १४३
विजयानित्यार्चाप्रसङ्गः १४३
सर्वमङ्गलासपर्याप्रसङ्गः १४४
ज्वालामालिनी नित्यापूजाप्रसङ्गः १४४
चित्रानित्यायजनप्रसङ्गः १४४
कुरुकुल्लासपर्याप्रसङ्गः १४४
वाराहीसपर्याप्रसङ्गः १४४
पञ्चदशश्वासे त्रिपुरसुन्दरीस्तोत्रम् १४४
सन्ध्यावन्दनप्रसङ्गः १४५
अष्टादशश्वासे स्नानविशेषप्रसङ्गः १४६
पञ्चविंशश्वासे भुवनेश्वरीभैरवीप्रकरणम् १४८
पञ्चत्रिंशश्वासे श्रीचक्रक्रमाभ्यर्चनप्रसङ्गः १४८
सौभाग्यभास्करे त्रिपुरास्वरूपम् १४८
पुरश्चर्यार्णवे द्वितीयतरङ्गे दीक्षाफलनिर्णये नक्षत्रफलप्रसङ्गः १४८
टीकाकाराणां विविधप्रसङ्गाः १४९
सर्वसाधारणक्रमे आदिमगतिनिधिप्रसङ्गेन
ग्रन्थस्य परिसमाप्तिः १५३

त्रिपुरार्णवावतारिका

त्रिपुरार्णवः किल तन्त्रशास्त्राचार्याणां टीकाकाराणाञ्चातीव सम्मान्यः श्रद्धेयो मार्गनिर्देशकश्चावर्तत । अत एव बहुषु ग्रन्थेषु टीकासु च प्रमाणत्वेनास्योपन्यासः पदे पदे विहितः । यथा—**ताराभक्तिसुधार्णवे, पुरश्चर्यार्णवे, अर्थरत्नावल्याम्, तन्त्रसारे, परमानन्दतन्त्रस्य** टीकायां सौभाग्यानन्दसन्दोहे **नित्याषोडशिकार्णवटीकायाम्, ललितासहस्रनाम्नो** भाष्ये **सौभाग्यभास्करे, सौन्दर्यलहर्याष्टीकायां सौभाग्यवर्धिन्याम्,** भास्कररायस्य **सेतुबन्धे, ललितार्चनचन्द्रिकायां** चैतन्यगिरेर्**विष्णुपूजापद्धतौ** तथाऽन्येषु सङ्ग्रह-ग्रन्थेषु ।

'श्रीविद्यार्णवे' कादिमतस्य येषां चतुर्णां ग्रन्थानां सूचनं विद्यते, तेषु 'त्रिपुरार्णव'स्य नामापि वर्तत एव । अतो ग्रन्थस्यास्य विशिष्टता स्वतः सिद्धा भवति । अयं ग्रन्थोऽद्यावधि कुतोऽपि प्रकाशनं न प्रापत् । अस्य कापि स्वतन्त्रा सम्पूर्णा च मातृकाऽपि संस्कृत-हस्तलिखित-ग्रन्थ-भाण्डागारेषु न लभ्यते ।

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य 'सरस्वती-भवनस्य, सङ्ग्रहे सौभाग्योदयस्यैका मातृका सुरक्षिताऽवर्तत । सम्प्रति ग्रन्थरत्नस्यास्य वैशिष्ट्यं विभाव्य कुलपतिमहोदयैः **डॉ. विद्यानिवासमिश्रमहाभागै**रस्य सम्पादन-पूर्वकं प्रकाश्यतां नीतमिति महतः प्रमोदस्य विषयः ।

अस्य 'त्रिपुरार्णव'स्य समवलोकनेन ज्ञायते यदयं लक्षसङ्ख्यकैर्ग्रन्थैर्मण्डित आसीत् । श्रीविद्यार्णवकारैस्त्रिपुरार्णवस्य नाम्ना येषां मन्त्रादीनामुद्धरणानि दत्तानि सन्ति, तान्यत्र प्रस्तुतग्रन्थे नोपलभ्यन्ते । एवमेवान्येषु ग्रन्थादिष्वपि यानि पद्यान्युद्धृतानि लभ्यन्ते, तेष्वपि भूयांसोंऽशा अत्र न विद्यन्त इति कृत्वैवमनुमातुं शक्यते यदयं ग्रन्थः पुरातनात् कालात् सुप्रसिद्धस्त्रैपुरसिद्धान्तस्य प्रतिपादकस्तथा सम्मान्य आसीत् ।

श्रीविद्यासम्प्रदयास्यार्चाविधाने **श्रीचक्रं** सर्वस्वभूतं विद्यते, तदाधारेणैव सर्वा बाह्या आन्तरिक्यश्चोपासनाः क्रियन्ते । श्रीचक्रस्याधिष्ठात्री भगवती श्रीललिता-महात्रिपुरसुन्दरी विद्यते । तस्या उपासनाया विषयाणां विस्तृतं विवेचनं 'त्रिपुरार्णवे' वर्णितमस्ति । किञ्च, तन्त्रराज-योगिनीहृदय-परशुरामकल्पसूत्रादित्रैपुरसिद्धान्तस्य ग्रन्थाननुसरन्नयं तत्तद्विषयाणां स्फुटं व्याख्यानमपि सङ्गृह्णाति । नैतावदेव, एतेषु ग्रन्थेषु ये विषयाः सूत्ररूपेण वर्णिताः सन्ति, तेषां विशदरूपेण प्रख्यापनमप्यत्र दृश्यते।

तन्त्रग्रन्थानामियं परिपाटी वर्तते यत् ते कमप्येकं विषयं तथा सूचयन्ति यस्य पूर्णताया ज्ञानं केषाञ्चिदन्येषां तन्त्रमन्त्रग्रन्थानां साहाय्यं विना न सम्भवति । एतदर्थमेव कादिमतस्य विषयं स्पष्टयद्भिः 'श्रीविद्यार्णव'ग्रन्थकारैरुक्तं यत्—

कादिशक्तिमते तन्त्रं तन्त्रराजं सुदुर्लभम् ।
मातृकार्णवसंज्ञं तु त्रिपुरार्णवसंज्ञकम् ॥
योगिनीहृदयं चैव ख्यातं ग्रन्थचतुष्टयम् ॥ इति । (९८-९९)

एतेषु तन्त्रराज-योगिनीहृदययोस्तु टीकयोः सहमुद्रणं सम्पन्नं विद्यते । मातृकार्णवस्य च मातृका नास्ति सुलभा । त्रिपुरार्णवोऽयं साम्प्रतं यावत् कुतोऽपि प्रकाशनं नालभतेति विद्वांसश्चिन्तातान्ता इवावर्तन्त । अस्योद्धरणानि दर्शं दर्शं तेषां पूर्णग्रन्थदिदृक्षा दवीयसी प्रावर्तत । जगदम्बाया अनुकम्पया सोऽयं त्रिपुरार्णवोऽद्य यथोपलब्धः प्रकाशित इति कस्य वा सचेसो न तोषाय ?

तन्त्रराजे योगिनीहृदये च प्रतिपादितस्त्रैपुरसिद्धान्तानुरूप एव त्रिपुरार्णवस्य प्रतिपाद्यो विषयः । ततोऽपि वैशिष्ट्यमिदमत्र दृग्गोचरीभवति यदुपर्युक्तयोर्ग्रन्थयोर्ये विषयाः संक्षिप्य सूचितास्तेऽत्र विशिष्टेन विस्तारेण विवृताः । सहैव साधनायामनुष्ठीयमानानां मुख्यविषयाणां सुगमेन सरलेन च रूपेण न केवलमत्र निर्देशनमेव विहितम्; अपि तु यत्र तत्र तेषां भेद-प्रभेदाः, प्रकार-विशेषा अपि प्रदर्शिताः । अतो ग्रन्थस्यास्य विशेषत उपयोगिता सिद्ध्यति । ग्रन्थस्य प्रारम्भिक्यामवतरणिकायामुक्तमस्ति यत्–

तत्र प्रोक्तं त्वया नाथ तन्त्रं तु त्रिपुरार्णवम् ।
पुरा सदाशिव-प्रोक्तं भैरवाय महात्मने ॥
कालपर्यायतो देवि तन्त्राणि त्रैपुराणि तु ।
यदोच्छिन्नानि देवेशि तदा श्रीभैरवेण तु ॥
पृष्टः सदाशिवः प्राह त्रिपुरार्णव-संज्ञितम् ।
त्रिपुराविधिरत्नानामर्णवोऽयं महेश्वरि ॥
ग्रन्थतो लक्षगुणितं नानाविधि-समन्वितम् ।
नित्यं नैमित्तिकं काम्यं बहुधा यत्र संस्थितम् ॥
विस्तारेणापि संक्षेपाद् यत्र सर्वं स्फुटं स्थितम् ।
उपासनानि कर्माणि यत्र नानाविधानि वै ॥
विज्ञानं च महाश्रेष्ठं शाक्तं नानोपपत्तिकम् ।
तस्यातिविस्तृतत्वात् तु नेदानीं प्रब्रवीमि ते ॥
त्रैपुरेषु विधानेषु यद् यत्त्वं श्रोतुमिच्छसि ।
क्रमेण पृष्टस्तत्सर्वं संक्षेपात् कथयामि ते ॥ इत्यादि (१/४-१०)

एतेषां वचनानामनुसारं त्रिपुरार्णवस्य प्रवक्त्रा सदाशिवेन महात्मने भैरवायैष श्रावित आसीत् । काल-पर्यायतस्तस्य व्युच्छित्त्या पुनराख्यानमस्याक्रियत । ग्रन्थोऽयं त्रिपुरोपासनाया विधिरूपरत्नानामर्णवः । अत एवात्र नित्य-नैमित्तिक-काम्यानामर्चाविधीनां समावेशोऽपि विद्यते । प्रत्येकंविधैर्वैज्ञानिकेन वैशिष्ट्येन सह नानाविधानामुपपत्तीनामपि कथनेन गौरवमस्य शिखरायते ।

भगवता शिवेन पूर्ववर्तिनस्त्रिपुरार्णवस्य पुनराख्यानं प्राप्तवतोऽस्य साम्प्रतिकीषु बह्वीषु पद्धतिषु प्राचुर्येणोदाहृत्योद्धरणप्रस्तुत्या च रत्नाकरता सत्यां कोटिं श्रयति । अन्यत्रोद्धरणेषु मन्त्र-मन्त्रगतरहस्य-मन्त्रप्रयोगविधान-मालामन्त्र-निरूपणानि प्राप्य परं तेषु बहूनामत्र प्रकृतग्रन्थे समावेशाभावादनुमीयते यदयं महतस्त्रिपुरार्णव-ग्रन्थस्य कश्चनोपयोग्यंश एवास्तीति । एवंविधा स्थितिस्तान्त्रिकेषु ग्रन्थेषु प्रायो दरीदृश्यत एव । यथा 'मालिनीविजयतन्त्रे' स्पष्टमुद्घोषितं भगवत्या–

स्वस्थानस्थमुमा देवी प्रणिपत्येदमब्रवीत् ।
सिद्धयोगीश्वरीतन्त्रं नवकोटिप्रविस्तरम् ॥
यत्त्वया कथितं पूर्वं भेदत्रयविसर्पितम् ।
मालिनीविजये तन्त्रे कोटित्रितयलक्षिते ॥
योगमार्गस्त्वया प्रोक्तः सुविस्तीर्णो महेश्वर ।
भूयस्तस्योपसंहारः प्रोक्तो द्वादशभिस्तथा ॥
सहस्रैः सोऽपि विस्तीर्णो गृह्यते नान्यबुद्धिभिः ।
अतस्तमुपसंहृत्य समासादल्पधीहितम् ॥
सर्वसिद्धिकरं ब्रूहि प्रसादात् परमेश्वर ।
एवमुक्तस्तदा देव्या प्रहस्योवाच विश्वराट् ॥
शृणु देवि प्रवक्ष्यामि सिद्धयोगीश्वरीमतम् ।
यन्न कस्यचिदाख्यातं मालिनीविजयोत्तरम् ॥
मया त्वेतत् पुरा प्राप्तमघोरात् परमात्मनः ।
उपादेयं च हेयं च विज्ञेयं परमार्थतः ॥ (मा. वि. तन्त्रे-८-१४)

एतदनुसारं महीयसो ग्रन्थस्य भूयोभूयः कथनेन मालिनीविजयोत्तरतन्त्रं संक्षिप्तं सदपि तत् साम्प्रदायिकैः सम्पूर्णमूरीक्रियते तथैवायमपीत्यत्र नास्ति विप्रतिपत्तिः । अथ च स्वच्छन्दतन्त्रस्याप्येषैव स्थितिः । यथा–

कैलासशिखरासीनं भैरवं विगतामयम् ।
चण्ड-नन्दि-महाकाल-गणेश-वृष-भृङ्गिभिः ॥
कुमारेन्दु-यमादित्य-ब्रह्म-विष्णु-पुरःसरैः ।
स्तूयमानं महेशानं गणमातृ-निषेवितम् ॥
सृष्टि-संहारकर्त्तारं विलय-स्थिति-कारकम् ।
अनुग्रहकरं देवं प्रणतार्त्तिविनाशनम् ॥
मुदितं भैरवं दृष्ट्वा देवी वचनमब्रवीत् ।

श्रीदेव्युवाच–

यत् त्वया कथितं मह्यं स्वच्छन्दं परमेश्वर ॥
शतकोटि-प्रविस्तीर्णं भेदानन्त्य-विसर्पितम् ।
चतुष्पीठं महातन्त्रं चतुष्टय-फलोदयम् ॥

न शक्नुवन्ति मानुजा अल्पवीर्य-पराक्रमाः ।
अल्पायुषोऽल्पवित्ताश्च अल्पसत्त्वाश्च शङ्कर ॥
तदर्थं सङ्ग्रहं तस्य स्वल्पशास्त्रार्थ-विस्तरम् ।
भुक्ति-मुक्ति-प्रदातारं कथयस्व प्रसादतः ॥ (१-७)

इत्थं शतकोटि-प्रविस्तीर्णस्य चतुष्पीठसंहिता–महातन्त्रस्य स्वच्छन्दतन्त्रमिदं सारभूतं सदपि महातन्त्रत्वेन स्वीकृतं विद्यते, भृशं प्रमाणकोटिं चावहति । तद्वदेव कस्यचित् त्रिपुरार्णवाख्यस्य सुविस्तृतस्य ग्रन्थरत्नस्य सारभूतोऽयं सिद्ध्यति । पुनर्देव्या पृष्टः कालानुसारं श्रीविद्यायास्त्रिपुरोपास्तेरादीक्षाविधानं आ च पूर्णाभिषेकं श्रीचक्रवरिवस्याया आप्रातःस्मरण-नित्य-नैमित्तिक-कर्म्माणि सुविस्तृतं वर्णितानि सन्ति । अतः कादिमतप्रतिपादक-योगिनीहृदय-तन्त्रराज-प्रभृतिग्रन्थविषयान् विशदयन् परमप्रमाणपदवीमध्यारोहतीति नास्ति विचिकित्साऽवसरस्तनीयानपि ।

'त्रिपुरार्णव'ग्रन्थोऽयमागमेषु सुप्रथित इति नाविदितं श्रीसुन्दरीसेवनतत्पराणां साधकवराणाम् । अत आगम-स्वरूप-निरूपणमपि प्रसङ्गोपात्तमिति मनाक् तत् प्रस्तूयते ।

आगम-स्वरूपम्

"आ समन्ताद् गमयति अभेदेन विमृशति पारमेशं स्वरूपमिति **आगमः**" । स्व-स्वरूपज्ञानं येन भवति तज्ज्ञानमेव आगमशब्देन प्रतिपाद्यते । किं नाम तत्स्वरूपमिति ? अभेदेन पारमेश-स्वरूप-विमर्शनमेव । स्वरूपं ज्ञानम्, यद्वा, पूर्णाहन्ता-स्वस्वरूपं शिवोऽहमिति भावनम् । तच्च कथं लभ्यते ? तदुक्तं 'श्रीस्वच्छन्दे'–

गृह्यते ह्यनुमानेन प्रत्यक्षानुभवेन च ।
अर्थि-प्रत्यर्थिभावेन आगमेन तु लभ्यते ॥
आगमो ज्ञानमित्युक्तमनन्ताः शास्त्रकोटयः ॥

अर्थि-प्रत्यर्थिभावेन–अर्थी=प्रष्टा, संशय-घटको=वक्ता तयोर्भावोऽनुग्राह्यानुग्राहकत्वभावेन यः प्रवृत्त आगमस्तेन लभ्यते स्वरूप-ज्ञानम् । अथ च–

आगतं शिव-वक्त्राद् वै गतञ्च गिरिजामुखे ।
गुरु-शिष्यपदे स्थित्वा स्वयमेव सदाशिवः ॥
प्रश्नोत्तर-परैर्वाक्यैस्तन्त्रं समवतारयत् ॥

तदेवागमरहस्यं विवृणोति–

'आगमो ज्ञानमित्युक्त'मिति। परशक्ति-स्फाररूपमिति कृत्वा परशक्तिरेवागमः । परशक्ति-स्फारं पञ्चाशन्मातृकारूपं प्राक् सिसृक्षोः शिवस्य स्वात्माभिन्ना विश्वघटना-पटीयसी सृष्टि-स्थिति-संहृति-तिरोधानानुग्रह-पञ्चकृत्य-कला-कलाप-केलि-लोला सकल-ज्ञान-विज्ञान-कल्पित-कलेवरा अग-जगदोकसां देश-कालकलना वैचित्र्य-चित्र-चमत्कारिणी-विश्वविजृम्भणशीला भाव्यद्विश्व-विधान-रचना-चातुर्य-परिपूर्णा पराशक्तेरेव स्फारं शब्दराशिभूतं ज्ञानम् 'आगम' इत्युच्यते । तेन अनन्ताः

शास्त्रकोटयः समस्त-वाङ्मयाधिष्ठात्री शास्त्रस्वरूपिणी शब्द-ब्रह्मेति गीयते । अत एवोक्तं श्रीस्वच्छन्दे–

शास्त्रं शब्दात्मकं सर्वं शब्दो हंसः प्रकीर्तितः ।

'यत् किञ्चित् क्वचिच्छासनाच्छास्त्रम्' । अत एवोक्तं 'वाक्यपदीये'–

'न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते' । इति ।

शास्त्रमन्तरेण च हेयोपादेय-विचारमात्रमपि न भवेत् । सर्वं त्रिभुवनमन्ध-मूकवद् भवेत् । तथा चोक्तमागम-रहस्य-स्तोत्रे–

साक्षाद् भवान् यदि विधाय न मूर्तिमाद्यां
तत्त्वं निजं तदवदिष्यदतोऽतिगुह्यम् ।
नाज्ञास्यत त्रिभुवनं ध्रुवमन्धमूक-
कल्पं समस्तमसमञ्जसतामयास्यत् ॥

'षाड्गुण्यविवेके'ऽपि–

साक्षात् त्वमेव वा शास्त्रं त्वदीयैव हि सा मतिः ।
शब्दद्वारेण सङ्क्रम्य संस्करोत्यधिकारिणः ॥

अतः सर्वव्यवहारजातं तत्त्वज्ञानञ्च शास्त्रादेव सम्भवति । अतः साक्षाद् भगवानेव शास्त्ररूपेण सङ्क्रमते । तच्च शास्त्रं शब्दात्मकं ब्रह्म–

द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्मपरं च तत् ।
शाब्दे ब्रह्मणि निष्णातः पर ब्रह्माधिगच्छति ॥ इति ।

अतः सर्वं शब्दात्मकं शास्त्रम् । स शब्दश्च पञ्चाशद्वर्णराशिरिति तत्त्वम् । तत्कथं परशक्तिस्वरूपमिति वदति स्वच्छन्दे–

'शास्त्रं शब्दात्मकं सर्वं शब्दो हंसः प्रकीर्त्तितः' । इति ।

ततः कोऽसौ हंस इति समुदेति काऽपि बुभुत्सा? तत्समाधानं प्राप्यते तत्रैव–

'हंसोच्चारस्तथोच्यते' ।
'हकारस्तु स्मृतः प्राणः स्वप्रवृत्तो हलाकृतिः' ॥

इत्थं हलाकृतिरनच्को हकारोऽनाहतध्वनिरूपः । एवम्भूतो हकारः स्वयमुच्चरितः प्राणरूपेण स्थितः । तथा चोक्तम्–

नास्योच्चारयिता कश्चित् प्रतिहन्ता न विद्यते ।
स्वयमुच्चरते हंसः प्राणिनामुरसि स्थितः ॥ (स्व. ७।५९)

मार्कण्डेयपुराणेऽपि–

अर्धमात्रा स्थिता नित्या याऽनुच्चार्या विशेषतः ॥

अर्धमात्रारूपेण स्थिता सा परमा शक्तिर्वैखरीभावेनानुच्चार्या । यतो हि स्वररहितस्य व्यञ्जनस्योच्चारणं नैव सम्भवति । गुरु-प्रबोधितमार्गेणोपासनया च केषाञ्चिद् योगिनामेव तज्ज्ञानं भवितुमर्हति । यथोक्तमाचार्यचणेन देशिकप्रवरेण भगवता शङ्कराचार्येण सौन्दर्य-लहरी-स्तोत्रे–

समुन्मीलत्संवित्कमल-मकरन्दैकरसिकं
भजे हंसद्वन्द्वं किमपि महतां मानसचरम् ।
यदालापादष्टादशगुणित-विद्या-परिणति-
र्यदादत्ते दोषाद् गुणमखिलमद्भ्यः पय इव ॥

हंसद्वन्द्वं किमप्यनिर्वचनीयम्। शिव-शक्तिस्वरूपं महतां योगीन्द्राणां मानसचरम् । तस्यालापाद् हंसस्वरूपस्य ज्ञानादनाहतध्वनेः श्रवणादष्टादशगुणितविद्या, दोषरहितानि सर्वाणि शास्त्राणि प्रस्फुरन्ति । तदेव सर्वशास्त्राणां निदानम् । अस्यानाहतध्वनेरूपं स्पष्टयताऽभिहितं केनाऽप्यभियुक्तेन–

आनन्दलक्षणमनाहतनाम्नि देशे
नादात्मना परिणतं तव रूपमीशे! ।
प्रत्यङ्मुखेन मनसा परिचीयमानं
शंसन्ति नेत्रसलिलैः पुलकैश्च धन्याः ॥ इति ।

अनाहतनाम्नि देशे हृदये नादात्मना परिणतं भगवत्याः पराया रूपं नेत्रसलिलैः पुलकैश्च केचन धन्याः शंसन्ति । अनाहतध्वनि-श्रवणजनितेनानन्देन पुलकोद्गम आनन्दाश्रुपातश्च सञ्जायते, तेनैव रूपेण शंसन्ति कथयन्ति न तु वाचा । एवम्भूतस्य हंसस्य न कोऽप्युच्चारयिता न च कोऽपि प्रतिहन्ता वा विद्यते । अशेषं वाच्य-वाचकक्रममुल्लङ्घ्य परमाभेदसार-महामन्त्रवीर्यात्मना स्फुरति । यतो ह्यस्य सर्वकर्तृत्वं पर-मातृत्वं च सिद्ध्यति । अत एवायमनाहत इत्युद्घोष्यते । इतरवर्णवत् स्थानप्रयत्नकरणाभिघाता अनभिव्यक्तत्वादनस्तमितरूपत्वात् प्राणिनामुरसि हृदये जीवितस्यापि जीवभूतः स्थितः । केचिदेव त्ववधानधना एतत्सत्तामाविशन्तीति 'स्वच्छन्दोद्द्योते' आचार्यप्रवरक्षेमराजेन वर्णितं स्वयमुच्चरति हंसः ।

महामाहेश्वरा अभिनवगुप्तपादास्तु इतोऽप्यधिकं वर्णयन्ति 'तन्त्रालोके'–

एको नादात्मकस्तेषां वर्णः सर्ववर्णविभागवान् ।
योऽनस्तमितरूपत्वादनाहतमिहोदितः ॥
स तु भैरव-सद्भावो मातृ-सद्भाव एव सः।
परा सैकाक्षरा देवी यत्र लीनं चराचरम् ॥

अनाहतोदितस्थानस्तमितरूपस्याजस्रमखण्डरूपेण प्रवर्तमानस्य सर्ववर्णसमूहस्य नादात्मकस्य वर्णस्य श्रवणेन भैरवसद्भावो मातृ-सद्भावश्च प्रादुर्भूयते । एकाक्षरा सा पराशक्तिर्यस्यां चराचरात्मकं सकलं विश्वं लीनमस्ति । अयमेव शाक्तसमावेशः सर्वज्ञत्व-सर्वकर्तृत्वभाव-विधान-मध्यमधाम-प्रवेशरूप-शुद्ध-विद्योदयः । शुद्धविद्योदयाच्चक्रेशत्व-सिद्धिरिति 'शिवसूत्रे' वर्णयता श्रीक्षेमराजेन भणितं यत्–'साधको यदा मितसिद्धीरनभिलषन् विश्वात्मप्रथामिच्छति, तदाऽस्य वैश्वात्म्यप्रथावाञ्छया यदा शक्तिं सन्धत्ते, तदा 'अहमेव सर्वम्' इति शुद्धविद्याया उदयाच्चक्रेशत्वरूपं माहेश्वर्यमस्य सिद्ध्यति । तस्मात् परं किमपि नास्ति–

तस्मात् सा हि परा विद्या यस्मादन्या न विद्यते ।
विन्दते यत्र युगपत् सर्वज्ञादिगुणान् परान् ॥

अतः शब्दराशिरेव हंसोच्चारात्मा हंसोच्चारश्च परशक्त्यनुभवस्फारसार इति । एवं 'हृदयस्था रविप्रख्या त्रिकोणान्तर-दीपिके'ति ललितासहस्रनामस्तोत्रे रविशब्देन प्रोच्यमाना विद्यते । तथा च 'साम्बपञ्चशिका'यामपि तत्त्वमेतदेव चिदर्कशब्देन निरूपितम् ।

भगवानाद्यशङ्कराचार्योऽपि श्रीप्रपञ्चसारतन्त्रे 'प्राणात्मकं हकाराख्यं बीजं तेन तदुद्भवः' इति हकारस्यैव प्राणात्मकत्वं स्वीकुरुते । 'परात्रिंशिका'यामपि–

यथा न्यग्रोधबीजस्थाः शक्तिरूपो महाद्रुमः ।
तथा हृदयबीजस्थं सर्वमेतच्चराचरम् ॥ इति ।

'स्पन्दकारिका'यां स्पन्दरूपेणैवास्य तत्त्वस्य सुबहु विवेचनं विद्यते, तत्तु विस्तरभयान्नैव चर्च्यते । 'प्राक्संवित् प्राणे प्रतिष्ठिता' इति रीत्या तत्तत्त्वं सर्वत्र सर्वदाऽनुस्यूतम् । यथा हि–

'शिवो धर्मेण हंसस्तु सूर्यो हंस-प्रभान्वितः ।
आत्मा वै हंस इत्युक्तः प्राणो हंस-समन्वितः ॥

इति तन्त्रान्तरोक्तदिशा 'हंसः सर्वेषां हृदि स्वतः स्फुरन् प्राणः प्राणनाऽपरपर्यायो जीवः' । स एषोऽविच्छेदेन गुरुपारम्पर्येण ज्ञातः सर्वज्ञत्वं प्रयच्छति । स हलाकृतिर्हकारः समस्तं विश्वं क्रोडीकृत्य चितिरूपः कुण्डलिन्याकारः प्रसुप्त-भुजगाकृतिः परा-पश्यन्ती-मध्यमा-वैखरीरूपं विधत्ते । अनेनैव सर्वाणि शास्त्राणि समुद्भवन्ति । सर्वत्र सर्वदा चाब्रह्मभुवनमखण्डमण्डलाकारेण प्रस्फुरति । तथा चोक्तम्–

अनेनैव च योगेन हंसः पुरुष उच्यते ।
ब्रह्म-विष्वीश-मार्गेण चरन् वै सर्वजन्तुषु ॥

एवम्भूत-प्रमाणकदम्बकैः शब्दो हंस इति सिद्ध्यति । अतः परशिवप्राप्तये शब्दरूपा पराशक्तिरेव हेतुभूता । यथा हि–'ज्ञानं ज्ञेयस्य ज्ञापकम् । ज्ञापकं बोधमतुलं दीपवद् द्योतनं यतः' । इत्यनुसारं परशक्तिप्रथात्मकं ज्ञानं दीपवद् वस्तुस्वरूपं द्योतयति । उक्तञ्च–

दीपहस्तो यथा कश्चिद् द्रव्यमालोक्य चाहरेत् ।
एवं ज्ञानेन च ज्ञेयं तस्मिन् कुर्यात् तु संस्थितिम् ॥

श्रीविज्ञानभैरवेऽपि–

यथाऽऽलोकेन दीपस्य किरणैर्भास्करस्य च ।
ज्ञायते दिग्विभागादि तद्वच्छक्त्या शिवः श्रितः ॥

अतः शक्त्युपासनयैव ज्ञानं भावितुमर्हति, नान्यः पन्थाः । किञ्च–

न गुणेन विना तत्त्वं न तत्त्वेन विना गुणः ।
गुणं गृह्णन्ति सर्वत्र न तत्त्वं गृह्यते क्वचित् ॥

इतिवद् धर्ममुखेनैव शिवो धर्मी प्रथते विशेषतः परमशिवात्मा, तस्मिन् विश्वनिर्भरे शक्त्युपाये विना स्वतोऽनुप्रवेशायोगत् । अत आगम एव ज्ञानम्, ज्ञानेनैव शिवो ज्ञायते । तज्ज्ञानं च शब्दराशि-सतत्त्वम् । यथा हि 'शिवसूत्रे' ज्ञानाधिष्ठानं मातृका । अत आगमस्वरूपं पञ्चाशन्मातृकास्वरूपभूता शक्तिरिति सुसिद्धम् ।

आगमेष्वेवं पूर्वोक्तं यत्–'आगमो ज्ञानमित्युक्तमनन्ताः शास्त्रकोटयः' इत्यनन्त-कोट्यागमशास्त्रेषु विविधा उपासनापद्धतयः प्रोक्ताः सन्ति, तासु त्रैपुर-सिद्धान्तस्य शेखरीभूतत्वात् तत्र च 'त्रिपुरार्णव'स्य तद्गतत्वात् त्रैपुरा[illegible]सिद्धान्तस्य विवेचनमप्य-पेक्षतामावहति । तदप्यत्र किञ्चिन्निरूप्यते ।

अथ 'को नाम त्रैपुर-सिद्धान्त?' इति जिज्ञासा सर्वेषां स्वाभाविक्येव । अतः सर्वतः प्रथममत्र तद्विषय एव किञ्चिद् विव्रियते–

भगवती श्रीललिता महात्रिपुरसुन्दरी तन्त्रागमेषु 'त्रिपुरा'नाम्नाऽऽम्नाताऽस्ति । ऋग्वेदान्तर्गतसाङ्खायनशाखायास्त्रिपुरोपनिषदि प्रथमायामृचि–

तिस्रः पुरस्त्रिपथा विश्वचर्षणी अत्राकथा अक्षराः संनिविष्टाः ।
अधिष्ठायैवमजरा पुराणी महत्तरा महिमा देवतानाम् ॥

इत्यादिना श्रीचक्र-परदेवतास्वरूपप्रतिपादनपुरस्सरं त्रिपुरा-महिमा वर्णितः । त्रिपुराशब्दस्य निर्वचनं च 'त्रिभ्यस्तेजोऽबन्नादिभ्यः पुराभूता त्रिपुरा'इति साधितम् । तेजोऽबन्नादिभ्यः पूर्वसत्त्वमेव हि सर्वतत्त्वातीतत्वं ब्रह्मणः । अत एव त्रिपुरा आद्या शक्तिः अनवच्छिन्ना पराभट्टारिका शिवादिक्षित्यन्ता षट्त्रिंशत्तत्त्वमय-सर्वप्रपञ्चा-त्मिका तदुत्तीर्णा चेति सर्वोपनिषत्प्रसिद्धाऽभिधीयते । इयं त्रिपथा त्रिप्रकारेति श्रुतिवचनानुसारं बिन्दुत्रय-मात्रात्रय-तत्त्वत्रय-व्याहृतित्रय-वाक्त्रय-बीजत्रय-वेदत्रय-लोकत्रय-गुणत्रय-सन्तानत्रय-गुरुत्रय-धामत्रय-पीठत्रय-शक्तित्रय-मातृकाद्यष्टमूल-त्रिकोणरूपैर्बहुविधैर्विभाव्यते ।

त्रिपुरानाम्नो महत्त्वं प्रतिपादयन्तः श्रीलघुभट्टारकाः–

देवानां त्रितयं त्रयी हुतभुजा शक्तित्रयं त्रिस्वर-
स्त्रैलोक्यं त्रिपदी त्रिपुष्करमथो त्रिब्रह्म वर्णास्त्रयः ।
यत् किञ्चिज्जगति त्रिधा नियमितं वस्तु त्रिवर्गात्मकं
तत् सर्वं त्रिपुरेति नाम भगवत्यन्वेति ते तत्त्वतः ॥

अथ च चतुःशत्याम्–

त्रिपुरा परमा शक्तिराद्या ज्ञानादितः प्रिये ।
स्थूल-सूक्ष्म-विभेदेन त्रैलोक्योत्पत्तिमातृका ॥
कवलीकृत-निःशेष-तत्त्वग्राम-स्वरूपिणी ॥

इत्यादिभिः प्रतिपादिता सकलजगत्कारणभूता त्रिपुरा ब्रह्मविद्येति सुसिद्धमेव । श्रीत्रिपुराया उपासना वेद-वेदाङ्ग-पुराणादिष्वनेकत्र वर्णिताऽस्ति । तन्त्रागमानां त्वियं सारभूतोपासना मन्यत एव । उपासनान्तर्गतानां विषयाणां सम्यग् ज्ञानपुरस्सरं तत्तद्विधिनियमोपदेशपालनपूर्वकं विचार्यवादजनितनिर्णयविषयार्थः सिद्धान्त इति । स चायं सिद्धान्तो भगवता परशुरामेण कल्पसूत्रेऽष्टादशखण्ड्यां निरूपितः । यथोक्तं तत्रैवान्ते फलश्रुतौ–

"य इमामष्टादशखण्डीं महोपनिषदं महात्रैपुरसिद्धान्तसर्वस्वभूतामधीते, स सर्वेषु यज्ञेषु यष्टा भवति । यं यं क्रतुमधीते, तेन तेनास्येष्टं भवति, इति हि श्रूयते । इत्युपनिषत् ।" इति ।

अथ च ब्रह्मस्वरूप-प्रतिपादकत्वादुपनिषद्रूपेऽस्मिन् सूत्रे साक्षात् परम्परयेति द्विविधे ब्रह्म प्रतिपादिते । साक्षाद् ब्रह्मस्वरूपप्रतिपादनमत्र विद्यते । अत एवेयं महोपनिषत् । त्रिपुरासम्बन्धी त्रैपुरः स चासौ सिद्धान्तश्च त्रैपुरसिद्धान्तः' इति दृशाऽत्र सिद्धान्तस्यास्य सर्वस्वभूतं तत्त्वं निरूपितमस्तीति स्फुटमेव । त्रैपुर-सिद्धान्तत्वेन परिगणित-विषयेषु तत्रैव कल्पसूत्रे सिद्धान्तरूपेण 'तत्रायं सिद्धान्तः षट्त्रिंशत् तत्त्वानि विश्वम्' इत्यादिनाऽऽरभ्य 'आत्मलाभान्न परं विद्यते, सैषा शास्त्रशैली' इत्यन्तं वर्णितः । अस्य सारसर्वस्वं 'श्रीविद्यारत्नाकरे' प्रतिपादितमस्ति ।

त्रैपुरसिद्धान्तः

भूतानि, तन्मात्राणि, ज्ञानकर्मेन्द्रियाणि, अहङ्कारबुद्धिमनांसि, गुणसाम्यरूपा प्रकृतिः, शरीरकञ्चुकितशिवो जीवः, (परमशिवगताः स्वतन्त्रता-नित्यता-नित्यतृप्तता-सर्वकर्तृकता-सर्वज्ञता धर्मा एव सङ्कुचितास्सन्तो जीवे) नियति-काल-राग-कलाऽविद्या-शब्दवाच्या भवन्ति । माया (जगत्परमशिवयोर्भेदबुद्धिः) शुद्धविद्या (तयोरभेदबुद्धिः) जगदिदन्तया पश्यन् परमशिव ईश्वरः, तदहन्तया पश्यन् सदाशिवः, शक्तिः परमशिवस्य जगत्सिसृक्षा, तद्वान् शिवः, षट्त्रिंशत्तत्त्वानि, स्वविमर्शः पुरुषार्थः, वर्णसमुदायरूपा मन्त्रा नित्याः, (मूलविद्यासमसत्ताका व्यावहारिकनित्याः) मन्त्राणामचिन्त्यशक्तित्वेन स्वगुरुपरम्परोपदेशैरगम्यधर्मरूपेण सम्प्रदायेन गुरुशास्त्रदेवतासु विश्वासेन सर्वासिद्धयः, आचार्योक्तरीत्या गुरुमन्त्र-देवतात्मनामैक्यं विभावयन् मनःपवनयोरेकयत्ननिरोद्धव्यत्वज्ञानाच्च प्रत्यगात्म-वेदनम्, भावनादार्ढ्यान्निग्रहानुग्रहसिद्धिः । दर्शनान्तरानिन्दनेन स्वोपास्यनिष्ठया मन्त्रार्थानुसन्धानेन कामक्रोधनिन्दापरिवर्जनेन च सिद्धयो भवन्ति ।

वृत्तिभिर्वेद्यं सर्वं हविः, इन्द्रियाणि स्रुचः, सङ्कोचेन स्वात्मस्थितास्सर्वज्ञत्व-सर्वकर्तृत्वादयः परमशिवशक्तय एव ज्वालाः, स्वात्मशिव एव पावकः, स्वयमेव होता, निर्गुणब्रह्मापरोक्ष्यं फलम्, स्वपारमार्थिकस्वरूपलाभान्न परमिति सार इति ।

अयमेव सिद्धान्तस्तन्त्रान्तरेषु त्रिपुटीरूपेण बहुधा प्रतिपादितः । यथा योगिनी-हृदये–(१) परा, (२) परापरा, (३) अपरा इति । एवमेव (१) बुद्ध, (२) प्रबुद्ध, (३) सुप्रबुद्धा (१) मन्त्र, (२) मन्त्रेश्वर, (३) मन्त्रमहेश्वरा (१) साधक, सिद्धि, (३) सिद्धा (१) नर, (२) शक्ति, (३) शिवा (१) आणव, (२) शाक्त, (३) शाम्भव-समावेश-प्रभृतीनां तन्त्रान्तरोक्तानामेतासां त्रिपुटीनां लक्ष्यमेकमेव । साधनापद्धतयश्च पार्थक्यं भजन्ते । परं च परमकारुणिकेन भगवता परशुरामेणैषा त्रिपुटी पञ्चधा विभज्य साधकानां परमोपकारः संसाधितः । पञ्चधा विभागे चायं साधनाक्रमः समुपदिष्टः– (१) गणपतिक्रमः, (२) श्रीक्रमः, (३) श्यामलाक्रमः, (४) दण्डिनीक्रमः, (५) पराक्रमश्चेति । एतेषु श्रीक्रमः प्रस्तुते 'त्रिपुरार्णव'ग्रन्थे महता समारम्भेण निरूपितः ।

साम्प्रतं प्रत्यभिज्ञागतस्य महान् प्रचारः श्रूयते, तन्मतावलम्बिनस्त्रिकमतं सर्वोत्तमोत्तमं व्याहरन्ति । तन्मूलभूतस्य काश्मीरशैवाद्वैतस्य प्रचारोऽपि गगनतलं स्पृशति । परञ्चैतत् सर्वं महात्रैपुरसिद्धान्तरूपमहाह्रदस्य कुल्यारूपमेव तेनैवानुप्राणि-तञ्चास्ति ।

म. म. गोपीनाथ-कविराजमहोदयाः काश्मीरशैवाद्वैत-सम्बन्धिन्यां चर्चायां विवेचन-पुरस्सरमिदमेव साधितवन्तो यत् त्रैपुरसिद्धान्तस्य मूलमेव प्रत्यभिज्ञा-मतस्याधारभूमिरस्तीति विषये नास्ति कश्चन मतभेद इत्यपि शाक्ताद्वैतदर्शनश्रियं त्रैपुरसिद्धान्तं च पुष्णाति ।

आद्या श्रीशङ्कराचार्या अपि सौन्दर्यलहरीस्तोत्रे त्रैपुरसिद्धान्तमेवापूपुषन् । प्रख्यापितस्य वेदान्त-सिद्धान्तसारभूतस्याद्वैतमतस्य प्रतिष्ठार्थं शाक्ताद्वैतदर्शनं त्रैपुरसिद्धान्तानुगुणं च साध्वमन्यन्त । **"सम्प्रदायो हि नान्योऽस्ति लोके श्रीशङ्कराद् बहिः"** इति ।

श्रीविद्यार्णवोक्तरीत्या श्रीविद्यासम्प्रदाय-प्रवर्तका भूत्वा कान्दिशीकानां स्वल्प-शेमुषीणां कलिजानां हिताय सुमहतीमुपकृतिरूपां त्रिपुरोपास्तिं व्यतानिषुः । अत आगमानां सारभूतस्त्रैपुरसिद्धान्त एव सर्वथा समाश्रयणीय इति बुद्धौ समारोहति ।

वर्ण्य-विषयाधारेण ग्रन्थस्यास्यानुबन्धचतुष्टयदृष्ट्या (१) अधिकारि, (२) सम्बन्ध, (३) प्रयोजन, (४) विषयेषु प्रथम-द्वितीय-तृतीयानुबन्ध-विचारास्तु पूर्वोक्तेषु विवेचनेषु पर्यालोचिता एव । इदानीं विषयरूपानुबन्ध-निरूपणं किञ्चिदत्र निरूप्यते ।

अस्मिन् ग्रन्थे एकविंशतिस्तरङ्गा विद्यन्ते । **प्रथमे तरङ्गे** दीक्षाविधिर्निरूपितः । तस्य विधेः कादिमत-ग्रन्थेभ्योऽतिवैशिष्ट्यं चकास्ति । यथा–

दीक्षैव मुक्ति-सौधस्य सोपानं सुलभं प्रिये ।
सौधारोहो यथा नास्ति सोपानारोहणं विना ॥
तथा दीक्षां विना मोक्षो दुर्लभः शिव-शासने ॥ इति । (१४-१५)

श्रीमहाषोडशी महापादुकोर्ध्वाम्नायोऽनुत्तराम्नायश्च दीक्षायां साधकायोपदिश्यन्ते । अत्रैव षडाम्नायदीक्षाऽपि दर्शिता । ततःपरं स्त्रीणां मूढानामशक्तानामतिश्रद्धावतां दीक्षादान-विधान-विषयकं प्रश्नमुपस्थापयन्त्या भगवत्या उत्तररूपेण भगवता शिवेन साधारण-दीक्षाप्रकारोऽप्यत्र वर्णितः । यथा–

देव्युवाच–

महेश कैलाशपते श्रुता दीक्षा त्वयेरिता ।
अनेक-मन्त्राङ्गयुता विद्वदेक-समाश्रया ॥
अतिश्रद्धावतां देव! मूढानां नित्यरोगिणाम् ।
प्रोक्ता दीक्षातिगहना कथं स्याद् वद मे प्रभो ॥(१।१८७-१८८)

इत्यादि । समाधाने च–

तेषां यावति शक्तिः स्यात् तावदेव निरूपयेत् ।
तैर्यावच्छक्यते कर्म कर्तुं तावदुदीरयेत् ॥(१।१९३-१९४)

इत्यादिना सरलो दीक्षामार्गोऽपि सानुकम्पमुदीरितः । पुनर्दीक्षाऽनन्तर यत्कर्तव्यं तदपि **साधु** निरूपितम् । एवं साधनायां साधकस्य क्रमेण यद्यदीप्सितं तत्सर्वमपि प्रश्नरूपेण भगवत्योपस्थापितं भगवता शिवेन च पूर्णतया तन्निगदितम् । **एवमनवच्छिन्नरूपेणात्र** प्रोक्तपद्धतिरतिसौष्ठवं भजते ।

एवमेव कौल-विचारेऽपि चतुर्विधाः कौला अत्र ग्रन्थे वर्णिताः । यथा–

उत्तमा मध्यमास्तद्वदधमाश्चाधमाधमाः ।
चतुर्धा कौलिकाः प्रोक्तास्तेषां भेदमिदं शृणु ॥
अशेषजगतामात्म-प्रसरत्वं सुवेत्ति यः ।
स कौलिकोत्तमो ज्ञेयो भावयत्यनिशं तु यः ॥
जगद्वेत्त्यात्मनैक्यं स मध्यः कौलिको मतः ।
योऽन्तराधारचक्रेषु मानसार्चापरः सदा ॥
अधमः स तु विज्ञेयो यो बाह्याचाररतः सदा ।
अधमाधमः स ज्ञेयो भवेदेवं चतुर्विधाः ॥(१४।६६-७०)

इत्थमेवान्येऽपि भूयांसो विषया अत्र नितरां महत्त्वमण्डिताः साधकानां संशयच्छेदका उपाहृताः सन्ति । नैतावानेव; अपि तु साधकेन प्रातरारभ्य कर्तव्यः सन्ध्याविधिः, भूशुद्ध्यादि-विधिः, न्यास-विधानम्, यन्त्रोद्धार-प्रकारः, पीठपूजाविधिः, आत्मदेवतायास्त्रिधा पूजने परा-मिश्रापराणां निरूपणेन सहैवावाहनाद्युपचारकथनम्, आवरणपूजनं च सुस्पष्टतया व्यावर्णितम् । ततः परमर्घ्यविधिः, सानुकल्पं कुलद्रव्यादि-कथनम्, होम-बलि-विधानम्, पूजोत्तर-विधिः, स्वात्मीकार-विधिः, मुद्रावितरणम्, संक्षेपपूजाविधिः, नैमित्तिकार्चनानि, मालामन्त्रकथनम्, रहोयागकथनम्, तत्रोपयुक्तानामाथर्वणमन्त्राणां निदर्शनम्, श्रीसूक्तस्य विधिश्च सुतरां सम्प्रोक्तः ।

एतेषु बहवो विषयास्तु वस्तुत इदम्प्रथमतयोपदिष्टाः । एतेषां विषयाणां सारोऽत्र हिन्दीभाषया निरूपित एवेति नात्र पल्लवः क्रियते । इत्थं त्रिपुरार्णवग्रन्थराजोऽयं भगवत्याः श्रीललितामहात्रिपुरसुन्दर्या उपास्ति-तत्त्वविज्ञापनपरः । उपास्तौ यानि यानि तत्त्वानि प्रामुख्येन ज्ञातव्यानि, कर्तव्यानि च भवन्ति, तेषां साकल्येन साररूपेण सारल्येन च सविवेचनमत्र सङ्ग्रहो विद्यते । तन्त्रागमेषु बहुशश्चर्चिता विषया अन्यत्र सूत्ररूपेण निर्दिष्टाः-सन्ति तेऽत्र विशदरूपेण बोधिताः । केचनेदृशा अपि विषया अत्र प्रादुर्भाविता ये तेषु तेष्वन्येष्वागमादिषु चर्चापदवीमपि नारोहिताः । किञ्च, भूयांसो विषया अत्रैतादृशा अपि प्रदर्शिता ये बहुत्र विवेचिताः सन्ति; किन्तु तेषां स्वारस्यं स्फुटतां न प्रापत् । इत्थं त्रिपुरार्णवः साक्षाच्छिवा- शिवयोः संल्लापमाध्यमेन त्रैपुर-सिद्धान्तं तदुपासना-विधानानि च साधुतया स्थिरयति प्रमाणयति विविनक्ति चेति निगदने नास्ति काचनातिशयोक्तिः ।

एतस्य ग्रन्थराजस्य प्रकाशनार्थं सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य कुलपतयः श्रीमन्तो **डॉ. विद्यानिवासमिश्र**महाभागाः सपरिकराः सन्ततमभिनन्दनीयाः सन्ति, तानहावां सहस्रशः साधुवादैः सभाजयावः ।

दुर्लभ-प्रायस्य महद्वैभवशालिनोऽस्य त्रिपुरार्णव-सार-सर्वस्व ग्रन्थराजस्य भूयो-भूयः स्वाध्यायेन सर्वेषां साधनाविधौ प्रवृत्तिर्भवेदुत्तरोत्तरं च प्रवृद्धिर्भवेदिति भगवतीमिष्टदेवतां हृदा प्रार्थयन् विरमावः ।

विश्वेश्वरपुर्याम्,
महाशिवरात्रिपर्वणि,
वि. सं. २०४८

दत्तात्रेयानन्दनाथः
(पूर्वनाम–सीतारामकविराजः)
रुद्रदेवत्रिपाठी

त्रिपुरार्णवतन्त्र का प्रतिपाद्य विषय-संक्षेप

करुणासागर भगवान् शिव से भगवती पार्वती ने त्रिपुरा के अनेक तन्त्रों में अत्यद्भुत '**त्रिपुरार्णवतन्त्र**' के श्रवण की प्रार्थना की, तब ईश्वर शिव ने कहा कि–

'हे देवी, मैं त्रिपुरार्णव तुम्हें सुनाता हूँ, तुम सुनो। पहले यह तन्त्र सदाशिव ने महात्मा भैरव को सुनाया था; किन्तु जब कालपर्याय से त्रैपुर-तन्त्रों का उच्छेद हो गया, तब भैरव को सदाशिव ने पुनः इस त्रिपुरार्णव का कथन किया था। यह ग्रन्थ त्रिपुरा-सम्बन्धी उपासना-विधियों का समुद्र है। ग्रन्थ संख्या की दृष्टि से यह लक्षगुणित है। यह नित्य, नैमित्तिक और काम्यप्रयोगों की अनेक विधियों से समन्वित है। विस्तार होते हुए भी संक्षिप्त कथन से पूर्ण होने के कारण यह अनेकविध उपासना-कर्म और विविध उपपत्तियों से युक्त अतिश्रेष्ठ शाक्त-विज्ञान है। यह तन्त्रग्रन्थ अत्यन्त विस्तृत है, अतः उसे पूर्णरूप से नहीं कहता हूँ। हाँ, तुम त्रिपुरा के नानाविधानों में जो सुनना चाहती हो, उसे पूछो, मैं तुम्हें संक्षेप में वह सब बतलाता हूँ'।

इस प्रासङ्गिक संवाद के पश्चात् देवी ने सर्वप्रथम '**त्रिपुरा-दीक्षा**' के बारे में जिज्ञासा की और शिव ने क्रमशः दीक्षा की महत्ता, गुरु की योग्यता, स्त्रीगुरु की विशेषता एवं दीक्षा की विधि का वर्णन किया है। दीक्षा के लिये मुहूर्त्त, दीक्षा के पूर्व कर्त्तव्य कर्म-निर्देश, जिनमें पुण्याहवाचन, नान्दीश्राद्ध, कलशस्थापन आदि की विधियों का उल्लेख किया है। इन क्रियाओं में उपयोगी विधि-दर्शन के साथ ही आवश्यक वैदिक-मन्त्रों के प्रतीक भी बतलाये हैं। आचार्यवरण, श्रीयन्त्र-लेखन, कलशस्थापन, प्रधानपूजा और हवन की विधि भी विस्तार से समझाई है, जिसमें छोटी-बड़ी सभी क्रियाओं का क्रमिक निर्देश किया गया है।

पीठ-पूजा में कामेश्वर तथा कामेश्वरी के संश्लिष्ट स्वरूप के ध्यान से आरम्भ कर वैदिक और तान्त्रिक दोनों ही प्रकारों से हवन-विधि निर्दिष्ट है। इसके पश्चात् दीक्षा का विधान है, जिसमें शिष्य के लिये दन्तधावन और अधिवासन प्रोक्त है। दूसरे दिन प्रातःकृत्य के पश्चात् न्यास, चक्रराजार्चन, हवन एवं सुवासिनीपूजनोत्तर शिष्य का अभिषेचन और मन्त्रोपदेश, मुद्रा-कथन, शाक्त-सम्प्रदाय-सिद्धान्त-कथन हो जाने पर शिष्य द्वारा ब्रह्मादि विप्रों की पूजा, गुरुपूजा का विधान बतलाया है।

इतना हो जाने पर पञ्चदशी एवं पात्रतानुसार षोडशी मन्त्र का उपदेश करने को कहा गया है। यहीं पूर्णाभिषेक भी किया जाए, तो महापादुका, ऊर्ध्वाम्नाय तथा अनुत्तराम्नाय के मन्त्रादि के उपदेश की चर्चा की है। पूर्णाभिषेक की महिमा असामान्य है। स्वयं शिष्य के लिए गुरु की कृतकृत्यता पूर्णाभिषेक से सम्पन्न होती

है । इस प्रसङ्ग में पूर्णाभिषेक-कर्म का विधान भी पूर्ववत् विस्तार से वर्णित है । अभिषेच्य शिष्य में किये जाने वाले न्यास, षडध्वशोधन, कलादीक्षा, दृग्दीक्षा, वेधदीक्षा, पादुकोपदेश और महाषोडशी-मन्त्रोपदेश, मुद्राज्ञापन तथा तत्त्वशुद्धि की प्रक्रियाएँ बतलाकर शिष्य के तन्त्रोक्त पद्धत्यनुसार नामकरण का विधान वर्णित है।

भगवती ने पुनः प्रश्न किया कि 'अतिश्रद्धावान् होते हुए भी देवमूढ नित्य-रोगियों की दीक्षा कैसे हो?' तब उसके उत्तर में ईश्वर ने कहा कि–'मूढ, व्यापृत-व्यस्त, स्त्रियाँ तथा आतुरजनों के लिए उनकी योग्यता का ज्ञान करके मुख्य मन्त्रों का उपदेश किया जाए । अथवा गुरुनाम, षोडशाक्षरी, हृल्लेखा और षोडशीबीज दिये जाएँ । स्त्री, रोगी आदि जो जितना कर सकें, उनको उपदेश करना चाहिए । स्त्रियों के लिये कोई नियम नहीं है, वे तो सभी गुरुरूप ही हैं । केवल मुख्यमन्त्रोपदिष्ट होने से ही वे गुरुरूप हो जाती हैं । यहाँ तक कि यदि स्त्रियों को एक मन्त्र मिल जाए, तो शेष मन्त्रज्ञान के लिये उन्हें पुस्तक ही दे दें । पुरुषों को ऐसा अधिकार नहीं है । स्त्री तो स्वयं परदेवता है' ।

प्रारम्भ में बाला और पञ्चदशी की दीक्षा के अनन्तर ही षोडशी-मन्त्र ग्रहण करना चाहिए । इन मन्त्रों के प्राप्त हो जाने पर कुछ समय इनकी उपासना करनी चाहिए, तदनन्तर पूर्ण दीक्षा ग्रहण करनी चाहिए ।

इसके पश्चात् पूर्णदीक्षा का विधान भी यहाँ वर्णित है, जिसमें बाला, पञ्चदशी, गुरुत्रय, गणपति, बाला के अङ्ग–मन्त्रिणी, दण्डिनी, नित्याएँ, तिरस्करिणी, सौभाग्यविद्या का उपदेश होता है । षोडशी और पादुकामन्त्र यदि विना दीक्षाक्रम के लिया जाए, तो लेनेवाला पापभागी होता है । विना विधान के देनेवाला गुरु भी दोष का भागी होता है । यह षोडशीविद्या शूद्र को कभी नहीं देनी चाहिए ।

इस प्रकार २११ पद्यों में **'दीक्षाविधि'** नामक प्रथम तरङ्ग पूर्ण है ।

इसके अनन्तर द्वितीय तरङ्ग में देवी ने 'दीक्षाविधि' के पश्चात् 'प्रातःकाल से साधक को क्या-क्या करना चाहिए?' यह प्रश्न किया है, जिसके उत्तर में ईश्वर ने कहा है कि–

प्रातः ऊषःकाल में उठकर साधक को गुरुस्मरण करना चाहिए, श्रीगुरु का स्थान सहस्रदल में है । चन्द्रमा के समान उनका वर्ण है । उनका ध्यान करके सुषुम्ना के नीचे लाल वर्ण के सहस्रदल कमल में त्रिपुरा पराशक्ति का स्मरण करे । तदनन्तर सार्धत्रिवलया कुण्डलिनी का प्रबोधन कर कुम्भक से षट्चक्रभेदनपूर्वक परशिवरूप गुरु में प्रविष्ट का ध्यान कर उससे स्रवित सूर्या-धाराओं से स्वयं के आप्लुत होने की भावना करे । इसके पश्चात् संघट्टमुद्रा का न्यास करके मानसिक रूप से गुरुपादुका-मन्त्र का स्मरण करे, जिसमें गुरुनाम भी संयुक्त हो ।

जप, पूजा, तर्पण आदि में दीक्षानाम का उपयोग होना चाहिए और अन्यत्र व्यावहारिक नाम का व्यवहार करे । यदि पादुका-मन्त्र प्राप्त नहीं हुआ हो, तो

अपने गुरुत्रय का स्मरण करे। यहीं मानसिक गुरुपूजा तथा पञ्चमुद्रा दिखाने का विधान भी है। इस प्रसङ्ग में मुद्राओं के लक्षण भी निर्दिष्ट हैं। 'श्रीनाथ-स्तोत्र' सात पद्यों में वर्णित है। यह प्रातःस्मरण का विधान है।

तदनन्तर वैदिक एवं तान्त्रिक स्नान, तान्त्रिक-स्नान की मुद्रा, मन्त्र और यन्त्र-लेखन आदि का निर्देश, अङ्ग-प्रोञ्छन, आचमन और वस्त्रधारण, सङ्कल्प, सन्ध्या, प्राणायाम, सङ्कल्प न्यास और पूजा की विधि सूचित है। जल में श्रीयन्त्र की भावना करके उसी की पूजा यहाँ करनी चाहिए। अघमर्षणादि स्नानाङ्ग कर्म और तर्पण भी यहाँ करणीय हैं। प्रसङ्गवश मध्याह्न और सायङ्काल के 'त्रिपुरादेवी' के ध्यान भी दिये हैं। अर्घ्यदान, गायत्रीजप, मूलमन्त्रजपपूर्वक सन्ध्याविधि का संकेत भी किया है।

श्रीविद्या-साधकों के लिये जो पारायणक्रम वर्णित है, उसमें नामपारायण, घटिकापारायण नवधा अथवा षष्टिधा करने का सूचन करके 'अजपाजप' का विधान दिया है। अन्त में उपर्युक्त कर्मों के फल बतलाकर '**सन्ध्याविधि**' नामक इस द्वितीय तरङ्ग को पूर्ण किया है।

तृतीय तरङ्ग के प्रारम्भ में भगवती द्वारा सन्ध्या के पश्चात् किये जाने वाले कर्म की जिज्ञासा करने पर महेश्वर ने '**पूजामन्दिर-प्रवेश**' की विधि बतलाई है, जिसमें द्वारपूजा, मण्डलेश, मण्डल और इनकी पूजा और तर्पण करके महालक्ष्मी तथा सरस्वती की पूजा, द्वार के ऊर्ध्वभाग में गणपति और क्षेत्रपाल , दोनों पार्श्वभागों में गङ्गा, यमुना, धात्री, विधात्री, शङ्ख, पद्मनिधि, देहली में अस्त्रदेवी, ब्राह्मी आदि मातृकाएँ तथा असिताङ्ग आदि भैरवों की पूजा करने के निर्देश हैं। इसी प्रकार अविघ्न आदि द्वारों की पूजा तत्तत् स्थानों पर करनी चाहिए।

तदनन्तर मार्तण्डभैरव को अर्घ्य देकर आसन का विधान दिया है। आसनों के विविध प्रकार भी दर्शित हैं, तथा निषिद्ध आसनों के बारे में भी उपयोगी विचार उपस्थापित हैं। भूतोत्सारण-पूर्वक भूमि-प्रार्थना और पूजन करके आसन पर बैठकर दिग्बन्धन, भूशुद्धि और भूतशुद्धि का विधान विस्तार से दिया है। आत्म-प्राण- प्रतिष्ठा-विधि, मातृकान्यास-विधि, व्यापक अन्तर्मातृकान्यासविधि एवं वशिन्यादिन्यास वर्णित हैं।

न्यास-प्रकरण में षोडशी और पञ्चदशी मन्त्रों के ऋष्यादिन्यास, कराङ्गन्यास और उनके लिये मन्त्रखण्डों का सूचन है। इस मूलमन्त्रन्यास के पश्चात् 'चरणन्यास' और षोडशी और पञ्चदशी के ध्यान, लघुषोढान्यास, जिसमें गणेश, ग्रह, नक्षत्रादि न्यासों के नाम और न्यास-स्थलादि वर्णित हैं, वे दिये हैं। यहीं तृतीय तरङ्ग पूर्ण है। इसका नाम '**भूशुद्ध्यादिविधि**' दिया है।

चतुर्थ तरङ्ग में न्यासान्तर क्रिया की जिज्ञासा करने पर महेश्वर ने कहा है कि न्यासविधान सम्पन्न कर लेने पर साधक को जप करना चाहिए तथा उसके पश्चात्

पूजा करनी चाहिए। पूजा यन्त्र में ही होनी चाहिए, यही पुण्यपक्ष है, अतः यन्त्र के निर्माण का यहाँ पूरा विधान दिया है। यन्त्र में ४३ त्रिकोण, २४ सन्धियाँ, १८ मर्म, समबिन्दु-त्रिकोणाग्रत्य का विधान उक्त है और यन्त्र बनाने की आधार वस्तुएँ भी दी हैं। यन्त्र न मिलने पर पीठ की परिकल्पना का उपदेश किया है। शिव-नामक शालिग्राम में पूजा का विशिष्ट फल बतलाया है और नर्मदोद्भव लिङ्ग पर अथवा प्रतिमा में पूजन का विधान भी सुझाया है। दोषपूर्ण यन्त्रों के लक्षण करके उनकी अपूज्यता व्यक्त की है तथा देवतामूर्ति एवं स्थिरचक्र-स्थापना की महत्ता प्रतिपादित करके उनके दर्शन, स्पर्शन, पूजन आदि के फलों का उल्लेख भी यहाँ विस्तार से किया गया है। इसी प्रसंग में यन्त्र की स्थापना-विधि भी दर्शित है, जिसमें प्राणप्रतिष्ठा के सभी अङ्गों का निर्देश हुआ है। चर-श्रीचक्र में पीठ-संस्कार नहीं होता, तथा स्थिर-श्रीचक्र में उद्वासन नहीं होता। कारण-विशेष से दूषित होने पर श्रीयन्त्र का पुनःस्थापन, खण्डित हो जाने पर उपवास एवं विसर्जन, चोर द्वारा अपहृत होने पर अनशन, अमेध्यादि स्पर्श-दोष निवारण के लिये प्रतिवत्सर महाभिषेक तथा उसका विधान दिया गया है।

महाभिषेक में संस्कृत पञ्चगव्य तथा गन्धाष्टक के जल से स्नान कराये और कुशा के जल से १०८ मूलमन्त्र द्वारा उस यन्त्र का प्रोक्षण करे। तदनन्तर यन्त्र का स्पर्श करते हुए मूलमन्त्र, तत्त्वमन्त्र और मातृका से न्यास करे। इसके अनन्तर सिन्दूर से अष्टदल कमल की रचना कर उस पर अक्षत चावल रखे और दीक्षा में जिस प्रकार कलश रखे जाते हैं, उस प्रकार रखे। वहाँ इष्टदेवी की पूजा करे तथा एक हजार मूलमन्त्र का जप, आठ बार माला मन्त्र का जप, आठ बार श्रीसूक्त का पाठ, नित्या-मन्त्र, मातृकामन्त्र और मूलमन्त्र से अभिषेक करे और रात्रि में विशेषपूजा करके सुवासिनी एवं ब्राह्मणों की पूजा करे। ऐसा करने से चर और स्थिर यन्त्र अथवा मूर्ति के सर्वदोषों की शान्ति होती है।

ऐसा प्रतिवर्ष करना चाहिए। महाभिषेक मालामन्त्र और श्रीसूक्त का पाठ ६४ बार होना चाहिए, अथवा आठ बार। तदनन्तर हवन करे। यदि अशक्त हो तो ब्राह्मणों से करवाये। ऐसे एक अनुष्ठान से भी त्रिपुरादेवी प्रसन्न होती हैं। स्थावर यन्त्रादि पर महाभिषेक करने से वाजपेय का फल प्राप्त होता है और देवी त्रिपुरा का वहाँ स्थायी सान्निध्य होता है।

९० पद्यों में यहाँ "यन्त्रोद्धारादि" नामक चौथा तरङ्ग पूर्ण है।

पाँचवाँ तरङ्ग पूजा-विधि-वर्णनात्मक है। इसमें यन्त्रराज को पीठ पर कोमल तूलादि के आसन पर बिठाकर, पात्रासादनपूर्वक पीठ के बीच में स्थापित यन्त्र की पूजा का विधान कहा है। साधक को मुखशुद्धि करना आवश्यक है; क्योंकि मुख दुर्गन्ध से युक्त रहने पर देवता का शाप होता है। अतः ताम्बूल, पञ्चतिक्त अथवा इलायची आदि खाने का विधान दिया है।

पूजा में पीठपूजा प्रथम है, जिसमें मण्डूकादि आधारों की पूजा है। तदनन्तर पीठस्थल और वहाँ की विभिन्न वाटिकाओं मञ्चपाद देवताओं आदि की पूजाएँ निर्दिष्ट हैं। यह तरङ्ग 'पीठार्चन' की विधि को ३२ पद्यों में प्रस्तुत करता है। 'पीठपूजाविधि' इस तरङ्ग का नाम है।

इस तरंग के आरम्भ में महेश्वर ने कहा है कि पीठपूजा के पश्चात् देवता का आवाहन करे और उनकी पूजा करे। पूजा तीन प्रकार की बतलाई है–१-परा, २-मिश्र और ३-अपरा। इन पूजाओं की विधि भगवती के पूछने पर बतलाई है।

साधक स्वयं को गन्धपुष्पादि से अलङ्कृत कर स्व पात्र से परापूजा करे। तदनन्तर परापरा-पूजा (मिश्ररूप) करके बाहर अपरापूजा करे। इनमें संघट्टमुद्रा से मस्तक पर पादुकामन्त्रजप करते हुए स्वयं को शिवरूप होने की भावना क्षण भर करे। यह परापूजा है।

मिश्रपूजा दो प्रकार की है– १-स्थूल और २-सूक्ष्म। इनमें स्थूल-पूजा मानस-पूजा है, जो गुरुगम्य है तथा सूक्ष्म-पूजा में जगन्माता और मन्त्र का सामरस्यपूर्वक आत्मचिन्तन होता है। बाह्योपचाररूप बाह्यपूजा को अपरा-पूजा करते हैं। मानसपूजा को षडाधार, त्रिपीठ, भुवन अथवा अध्वक्रम में जानकर गुरुमार्गोपदेश से उसका जप में उपयोग करना चाहिए। अथवा बाह्यपूजा में अशक्त होने पर अन्तःपूजा करे। समर्थ रहने पर तो साङ्गपूजा ही विस्तारपूर्वक करनी चाहिए। मन्त्रपाठपूर्वक बाह्य- पूजा करने का अनन्तगुणित फल कहा गया है।

सूक्ष्म में सामरस्यरूप आत्मचिन्तन की विधि बतलाते हुए कहा गया है कि– वाच्यों के वाचक रूप का प्रतिभावन पहले होता है। और वाचक मातृकारूप है, ,जो त्रिखण्डा और त्रिकूटगा है। कूटत्रय स्थूलादि स्वात्मरूप हैं। बाह्य उपकरणों से की जाने वाली पूजा तृतीया अपरा है।

इस प्रकार उस मिश्रपूजा को करके व्यापक न्यास करे। कुण्डली उत्थानपूर्वक बिन्दु में पुष्पाञ्जलिसमर्पण, आवाहनादि ६ मुद्राओं द्वारा देवता के पधारने की विभावना, अङ्गन्यास, सकलीकरण, धेनुमुद्राप्रदर्शन तथा शंखजल की बिन्दुओं से मूलमन्त्र द्वारा प्राणप्रतिष्ठा करे। उसके बाद सावरणादेवी के हृदय का स्पर्श करते हुए.१०८ मन्त्र जप करे। १३ मुद्राएँ दिखाये। विशेषार्घ्य से तर्पण करे। उपचारों से देवी की पूजा करे। ये उपचार १६ अथवा ६४ हों। इतना कहकर उनकी विधि बतलाई है। यन्त्र का उच्चालन अभिषेक के अनन्तर ही किया जाए। ऐसा न करने से देवी कुपित हो जाती हैं। श्रीसूक्त से अभिषेक करना भगवती को अतिप्रिय है; क्योंकि यह परावाचक है। यह चतुःषष्ट्युपचार अथवा षोडशोपचार-पूजा उत्तम भावना से करनी चाहिए। यहाँ **'आवाहनाद्युपचारकथन'** नामक छठा तरङ्ग पूर्ण है।

इस तरङ्ग का विषय आवरणार्चन से सम्बद्ध है। इसमें मूलदेवी का त्रिधायतन है। सव्य और दक्षिण हस्त का प्रयोग पुष्प और अक्षत के लिये निर्दिष्ट है। तत्पश्चात् नित्याओं की पूजा, गुरुमण्डल, अष्टकोण के पश्चिम और त्रिकोण के पूर्वभाग से चतुरस्र के महाक्षेत्र में इसकी पूजा होती है। भूपुर में अणिमादि, ब्राह्म्यादि तथा मुद्राओं की पश्चिम से चारों ओर पूजा करके, वायव्यादि कोणों में पार्ष्णि, राक्षस, मध्य में हरि और शिव कोण में तथा पुनः मध्य में इस क्रम से पूजा-तर्पण करे। यह सर्वाशापरिपूरक चक्र की पूजा है। पश्चिमादि दल से कामाकर्षिण्यादि सर्वसंक्षोभण चक्र में, पूर्वादिक्रम से अनङ्गकुसुमादि और क्रम से तत्स्थानीय परिवार देवताओं की अर्चा करे। अन्त में तुर्या समष्टिपूजा की जाये। पूजा के पश्चात् १०८ मन्त्र जप करे। शेष पूजाक्रम भी अन्य के समान ही हैं।

यहाँ '**आवरणकथन**' नामक सातवाँ तरङ्ग पूर्ण है।

इस तरङ्ग में 'आवरण-कथन' में अनुक्त अन्य विषयों के बारे में कहा गया है, जिसमें आवरण-पूजा के पश्चात् त्रिपञ्चिका, पञ्चदश नित्याओं की पूजा की विधि बतलाई है। यह त्रिकोण की तीनों रेखाओं में ५-५ के क्रम से पूजा होती है। यहीं पूज्य देवियों के स्वरूपों का भी कथन हुआ है। त्रिकोण के बाहर आग्नेयादि दिक्कोण, अग्रकोण और मध्य में षडङ्गदेवियों की पूजा की जाती है। तदनन्तर भूसदन की तीन रेखाओं की, पञ्च पञ्चिकाओं की तथा लघुषोढान्यास के देवताओं की अर्चना का सूचन है। लघुषोढान्यास के देवताओं की पूजा में श्रीयन्त्र के स्थानों का निर्देश करते हुए १६ दल में गणेशादि ५१, बिन्द्वादि नौ आवरणों में नवग्रह, तथा ३-३ नक्षत्र एक साथ २७, चतुर्दशार के दो-दो कोणों की सन्धि में डाकिन्यादि ७ योगिनियाँ, अष्टदल और उसकी चारों दिशाओं में १२ राशियाँ, अष्टदल से बाहर के वृत्त में ५० पीठों की पूजा करने का विधान बतलाया है।

इसके पश्चात् चतुर्द्वारों में तथा एक मध्य में आम्नाय और त्रिकोण के कोणों में एवं मध्य में क्रमशः कामेश्वरी, भगमालिनी, वज्रेश्वरी तथा तुर्या महात्रिपुर-सुन्दरी की पूजा का क्रम बतलाया है।

इस प्रकार यह '**आवरण-ध्यान-कथन**' नामक आठवाँ तरङ्ग ३६ पद्यों में पूर्ण है।

इस तरङ्ग में '**अर्घ्य-विधि**' का वर्णन करते हुए पात्रों की स्थापना-विधि बतलाई है, जिसमें १-हेतु, २-सामान्य तथा ३-विशेषार्घ्य पात्रों का विवरण दिया है। इनके अतिरिक्त जल-कलश का भी विधान है। पात्रों के लिये प्रयोज्य धातु और वस्तु-विशेष के साथ ही उनके आकार-प्रकार के सम्बन्ध में भी विस्तार से समझाया है। पात्रों के नीचे रखने की त्रिपदियाँ कैसी हों? शङ्ख का स्वरूप कैसा हो? पात्रों के ढक्कन भी हों, इत्यादि बातें बतलाकर, यह कहा गया है कि इनके विधिवत् निर्माण एवं प्रयोग से उत्तम फल मिलता है, जबकि दोषपूर्ण प्रयोग से पुण्य नष्ट होते हैं।

यहीं अनुकल्प से पूजा करने की विधि बतलाई है, जिसमें सामान्यार्घ्यपात्र एवं विशेषार्घ्यपात्र ऐसे दो पात्र स्थापित होते हैं। एक पात्र से पूजा करना निषिद्ध है। आत्मयोग में अंगलोप-जनित कोई दोष नहीं लगता। अतः आत्मयोगी एक पात्र का प्रयोग कर सकते हैं। जलपात्र ताम्र का, नैवेद्यपात्र कांस्य का और वस्तिपात्र ताम्र का हो। पात्रों की स्थापना में मण्डल-निर्माण, आधारस्थापन, पात्रस्थापन, जलादिपूरण कलशादि-पूजन आदि सभी विधि भी यहाँ निर्दिष्ट है।

तदनन्तर हेतुपात्रधरा सुवासिनी की पूजा का विधान है। यहीं सुवासिनी के स्वरूप का वर्णन भी है। हेतुपात्र-स्थापनानन्तर वहाँ पथिकापूजन, दोषशोधन, पुष्प द्वारा उद्धृत बिन्दु से तर्पण तथा शापशोधन की विधि दर्शित है। हेतुपात्र में मातृकाकार त्रिकोण की भावनापूर्वक उससे बाहर चतुरस्र, त्रिकोण, षट्कोण तथा अष्टदल का ध्यान करने के लिये कहा गया है। पात्र में पञ्चरत्न, मिथुनत्रय, पञ्च-भूत की पूजा, शक्तित्रय, पीठत्रय, तथा कामेश्वरीत्रय की पूजा, षट्कोण में अङ्ग-देवीपूजा, अष्टदला में भैरवपूजा तथा अन्य देवियों की पूजा करके मालामन्त्र एवं श्रीसूक्तपाठ, १०८ मूलमन्त्रजप सुधापूरण आदि विधिवत् सम्पादित करने का निर्देश है।

यहाँ '**अर्घ्यविधि**' नामक नौवाँ तरङ्ग ४० पद्यों में पूर्ण है।

इस तरङ्ग में 'कुलद्रव्य' के सम्बन्ध में कहा गया है। साथ ही अनुकल्प और उसके भेदों का भी निरूपण किया है। यथा–

कुलद्रव्य पाँच प्रकार का होता है। उसी को म-पञ्चक भी कहते हैं। ये पाँच मकार त्रिपुरा की प्रीति को बढ़ाने वाले हैं। कुलपथ में इसके गुह्यनाम भी हैं। इनके द्वारा की जाने वाली पूजा शिवत्व प्राप्त कराने वाली है। १-सदाशिव, २-ईश्वर, ३-रुद्र, ४-विष्णु और ५-ब्रह्मा इन्हीं पाँच के ये प्रतीक हैं। इसीलिये 'पञ्च-म-मय' यज्ञ सर्वोत्तमोत्तम है।

इसके पश्चात् सुधा के प्रकार, उनके गुण, गुणानुसार सेवनयोग्य वर्ण, प्रत्येक 'म' के निर्माण की विधि तथा इतीयाग-विधि-पूर्वक पञ्चमद्रव्य के विशेषार्घ्य में निक्षेप का कथन हुआ। पञ्चम-विधि की महत्ता एवं फल भी यहाँ वर्णित हैं। यह याग अधिकारी को ही करना चाहिए, अन्यथा उसका समूल नाश हो जाता है। ब्राह्मण के लिये इसके पान का सर्वथा निषेध है।

इतना कहकर अनुकल्प से पूजा करने के लिये निर्देश है। अनुकल्प-निर्माण की कतिपय विधियाँ भी बतलाई हैं तथा उसमें होने वाले विधि-निषेधों का भी कथन हुआ है। कौन-सा द्रव्य कब पर्युषित होता है? किससे कहाँ अर्चन होता है? उनके संस्कार कैसे किये जाते हैं? तथा उनमें विकृति कैसे आ जाती है? यह बतलाकर पवित्र द्रव्य से अर्चन का विधान है।

तदनन्तर विशेषार्घ्य ग्रहण की विधि बतलाई है और अन्त में इसकी महिमा का वर्णन करते हुए आचार्यपूजादि का कथन किया है।

यहाँ '**कुलद्रव्यादि-कथन**' नामक दसवाँ तरङ्ग ६५ पद्यों में पूर्ण है।

इस तरङ्ग में अर्घ्यविधि में प्रोक्त अर्चना के मन्त्रों के बारे में कथन करने की प्रार्थना को सुनकर वृषध्वज शिव ने मन्त्रकथन किया है। इनमें धूम्रादि अग्निकला, तपिन्यादि सूर्यकला, छागगायत्री, पशूद्बोधन, सद्योजालादि पाँच मन्त्र, 'त्र्यम्बक' तथा 'तद्विष्णोः' इत्यादि मन्त्रों का वर्णन हुआ है। इनके पश्चात् सोलह सोमकलाएँ, वासुदेव, अमृतेशी-मन्त्र, पथिका, शापविमोचन, पञ्चरत्न तथा मिथुनत्रितय-मन्त्रों का निदर्शन है। तदनन्तर शक्तिचतुष्टय, तत्त्व-चतुष्टय, पीठचतुष्टय, ब्राह्म्यादि-सहित भैरवाष्टक (अष्टपत्रों में पूज्य), मण्डलत्रय, ब्रह्मकला, विष्णुकला, रुद्रकला, ईश्वरकला, सदाशिवकला तथा इनसे सम्बद्ध वैदिक-मन्त्रों का कथन किया गया है।

तदनन्तर '**हेतु-संस्तुति**' के मन्त्रों के कथन से यह तरङ्ग पूर्ण है।

बारहवें तरङ्ग में उपचार-सहित साङ्गोपाङ्ग पूजा की क्रिया का वर्णन है, जिसमें ताम्बूलान्त उपचार-पूजा करके आवरणपूजा, पञ्चोपचार, नैवेद्य, आपोशन, प्राणादिमुद्रा-प्रदर्शन, प्रार्थना और कामकला-ध्यान का विधान वर्णित है। तदनन्तर अग्नि-साधनपूर्वक होम की विधि का निर्देश है। होम के पश्चात् बलिपूजा का विधान है, जिसमें बटुक, योगिनी, क्षेत्रपाल, गणपति, तिरस्करणी, वाराही, सर्वभूत, मन्त्रिणी, उच्छिष्ट श्यामला तथा भैरव के लिये बलिपूजा वर्णित है। इस प्रसङ्ग में प्रयोज्य मन्त्र भी यहाँ सूचित हैं। बलिपात्र विसर्जन की विधि और अन्तर्यजनपूर्वक पात्रस्थ जल का अभिमन्त्रण करके उस जल से अभिषेचन कर **शान्तिस्तव-पाठ** का निर्देश किया है। यहीं बारहवाँ तरङ्ग पूर्ण है।

इस तरङ्ग में क्रमशः 'बलिमन्त्र, अर्घ्यपात्रादि का विसर्जन तथा पूजा-समापन विधि का वर्णन है। तदनुसार भैरव, योगिनी, गणपति, तिरस्करणी आदि के मन्त्रोद्धार देकर आरार्त्तिक, गुरु-पूजन, विशेषार्घ्यसमर्पण, शक्तिपूजा, सुवासिनी-पूजा, सामयिकपूजा, पुष्पाञ्जलिप्रदान, कामकलाध्यान, जप, गुरुदेवतार्पण, शङ्खजल द्वारा प्रोक्षण, षोडशमुद्रादर्शन, मूलमन्त्र-जप तथा उद्वासन की विधि का वर्णन किया है। इस प्रकार '**पूजोत्तरविधि**' नामक यह तेरहवाँ तरङ्ग पूर्ण है।

इसमें स्वात्मीकार-विधि, कौलिकों के धर्म तथा मण्डल के विधान का प्रतिपादन है। इसमें सर्वप्रथम 'मण्डल-प्रवेश' और वहाँ कुलद्रव्यसेवन के नियम प्रदर्शित हैं। सामयिक और स्त्रियों के मण्डल में बैठने, वहाँ बैठकर पात्र-ग्रहण, गुरु तथा ज्येष्ठजनों की पूजा, पात्र-प्रदान-प्रकार, ग्रहण-प्रकार, गुरु-तर्पण, शक्तिशेष और गुरुशेष स्वीकार, पात्रस्थद्रव्य-स्वीकरण-विधि, दक्षिणादिसहित आचार्य को पात्र-समर्पण, पात्र-ग्रहण सम्बन्धी अन्य विधि-निषेध-सूचन आदि का यहाँ विस्तार से विचार किया गया है। यहीं दिव्य, वीर और पशुभाव से तीन प्रकार के पान की

चर्चा करते हुए कहा गया है कि उपर्युक्त तीनों भावों में कब, किसे स्व-स्ववर्णानुसार, पात्र स्वीकार करना चाहिए।

कौलिकों के चार भेद—१-उत्तम, २-मध्यम, ३-अधम और ४-अधमाधम बतलाये गये हैं तथा उनके लक्षण भी यहाँ निर्दिष्ट हैं। पान करने के पश्चात् होने वाली स्थिति को ध्यान में रखकर भी यहाँ उनकी जीवन्मुक्तता का उल्लेख किया है। इसके अनन्तर कौलिकसम्बन्धी मण्डलीय धर्मों का भी निर्देश हुआ है, जिसमें रक्षा के लिये वमन, देवता में भक्ति, परनिन्दात्याग, मन्त्रमुद्रा तथा आत्मनाम का शिष्य के अतिरिक्त अन्यत्र कथन-निषेध, सुवासिनियों के समूह को देखकर प्रणाम करना, पशुभाव में स्थित व्यक्तियों के द्वारा कुलपुस्तक का तथा पशुशासन का स्पर्शाभाव, कुलशास्त्रचिन्तन, सुवासिनियों का महत्त्व, प्रातःकाल से ही उपासना में तत्परता एवं करणीय विधान सूचित हैं।

दीक्षा प्राप्त करने के पश्चात् दीक्षित को सदा उपासना में लगे रहना चाहिए और कदापि मृत्यु की कामना नहीं करनी चाहिए। यदि दीक्षित आत्मसन्त्याग की इच्छा, मोक्ष की भावना से प्रयागादि में भी करता है, तो उसे सद्गति नहीं मिलती। अतः उपासना को कभी नहीं छोड़ना चाहिए।

'गुरुवचन, सत् शास्त्रों में विश्वास तथा इष्टदेव में भक्ति' ये सर्वोत्तम शिवप्रोक्त धर्म हैं। यह सुख और सिद्धि का दाता है। जितेन्द्रिय के लिये यह सुलभ है। जो ऊर्ध्वरेता, सर्वत्यागी, विरक्तजनों में स्मरणमात्र से ही क्षणभर में मोह उत्पन्न कर देते हैं, वे ही यहाँ सिद्धि के कारण कहे गये हैं। विभिन्न मादक-पदार्थों के रहते हुए संयत-चित्त होना अतिकठिन है, अतः भयानक सिन्धुमार्ग को पार करके सन्मुक्ति- द्वीपनगरी तक पहुँचने के लिए दृढ़ श्रद्धा से युक्त पात्र-वाली भक्ति-नौका के विना केवल सदाचाररूप अनुकूल वायु के झोंके के सहारे अन्यान्य उपायों से कैसे पार हो सकता है? अतः भक्ति और श्रद्धा से युक्त होकर कौलमार्ग में स्थित साधक ही उत्तम गति को प्राप्त करता है, यह कहा गया है।

यहाँ चौदहवाँ तरङ्ग '**स्वात्मीकारादि-कथन**' नामक पूर्ण है। इस तरङ्ग में १०३ पद्य हैं।

यह तरङ्ग मुद्राओं के लक्षणों का आख्यान करता है। मुद्रा शब्द की व्युत्पत्ति—'जिसके दिखाने से (देवता) हर्ष प्रदान करते हैं, वह' ऐसी बतलाई है। देवता श्रीललिता-महात्रिपुरसुन्दरी के समक्ष दिखाई जानेवाली त्रयोदश मुद्राएँ हैं, जिनमें संक्षोभिण्यादि ९ तथा ४ आयुधमुद्राएँ पाशादि हैं। ऐसा कहकर प्रत्येक मुद्रा के निर्माण हेतु लक्षण-कथन हुआ है। इनके अतिरिक्त तीर्थाह्वान के लिये अङ्कुशमुद्रा, धेनुमुद्रा, तार्क्ष्यमुद्रा आदि पूजोपयोगी मुद्राओं के लक्षण बतलाये हैं। इनमें विष्णु के आयुधों की मुद्राएँ भी सम्मिलित हैं।

यहाँ '**मुद्राविवरण-नामक**' पन्द्रहवाँ तरङ्ग ४७ पद्यों में पूर्ण हुआ है।

प्रस्तुत तरङ्ग की अवतारणा में भगवती ने जिज्ञासा की है कि पूर्वोक्त विस्तृत पूजा करने में अशक्त साधकों के लिये संक्षिप्त-पूजाविधि किस प्रकार हो सकती है? इसके उत्तर में महादेव ने गौण-पूजा का वर्णन किया है। इसमें कहा गया है कि गौण-पूजा में मुख्य द्रव्य से पूजा में संक्षेप नहीं किया जाता है, तथापि आपत्काल में एक से चार अथवा एक से छः तक के आवरणों का अर्चन और मुख्यरूप से पञ्चिकाओं में भी पूजा होती है। आवरण-मन्त्रों से होम, सर्वभूतबलि तथा शान्तिस्तव का पाठ यथाशक्ति करे। यदि तर्पण नहीं करे, तो 'अनुकल्पेन पूजयामि' कह कर अर्चन करे। यह अतिलघु-पूजा का क्रम है। यदि इसमें भी अशक्त हो, तो केवल एक सामान्यार्घ्य-पात्र स्थापित कर पीठशक्तियों की पूजा, यथाशक्ति आवाहन और विधानपूर्वक आगे बताये हुए क्रम से पूजा करे।

इसमें मूलदेवी की तीन बार, तिथिनित्या, षोडशी, महाषोडशी, गुरुत्रय, षडङ्ग, तथा त्रिकोण खण्ड-देवता, इन अठारह की पूजा और यथासम्भव अन्य देवताओं की पूजा का विधान है। पुष्प एवं अक्षत से मालामन्त्रद्वारा पूजा करने से भी पूजा का फल प्राप्त होता है। यदि पूजोपकरण प्राप्त न हों, तो मानस-पूजा करे अथवा मालामन्त्र का जप ही करे। यह सब बाह्यपूजा में संलग्न साधक के लिये है। आन्तरोपासना तन्त्रों में बहुत प्रकार की कही गई है। उनमें से एक प्रकार यहाँ दर्शित है। यथा–

सुषुम्ना के ऊर्ध्वभाग में अधोमुख श्वेत सहस्रदल कमल है, वहाँ गुरु का स्थान है। सुषुम्ना के नीचे रक्तवर्णी सहस्रदल कमल है। उसे कुल कहते हैं। वहीं कर्णिका में कुलकुण्ड है, जिसमें कुण्डली शक्ति अत्यन्त तेजस्वी विराजमान है। ऊर्ध्व कमल में पूर्णचन्द्र जैसी कान्तिवाले गुरु स्थित हैं। इन दोनों को 'अ' तथा 'ह' रूप मानकर भावना करे। मूलाधार चतुर्दलपद्म के नीचे विषुव नामक लाल वर्णवाला षड्दल कमल है। वहीं से आज्ञाचक्र तक उस कुण्डलिनी को क्रमशः ले जाय। गन्ध आदि पञ्चोपचार, ताम्बूल और प्रणतिपूर्वक यजन करते हुए उसका ध्यान करे। वहाँ शिव से युक्त–सामरस्य को प्राप्त मानकर क्षणभर विश्राम करके उन दोनों का शून्यत्रयमय-बिन्दु-विसर्गरूप स्मरण करे। वहाँ वे दोनों अ-ह-कार तत्त्वाद्यन्त कहे गये हैं। इनमें तत्त्वाद्य शून्यरूप है तथा अन्त्य विसर्गरूप है। तभी तेजस्त्रितय महारूप का हृदय में स्फुरण होता है। ऐसी भावना करने से मनुष्य संसार पर विजय पा लेता है। इस प्रकार की आन्तर उपासना करने वालों के लिये पूजाविधि की अपेक्षा नहीं है।

इस प्रकार २० पद्यों में '**संक्षेप-पूजाविधि**' नामक सोलहवाँ तरङ्ग यहाँ पूर्ण है।

इस तरङ्ग में '**नैमित्तिक-पूजा**' की विधि जानने की इच्छा से किये गये निवेदन का उत्तर देते हुए वृषध्वज शिव ने कहा है कि–

साधक को नित्य और नैमित्तिक दोनों प्रकार की पूजाएँ करनी चाहिए। नित्यपूजा में अशक्त हो, तो माला-मन्त्र का पाठ करे तथा नैमित्तिक-पूजा करे। यदि उसमें भी असमर्थ हो, तो गुरु आदि से पूजा करवाये। प्रतिमास में एक बार तो पूजा करवाये ही, यदि उसमें भी अशक्त हो, तो छह मास में एक बार करवाये। आलस्य अथवा लोभ से छः महीनों में भी एक बार पूजा नहीं करता, कराता है, तो वह पशु हो जाता है। साधक को उसका सङ्ग नहीं करना चाहिए।

इनके अतिरिक्त पर्व-पूजाएँ भी करणीय हैं। यथा पञ्चपर्व, युगादि दिन तथा पुण्याधिक दिन। इसी प्रकार कुल, कुलाकुल, अकुल तिथियाँ, कुलवार, कुलनक्षत्र आदि कुलपर्वों का कथन है। दोनों पक्षों की तिथियाँ एवं चैत्रादि मास देवीपर्व कहलाते हैं। उनमें स्नान, दान, जप, व्रत एवं पूजा का महत्त्व है तथा इनसे भगवती प्रसन्न होती हैं।

नित्यपूजा दिन में और नैमित्तिक पूजा रात्रि में करनी चाहिए, जब कि दिवापर्व का योग हो तो दिन में भी पूजा कर सकते हैं। प्राप्तकाल होने पर पहले नित्यपूजा और तदनन्तर नैमित्तिक पूजा करे। इसी बीच सन्ध्या आदि का समय आ जाए तो मध्य में अथवा एक अंग पूर्ण करके अथवा अन्त में उन्हें सम्पन्न करने का निर्देश दिया है। एक साथ एकाधिक पर्वों का योग आने पर उनका सङ्कल्प में उल्लेख करके मिश्रित पूजा करे। पूजा के अन्त में गुरु, शक्ति-सुवासिनी आदि की पूजा होती है।

इसके पश्चात् चैत्र-पूर्णिमा को दमनकार्पण का पूर्णविधान दिखाया है। यह पूजा चैत्र से ज्येष्ठमास तक भी होती है। श्रावण में पवित्रार्पण की विधि बतलाई है, जिसमें पवित्र-निर्माण एवं पूजाविधान भी प्रदत्त है। आश्विन-शुक्ल में नवरात्र-पूजा भी इसी प्रकार विस्तार से बतलाई है, जिसमें पूजा के साथ-साथ हवन की विधि भी दी है। कार्तिक में दीपपूजा होती है। जिसमें दीपनिर्माण, समर्पण-विधि आदि का उल्लेख हुआ है। यहाँ पूजा में १९८ दीपक समर्पण का मुख्य कल्प है, और अन्त में कहा गया है कि यदि यह सब नहीं कर सके, तो नवरात्र में अथवा नौ दिन के अनुष्ठान में दमनक और पवित्र अर्पण कर ले। ऐसा करने से सभी पूजाओं का फल प्राप्त होता है।

यहाँ यह तरङ्ग ६१ पद्यों में पूर्ण है।

यह तरङ्ग '**मालामन्त्र-कथन**' नामक है। यहाँ 'मालामन्त्र' से तात्पर्य 'खड्गमाला' है। प्रारम्भ में इसकी महिमा बतलाते हुए इसके श्रवण तथा जप का महान् फल उल्लिखित हुआ है। तदनन्तर इसके ऋषि, छन्द, देवता और ध्यान का निर्देश करके 'पद्मराग-प्रतीकाशाम्' इत्यादि सार्धचतुष्टय पद्यों का ध्यान दिया है। ध्यान के पश्चात् मानसपूजा करके मूल-पाठ दिया है।

यहाँ समग्रपाठ अनुष्टप्-पद्यों में ग्रथित है, जिसमें सभी नाम सम्बुद्ध्यन्त हैं। प्रयोग की दृष्टि से कहा गया है कि खड्गहस्त होकर इसका पाठ करने से वह खड्ग सिद्ध हो जाता है और युद्ध में उसका प्रयोग करने से विष्णु को भी साधक जीत लेता है। यह मालामन्त्र श्रीदेवी के आवरणों से युक्त तथा पूजाक्रममय है। अतः पूजाविधि में अशक्त साधक भी यदि इसका पाठ करता है, तो उसे पूजा का फल प्राप्त होता है।

तदनन्तर खड्गमाला में आये नाममन्त्रों के विभाग को समझाया है, जिसमें श्रीमन्त्रपूजा के आवरणों में विहित नाम, स्थान आदि की स्पष्टता है। इसमें कुल एक हजार इकत्तीस वर्ण हैं। खड्गमाला के-१-शुद्ध, २-नमोऽन्त, ३-स्वाहाऽन्त, ४-तर्पणान्त और ५-जयान्त, ऐसे पाँच प्रकार हैं। ये ही १-स्त्री, २-पुरुष और ३-मिथुनरूप से प्रयुक्त होने पर पन्द्रह प्रकार के होते हैं। उदाहरण के रूप में इनके एक-एक स्वरूपात्मक पद भी दिये हैं। जप में शुद्ध, पूजा में नमोऽन्त, होम में स्वाहान्त, तर्पण में तर्पणान्त और स्तोत्र में जयान्त पदों का प्रयोग होता है। यहीं पाठ करने का फल भी निर्दिष्ट है। पुष्पों से अर्चन, होमद्रव्य से हवन, क्षीरादि से तर्पण तथा जप-स्तुति से अनन्त फल प्राप्त होते हैं। यह तरङ्ग ७६ पद्यों में यहाँ पूर्ण है।

इस तरङ्ग का प्रतिपाद्य **'रहस्यार्चन'** है। भगवती की जिज्ञासा के पश्चात् भगवान् शिव ने कहा है कि इस अर्चन को मैंने पहले पूर्णरूप से गुप्त रखा था। तदनन्तर विस्मृत हो जाने से मैंने जानने की प्रार्थना की; परन्तु वह ज्ञात नहीं हुआ। तब १० हजार दिव्य वर्षों तक तप करने पर भगवान् पञ्चवक्त्र ने मुझसे पूछा कि हे वत्स! तुम इस तपस्या से क्या चाहते हो? तब मैंने त्रिपुरार्णव में कथित रहोयाग की विधि कहने के लिये प्रार्थना की। तब भगवान् श्रीकण्ठ ने हँसकर उस याग की महत्ता और दुर्लभता का कथन करके विधि का वर्णन किया है।

इस याग को सम्पन्न करने का अधिकार दीक्षित को ही है। यह एकान्तपूजा भक्ति एवं श्रद्धा से करनी चाहिए। एकान्त और निर्भय स्थान में विघ्नेश्वर तथा गुरु-पूजन करके स्वस्तिवाचन, अभ्युदय-श्राद्ध, मातृकापूजा, सङ्कल्प, आचार्यादि-वरण, पूजास्थल में वेदी निर्माण, मण्डपसज्जा, ध्वजस्थापना, मण्डलपूजन, तिरस्करणीपूजन, सर्वतोभद्रमण्डलपूजन, यजमान का मण्डपप्रवेश, संविद् याचना, पात्रासादनार्थ पात्र-स्थापन की विधि, सुवासिनीपूजा, मण्डप से बाहर संस्कार-मण्डप-विधान, हेतुविधि, अग्निविधि, छागबलि, यन्त्रराजस्थापन, द्वारपूजादि, पात्रप्रतिष्ठा, संविदभिमन्त्रण, आवरणपूजा, पूजाङ्गहोम, पात्रग्रहण, यागसमापन, बलिपूजा, सुवासिनीपूजा, पूर्णाहुति, प्रायश्चित्ताहुति, अग्न्युत्तर कर्म, दिक्पाल, तिरस्कृति, भैरव, क्षेत्रपाल आदि के लिये बलि-प्रदान, सामयिकों को पात्रदान, तत्त्वशोधन, देवीविसर्जन और शान्तिस्तव-पठन का क्रम विस्तार से दिया है।

इसके पश्चात् ऋत्विग्-पूजन, दक्षिणादान, अभिषेचन और शेष कर्म की परिसमाप्ति करे।

इस रहोयाग के विधान को सम्पन्न करने वाले को जो पुण्य प्राप्त होता है, उसका वर्णन भी विस्तार से करके अन्त में अङ्गलोपजनित दोष की शान्ति के लिये मण्डलपूजा तथा विभिन्न दोषों से होने वाली हानि का सूचन हुआ है। इस प्रकार २४३ पद्यों में '**रहोयाग-कथन**' नामक उन्नीसवाँ तरङ्ग यहाँ पूर्ण है।

यह तरङ्ग पूर्वोक्त अतिगोप्य एकान्त-पूजनादि में प्रयोज्य मन्त्रों को जानने की इच्छा और उन मन्त्रों के कथन पर आधारित है। इसमें रहोयाग में प्रयोज्य आथर्वण-मन्त्रों के बतलाते हुए उस समय करणीय विधि का भी निर्देश दिया है। (इन मन्त्रों के क्रम तथा विधियों की सूची पृथक् संगृहीत है। यथासम्भव वर्तमान में उपलब्ध संहिता के स्थलों का सूचन भी किया गया है।)

इस प्रकार के मन्त्र-कथन से वैदिक एवं तान्त्रिक उपासना में दोनों के ऐक्य का प्रतिपादन भी हो गया है।

मन्त्रों के मूलपाठ होने से यह तरङ्ग विस्तृत हो गया है; किन्तु संख्या का व्यवस्थापन नहीं है।

इस अन्तिम तरङ्ग मे त्रिपुरार्णव में प्रोक्त श्रीसूक्त द्वारा श्रीचक्र के अर्चन की विधि के बारे में पूछने पर भैरव-शिव ने वर्णन किया है, जिसमें श्रीसूक्त '**हिरण्यवर्णां**' आदि मन्त्र से '**पुरुषानहम्**' तक पन्द्रह ऋचाओं को श्रीत्रिपुरा को प्रीति देनेवाली बतलाया है। यह श्रीविद्या का सूक्त होने से ही 'श्रीसूक्त' कहलाता है और श्रीविद्या ही त्रिपुरा है, अतः यह 'त्रिपुरा-सूक्त' भी है। इस सूक्त के द्वारा अर्चन में ६४ उपचारों की योजना एक-एक, चार-चार और तीन-तीन पाठों के क्रम से, १६ ऋचाओं के योग से कर लेनी चाहिए। इस प्रकार की पूजा करने मात्र से सर्वपापों से छूट जाता है। और ऐसा अर्चन करने से कर्मलोप का दोष भी नहीं लगता है। सौभाग्य-विद्या के अक्षरों से प्रतिमन्त्र को सम्पुटित करके जो हवन करता है, उसे भगवती ललिता वाञ्छितार्थ प्रदान करती हैं।

इसी प्रसङ्ग में हवनीय वस्तु-विशेष और उसके हवन से प्राप्य फलों का भी निर्देश किया है। यथा–

बिल्वपत्र से पापनाश तथा सौभाग्य-सम्पत्ति मिलती है। सुगन्धित पुष्पों से सौख्य, तिल से पापनाश, धान्य से धान्यवृद्धि, धृत से तेजोवृद्धि तथा अन्य वस्तुएँ जो आगम में प्रोक्त हैं, उनके हवन से वहाँ कहे अनुसार फल मिलता है। शतावृत्ति, सहस्रावृत्ति तथा दस हजार आवृत्ति से सर्वकामसिद्धि, सौख्य एवं देवताप्रीति प्राप्त होती है। लक्षवृत्ति से श्रीपुर में कल्पपर्यन्त वास होता है। अथवा श्रीसूक्त के द्वारा श्रीयन्त्र पर अभिषेक करने से भी उपर्युक्त फल प्राप्त होते हैं।

श्रीसूक्त की ऋचाओं को वाग्बीज से सम्पुटित करके पाठादि करने से वाक्पतित्व, श्रीबीजसम्पुट से देवतात्मता एवं कामबीज सम्पुट से जगद्वशीकरण होता है। पूजा करने में अशक्त होने पर इस सूक्त के तीन पाठ करने से पूजा-फल मिलता है। श्रीसूक्त के जप से शतगुण फल होता है और त्रिपुरा देवी सर्वार्थ को बढ़ाती हैं। त्रिपुरोपासक को इसका नित्य पाठ करना चाहिए, यह आवश्यक है। इसके समान अन्य कोइ पाठ पुण्यरूप नहीं है। इसके जान लेने पर समस्त पाप कच्चे मिट्टी के घड़े में पानी डालने से जैसे वह नष्ट हो जाता है, वैसे ही नष्ट हो जाते हैं।

यहाँ '**श्रीसूक्त-विधि**' नामक इक्कीसवाँ तरङ्ग १८ पद्यों का पूर्ण है।

●

॥ श्रीगणेशाय नमः ॥

त्रिपुरार्णवतन्त्रम्

अथ प्रथमस्तरङ्गः

देव्युवाच

भगवन् सर्वधर्मज्ञ जगत्कारण शङ्कर ।
करुणाब्धे महादेव भक्तानां हितकाम्यया ॥ १ ॥
त्वया प्रोक्तानि तन्त्राणि नानाविधियुतानि वै ।
त्रिपुरायाः महादेव्या अपि तन्त्राण्यनेकशः ॥ २ ॥
तत्र प्रोक्तं त्वया नाथ तन्त्रं तु त्रिपुरार्णवम् ।
अत्यद्भुततरं चेति तन्ममाचक्ष्व वल्लभ ॥ ३ ॥

ईश्वर उवाच

शृणु देवि प्रवक्ष्यामि तन्त्रं तु त्रिपुरार्णवम् ।
पुरा सदाशिव(-)प्रोक्तं भैरवाय महात्मने ॥ ४ ॥
कालपर्यायतो देवि तन्त्राणि त्रैपुराणि तु ।
यदोच्छिन्नानि देवेशि तदा श्रीभैरवेण तु ॥ ५ ॥
पृष्टः सदाशिवः प्राह त्रिपुरार्णवसंज्ञितम् ।
त्रिपुराविधिरत्नानामर्णवोऽयं महेश्वरि ॥ ६ ॥
ग्रन्थतो लक्षगुणितं नानाविधिसमन्वितम् ।
नित्यं नैमित्तिकं काम्यं बहुधा यत्र संस्थितम् ॥ ७ ॥
विस्तरेणापि संक्षेपात् यत्र सर्वं स्फुटं स्थितम् ।
उपासनानि कर्माणि यत्र नानाविधानि वै ॥ ८ ॥
विज्ञानं च महाश्रेष्ठं शाक्तं नानोपपत्तिकम् ।
तस्यातिविस्तृतत्वात्तु नेदानीं प्रब्रवीमि ते ॥ ९ ॥
त्रैपुरेषु विधानेषु यद्यत्त्वं श्रोतुमिच्छसि ।
क्रमेण पृष्टस्तत्सर्वं संक्षेपात् कथयामि ते ॥ १० ॥

देव्युवाच

त्रिपुराया महेशान दीक्षाविधिमनुत्तमम् ।
वद सारं समादाय त्रिपुरार्णवतो मम ॥ ११ ॥

ईश्वर उवाच

शृणु देवि प्रवक्ष्यामि त्रिपुरादीक्षणे विधिम्।
बहुप्रकारं तद्देवि दृष्टं श्रीत्रिपुरार्णवे ॥ १२ ॥
तस्मात्सारं समादाय संक्षेपात् प्रब्रवीमि ते ।
समीहन् पुरुषार्थं वै जनो दीक्षां समाश्रयेत् ॥ १३ ॥
दीक्षैव मुक्तिसौधस्य सोपानं सुलभं प्रिये ।
सौधारोहो यथा नास्ति सोपानारोहणं विना॥ १४ ॥
तथा दीक्षां विना मोक्षो दुर्लभः शिवशासने।
सांख्ये योगे पाञ्चरात्रे वैदिकेऽपि न सर्वतः॥ १५ ॥
मुक्तिः कुतश्चिदेवेह पूर्णामुक्तिरनाकुला ।
दीक्षां विना न शाक्तं हि ज्ञानं मुक्तिस्ततः कुतः ॥ १६ ॥
तदिच्छन् स्वात्ममुक्तिं दीक्षामेवाश्रयेद् गुरोः ।
गुरुर्गरीयान् विज्ञानी तन्त्रमार्गैकतत्परः॥ १७ ॥
स्वांशान्त(न्न)रान्सुम(न्समु)द्धर्तुं शिव एव गुरुः स्वयम् ।
गुरुः सुलक्षणः शान्तः कामतर्षादिवर्जितः ॥ १८ ॥
ज्ञात्वात्मानं परं यो वै पूर्णाहन्तां समास्थितः।
सर्वलक्षणहीनोऽपि स गुरुः सर्वतोऽधिकः ॥ १९ ॥
श्रेष्ठो वर्णवयोज्ञानैर्गुरुमेवं परीक्षयेत् ।
स्त्रीभ्यः सर्वोत्तमा दीक्षा तत्र मातुः शतोत्तरा ॥ २० ॥
वयसाऽपि कनीयस्यो नमस्कार्या[:]स्त्रियः सदा ।
योषिदल्पवयस्काऽपि गुरुत्वार्हा वरानने ॥ २१ ॥
परिचर्य प्रोक्तगुरुं धनाद्यैस्तोष्य सर्वथा ।
दीक्षामासादयेदुक्ते शुभे काले स्थले तथा ॥ २२ ॥
स्नातः सुगन्धितैलाद्यैर्मान्यैरिष्टैश्च संवृतः ।
दीक्षादीनात्तु पूर्वेऽह्नि कृतनित्यक्रियः शुभः ॥ २३ ॥

कुलदेवं गुरुं (रून्) ज्येष्ठान् नमस्कृत्य यथावधिः ।
देशकालोल्लेखपूर्वं संकल्प्य तु यथाविधिः ॥ २४ ॥
पूजयित्वा विघ्नहरं पुण्याहं वाचयेत् ततः ।
श्राद्धमाभ्युदयं कुर्यात् तद्विधानं शृणु प्रिये ॥ २५ ॥
स्वशाखोक्तं तान्त्रिकं वा कुर्यात्तत्र वरानने ।
प्रस्थतण्डुलकं न्यस्य पात्रे वै स्वस्तिकं लिखेत् ॥ २६ ॥
तत्रोक्तवत्तु कलशं विंन्यसेत् प्रणवं जपन् ।
हृन्मन्त्रेणापूर्य जलैः पञ्चरत्नानि निक्षिपेत् ॥ २७ ॥
पल्लवैर्मुखमाच्छाद्य पूर्णपात्रं निधाय च ।
तण्डुलेन समापूर्ण वरुणं तत्र पूजयेत् ॥ २८ ॥
आवाह्य विधिवत् पश्चादापोहिष्ठात्रयेण च ।
हिरण्यवर्णा इत्याद्यैश्चतुर्भिरनुवाकतः ॥ २९ ॥
पवमानेति वै जप्त्वा चामृतेश्यादिपञ्चकम् ।
अमृतं निर्विषं कृत्वा तत्तन्मुद्रां प्रदर्शयन् ॥ ३० ॥
आदाय किञ्चित् तोयममृतेश्यै समर्पयेत् ।
नामतः प्रीयतां चोक्त्वा चतुरो ब्राह्मणान् यजेत् ॥३१॥
पुण्याहमस्विति प्रार्थ्य नत्वा तोयेशमुत्सृजेत् ।
तत्तोयेनाखिलं प्रोक्ष्य गायत्रीमष्टधा जपेत् ॥ ३२ ॥
ततस्तु विप्रत्रितयभोजनान्यूनसम्मितम् ।
हिरण्यमुत्सृजेद् नादी(न्दी)मुखानां प्रीतये शिवे ॥३३॥
इति स्वस्ति वाच्य नान्दीश्राद्धं कृत्वा यथाविधि ।
आचार्यादीनासनाद्यैः सम्पूज्य वृणुयात् ततः ॥ ३४ ॥
आचार्यमथब्रह्माणं सदस्यमपि वै क्रमात् ।
दक्षिणावस्त्रभूषादि समादायाग्रतः स्थितः ॥ ३५ ॥
प्रोक्त्वा तु वरणं दत्त्वा प्रणमेदेवमन्यतः ।
मण्डपं पूजयित्वाथ प्रविशेद् ब्राह्मणैः सह ॥ ३६ ॥
आचार्यो वास्तुपुरुषं क्षेत्रपालं च पूजयेत् ।
तत्र त्रिमेखलायुक्तवेद्यां श्रीयन्त्रमालिखेत् ॥ ३७ ॥

सिन्दूररजसा देवि मण्डयेत् सुविधानतः ।
वितानकदलीस्तम्भतोरणादर्शकादिभिः ॥ ३८ ॥
दीपान् प्रज्ज्वाल्य परितो धूपयेच्च सुधूपकैः ।
सिद्धार्थांस्तत्र सङ्कीर्य सप्तास्त्रपठितांस्ततः ॥ ३९ ॥
समूह्य तानीशकोणे यजेत् तत्रास्त्रदेवताम् ।
शालयोऽथ यवास्तद्वद्गोधूमा माषकास्तिलाः ॥ ४० ॥
उक्तानि पञ्च धान्यानि पृथक् प्रस्थमितानि वै ।
क्रमाद्यन्त्रोपरि न्यस्य कलशं तत्र वै न्यसेत् ॥ ४१ ॥
कलशो द्रोण[1]जलयुक् तदर्धः पाद एव वा ।
त्रितन्तुवेष्टितः सम्यग् धूपितोऽथाप्यलङ्कृतः ॥ ४२ ॥
कूर्चाधारे धान्यराशौ स्थापयेत् मूलमन्त्रतः ।
पञ्चरत्नान्तरो वस्त्रयुगच्छन्नो मनोहरः ॥ ४३ ॥
ताम्रजो वा मृण्मयो वा तं क्वाथैस्तीर्थतोयजैः ।
वर्णौषधिभवैः शुद्धैः पूरयेन्मातृकां पठन् ॥ ४४ ॥
न्यसेन्मुखे पल्लवानि पञ्च दूर्वाङ्कुराणि च ।
पूर्णपात्रं मुखे दत्त्वा फलयुक्तं सुवर्णजाम् ॥ ४५ ॥
प्रतिमां मूर्त्यनुगुणां न्यसेद् गन्धाद्यलङ्कृताम् ।
तत्र देवीं समावाह्य पूजयेदुपचारकैः ॥ ४६ ॥
स्पृशन्नष्टोत्तरशतं प्रजपेन्मूलविद्यया ।
अङ्गविद्या अपि सकृत् ततः श्रीचक्रराजकम् ॥ ४७ ॥
पूजयेद् विधिना देवि आरत्यन्तं निवर्तयेत् ।
ततो होमं शिवे कुर्यात् तद्विधानं शृणु प्रिये ॥ ४८ ॥
कुण्डं वा स्थण्डिलं वापि कुर्याच्छास्त्रोक्तवर्त्मना ।
प्रोक्ष्य मूलेन गन्धाद्यैरलङ्कृत्य च पूजयेत् ॥ ४९ ॥
तिस्रो रेखास्तु पूर्वान्ता दक्षिणात् पश्चिमा[2]दथ ।
उत्तरान्ताः कुशाद्यैस्तु कृत्वा तन्मध्यतो न्यसेत् ॥ ५० ॥

1. इतः परम्-'समाः सर्वे मध्यमो वा प्रोक्तमानेन संयुतः'-क. । २. मात्तथा-क. ।
2. द्रोणप्रमाणमुक्तं रहस्यार्णवे–'गुञ्जाभिरष्टभिर्माषः कर्षस्तु दशमाषकः । पलं कुडवकं प्रस्थाढक द्रोण एव च ॥ चतुर्गुणोत्तरा ज्ञेयाः पलाद् द्रोणावधि क्रमात्' इति । श्री विद्यार्णवेऽपि त्रयोदशपटले पूर्णाभिषेकप्रसङ्गे स्कन्दपुराण–वचनाद-प्युपलभ्यते, यथा–'पलद्वयं तु प्रसृतं कुडवं द्विगुणं मतम्। चतुर्भिः कुडवैः प्रस्थ-

मूलेन प्रोक्षितं त्यक्त्वा चाग्निं मूलेन निक्षिपेत् ।
एतावदेव नित्यादौ विशेषस्त्वथ प्रोच्यते ॥ ५१ ॥
रेखासु विष्णुमीशं च तथेन्द्रं विधिमेव च ।
यमं सोमं प्रपूज्याथ प्रोक्ष्य मूलकुशोदकैः ॥ ५२ ॥
धेनुं तार्क्ष्यं प्रदर्श्याथ प्रोक्ष्यास्त्रेण कुशोदकैः ।
कुशेन तत्र विलिखेत् त्रिकोणं भूपुरान्तरे ॥ ५३ ॥
पीठपूजां तत्र कृत्वा ध्यायेत् कामेश्वरौ हृदि ।
जपाकुसुमसच्छायमङ्कुशं पाशमेव च ॥ ५४ ॥
पुण्ड्रेक्षुचापं पुष्पास्त्रं दधानं करपङ्कजैः ।
रक्तवस्त्रमाल्यभूषायुतं त्रिनयनोज्ज्वलम् ॥ ५५ ॥
चन्द्रचूडं च कामेशी संश्लिष्टं हृदि भावयेत् ।
आवाह्य तत्र संपूज्य यथा शक्त्युपचारतः ॥ ५६ ॥
दधात् कामेश्वरीकामेश्वराभ्यां नमसाञ्जलिम् ।
कामबीजादियोगेन प्राणानायम्य तेन च ॥ ५७ ॥
विन्यसेन्मूलविद्याया कामेशीं कामुकां स्मरेत् ।
सम्पूज्य स्थापयेदग्निं तद्विधिं शृणु वच्मि ते ॥ ५८ ॥
अरण्याद्युद्भवं वह्निमादायास्त्रेण शङ्करि ।
त्यजेन्निर्ऋतिभागे तु क्रव्यादांशं फडुच्चरन् ॥ ५९ ॥
एकमङ्गारकं पश्चात् समानेन पिधाय च ।
धेनुं प्रदर्श्य मूलेन सप्तधा त्वभिमन्त्रयेत् ॥ ६० ॥
विवृत्य भ्रामयेत् त्रिर्वै तस्योपर्योमितीरयन् ।
ध्यायन् कामेशवीर्यं तु तस्या योनौ निधापयेत् ॥ ६१ ॥
त(द)द्यादाचमनं ताभ्यां जठराग्निं नियोजयेत् ।
आवाहनक्रमेणैव आंसोहंविद्यया सह ॥ ६२ ॥
वह्नि चैतन्याय नम इत्येवमभिमन्त्रणात् ।
चैतन्यमग्नेः संयोज्य निक्षिपेदिन्धनादिकम् ॥ ६३ ॥

माढकं तैश्चतुर्गुणैः ॥ चतुर्गुणो भवेद्रोणः कुम्भस्तद् द्वयतः स्मृतः । कुम्भैस्तै-रष्टभिः खारी....॥

कामबीजाद्वह्निमूर्तये नमः प्रपठन् शिवे ।
प्रज्वालयेत् चित्तमलं जपेत् तं समुपस्थितः ॥ ६४ ॥
अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम् ।
सुवर्णवर्णममलं समिद्धं विश्वतोमुखम् ॥ ६५ ॥
उपस्थायेति मन्त्रेण प्रणम्योपविशेत्ततः ।
आग्नेयमनुना प्राणायामं कृत्वा ततः परम् ॥ ६६ ॥
ऋष्यादि विन्यसेत् तस्य ध्यायेत्तं तु समाहितः ।
पद्मस्थं च वराभीतिपद्मशक्तिधरं शुचिम् ॥६७ ॥
त्रिणेत्रमरुणं श्वेतवसनं हृदि संस्मरेत् ।
[1]चित्पिङ्गलेति विलिखेत् द्विर्हन दह वै पच ॥ ६८ ॥
सर्वज्ञा ज्ञापयोक्त्वा च स्वाहा तारचतुर्मुखः ।
वै[2]श्वानरान्ते जातोक्त्वा वेदोक्त्वा च इहा वह ॥ ६९ ॥
लोहिताक्ष सव(र्व)कर्मा विलिख्य च णि साधय ।
स्वाहाऽयं मन्त्र आग्नेयो भृगस्तु ऋषिरीरितः ॥ ७० ॥
गायत्रीछन्द उद्दिष्टं रां रीमित्यादि विन्यसेत् ।
पात्राण्यासादयेद् गौरि अग्नेरुत्तरभागतः ॥ ७१ ॥
पश्चात् प्रागन्तकं तत्र कुशेषु स्रुक्स्रुवौ तथा ।
आज्यपात्रं प्रणीतां च प्रोक्षणीं चरु भाण्डकम् ॥ ७२ ॥
होमद्रव्याणि परिधान् दुर्वादिप्रमुखान्यपि ।
स्रुगादिपात्रमुत्तानं प्रोक्षयेत्तु प्रणीतिकाम् ॥ ७३ ॥
कुशेषु न्यस्य पुरतस्तोयमापूर्य तत्र तु ।
उत्तराग्रपवित्रेण त्रिरुत्पूय ततः पुरः ॥ ७४ ॥
निक्षिप्योदकबिन्दुं च घृतबिन्दु च वल्लभे ।
आनासिकं तदुद्धृत्य स्थापयेदुत्तरांशतः ॥ ७५ ॥

---

1. अस्य मन्त्रस्य स्वरूपम्–ॐ चित्पिङ्गल हन हन दह दह पच पच सर्वज्ञाज्ञापय स्वाहा ।
2. ॐ रं वैश्वानर जातवेद इहा वह लोहिताक्ष सर्वकर्माणि साधय स्वाहा' इति मन्त्रः ।

कुशोत्तराधरं कृत्वा संरक्षेदासमाप्तितः ।
पवित्रान्तरसंयु[1]क्ते प्रोक्षण्याः पूर्ववद्विधिः ॥ ७६ ॥
पुरतः स्थापनादीनि प्रोक्षण्युत्पवनान्ततः ।
दत्त्वा प्रणीता तोयं च तेनाभ्युक्षेत् सुसाधनम् ॥ ७७ ॥
पूर्वतस्तु प्रणीताया निषाद्य परिषेचयेत् ।
परिस्तीर्य परिधिकां न्यस्य मूर्तित्रयं क्रमात् ॥ ७८ ॥
यष्ट्वा तेष्वथ ब्रह्माणं होमार्थे वृणुयाद् द्विजम् ।
पवित्रान्तरयुक्ते तत्पात्रे सम्पूर्य वै घृतम् ॥ ७९ ॥
धेनुं तार्क्ष्यं प्रदर्श्याथ मूलं तु नवधा जपेत् ।
अग्निसूर्यसोमकलाः प्रजपेत् तत्र शङ्करि ॥ ८० ॥
अङ्गारेऽधिश्रयेद् दर्भौ ज्वलितौ तत्र निक्षिपेत् ।
परितोऽन्यैर्ज्वलद्भिश्च कृत्वा भूयः प्रदर्शयेत् ॥ ८१ ॥
अखिलान् प्रक्षिपेदग्नावुत्तार्याज्यमुदग्दिशि ।
अङ्गारान्निक्षिपेदग्नौ जलं स्पृष्ट्वा पुरो न्यसेत् ॥ ८२ ॥
उत्पूयाज्यं स्रुक्स्रुवयोस्तप्त्वा सम्मार्जयेत् कुशैः ।
सम्प्रोक्ष्य सन्ताप्य पुनरग्नौ तान् सोदकान् क्षिपेत् ॥ ८३ ॥
प्रजप्य बालां तत्कण्ठे नमसा सूत्रवेष्टनम् ।
भुवनां प्रासादकं च न्यस्य सम्पूजयेत्ततः ॥ ८४ ॥
पीठमभ्यर्चयेदग्नौ नवशक्तिसमावृतम् ।
पीता श्वेतारुणा कृष्णा धूम्रा तीव्रा स्फुलिङ्गिनी ॥ ८५ ॥
रुचिर्ज्वालिनीति रं वै सर्वतत्त्वक वै मला ।
सनाय नमसोपेतमिति सर्वं समर्चयेत् ॥ ८६ ॥
प्राग् ध्यातं तु समावाह्य वह्निं सम्पूज्य शक्तितः ।
आज्यं त्रिधा विभक्तव्यं कुशाभ्यां च ततो हुनेत् ॥ ८७ ॥
नाडीरूपं विचिन्त्याथाज्यं त्रिधा भावितं पुरा ।
दक्षाद् वामान्मध्यभागात् स्रुवेणादाय वै क्रमात् ॥ ८८ ॥
व्याहृत्या तु त्रिधा हुत्वा नेत्रेष्वग्निं च सोमकम् ।
तौ च हुत्वा स्विष्टकृतं जुहुयात् परमेश्वरि ॥ ८९ ॥

---

1. युक्तप्रो-क.।

हुत्वैवं नेत्रवक्त्राणामुद्घाटं तु विभावयेत् ।
व्याहृत्याऽपि चतुर्धा वै त्रिधाग्निं च क्रमाद्धुनेत् ॥ ९० ॥
एतावद्धोमशेषं तु प्रोक्षण्यां पातयेदनु ।
संस्कारार्थं हुनेत् पश्चाद् गर्भाधानादितः क्रमात् ॥ ९१ ॥
गर्भाधानं पुंसवनं सीमन्तं जातकर्म च ।
नालच्छिदिर्नामकृतिर्निष्क्रमं प्राशनं ततः ॥ ९२ ॥
चौलं चोपनयस्तद्वत् त्रिव्रतं च समावृतिः ।
विवाहं तु त्रिधा होम एतत्संपत्तये शिवे ॥ ९३ ॥
ततोऽग्नये सप्तधा तु जुहुयाद्रसनेन्द्रिये ।
हिरण्या कनका रक्ता कृष्णवर्णा स्वयम्प्रभा ॥ ९४ ॥
अतिरक्ता बहुरूपा बीजाद्येन हुनेत्क्रमात् ।
यरौ ऋतुस्वरगतौ सबिन्दू सप्तधास्थितौ ॥ ९५ ॥
यादिसान्तं विलोमेन तेषामादौ निधापयेत् ।
कामाग्निरिति कर्तव्यं नाम तस्य महेश्वरि ॥ ९६ ॥
ततस्ताभ्यां घृताक्तं तु समिधां पञ्चकं हुनेत् ।
यथा विभवतोऽभ्यर्च्य विसृजेत् तदनन्तरम् ॥ ९७ ॥
अग्निमन्त्रेणाष्टधा तु जुहुयाद् गणपं ततः ।
मनुवारं तु जुहुयात् तत्प्रकारं ब्रवीमि ते ॥ ९८ ॥
आरम्भादेकवर्णेन द्वाभ्यां च त्रिभिरेव च ।
चतुर्भिः पञ्चभिः षड्भिरेकादशकषोडशैः ॥ ९९ ॥
एकविंशतिभिः सर्वैः पञ्चधेति क्रमाद्धुनेत् ।
अग्निमेव तु संसाध्य श्रपयेदथ वै चरुम् ॥ १०० ॥
गोक्षीरे तु पचेत् सम्यक् तण्डुलं मूलमन्त्रितम् ।
स्थालीमस्त्रेण प्रक्षाल्य निक्षिपेत् तण्डुलं ततः ॥ १०१ ॥
हुमित्याच्छाद्य मूलेन प्रेक्षयेन्न तु चालयेत् ।
अत्यन्ता शिथिला शुष्कं श्रपयेच्चरुमद्रिजे ॥ १०२ ॥
अभिघार्य घृतेनैतत् कुशेषु विनिधापयेत् ।
अग्नौ तु देवतापीठं सम्पूज्यावाहयेत् पराम् ॥ १०३ ॥

पूजयेत् तु यथाशक्त्या सावृतिं तर्पयेत् तथा ।
अष्टोत्तरशताकृत्या तर्पयेन्मूलदेवताम् ॥ १०४ ॥
अग्नये मूलदेव्यै च शतधा हावयेत् पृथक् ।
अग्निदेवतयोस्तेन वक्त्रैक्यं भावयेदुमे ॥ १०५ ॥
नाडीनामेकतासिद्ध्यै हावयेच्छतधा पुनः ।
नित्यादिसमयान्तानामावृतीनां तु हावयेत् ॥ १०६ ॥
चरुणा मूलदेव्यै च हावयेदष्टधा ततः ।
दूर्वादिकं तु जुहुयाद् घृताक्तं मूलविद्यया ॥ १०७ ॥
दूर्वा च वटपत्रं च गुडची हेमदुग्धकम् ।
सोमवल्लीं तु प्रत्येकमष्टोत्तरसहस्रकम् ॥ १०८ ॥
शतमष्टोत्तरं वापि मूलेन तु पृथक् पृथक् ।
मृद्भिः संस्नापयेच्छिष्यं मूलाष्टावृत्तिमन्त्रितैः ॥ १०९ ॥
रक्षाबन्धनकं कृत्वा पञ्चगव्येन प्राशयेत् ।
संविदं चापि सम्प्राश्य हुतशेषाज्यमञ्जयेत् ॥ ११० ॥
व्याहृतीस्तु ततो हुत्वा समर्पणहुतिं हुनेत् ।
हुनेत् स्विष्टं कृतं चैव ततः पूर्णाहुतिं त्रिधा ॥ १११ ॥
स्विष्टकृच्चरुणा पूर्णाहुतिः पुष्पफलाज्यकैः ।
द्विधावदानमन्यत्र घृतपूर्वोत्तरं तथा ॥ ११२ ॥
सकृदत्रावदानं स्यादभिघारो द्विधा स्मृतः ।
उद्वास्य देवतामग्नेः परिधीश्च परिस्तरम् ॥ ११३ ॥
अग्नौ विनिक्षिपेत् पश्चात् परिषेकं ततश्चरेत् ।
प्रणीतापात्रमादाय संस्थाप्य पुरतः पुनः ॥ ११४ ॥
जलं किञ्चिद् विनिक्षिप्य सम्प्रोक्ष्य प्रजपेत् त्रिधा ।
तच्चतुर्दिक्षु तत्तोयं विनिक्षिप्य ततः शिवे ॥ ११५ ॥
प्राग्विनिक्षिप्ततोयेन सशिष्यं प्रोक्षयेत् स्वयम् ।
उद्वासयेत्तु ब्रह्माणं यष्ट्वा वासोविभूषणैः ॥ ११६ ॥
समाप्य होमं पश्चात् तु पूजयेन्मण्डलं ततः ।
पाशच्छेदं ततः कुर्यादुपवेश्य स्वदि(द)क्षिणे ॥ ११७ ॥

उत्तराभिमुखत्वेन विशेषार्घ्यस्थबिन्दुभिः ।
पात्रत्रयेण क्रमतः समन्त्रं कारयेद्धुतिम् ॥ ११८ ॥
आत्मपाशं तथा विद्यापाशं कर्माख्यपाशकम् ।
स्वाहान्तेन त्रिधैवं तु नान्यत् किञ्चित्समाचरेत् ॥ ११९ ॥
तर्पणं पूजनं शेषग्रहणं न च विद्यते ।
न किञ्चिद् भक्षयेदत्र नश्येत् तस्याधिवासनम् ॥ १२० ॥
भोजयेद्धुतशेषेण शिष्यं देवि ततः परम् ।
क्षीरवृक्षोद्भवं काष्ठं नमसा मन्त्रितं तु यत् ॥ १२१ ॥
दन्तान् विशोधयेत् तेन कृत्वा गण्डूषणं ततः ।
आचम्य वषडा बद्ध्वा शिखामधिवसेत् ततः ॥ १२२ ॥
ध्यायन् देवीं स्वहृदये कृतकृत्यौ(त्योऽ)परेऽहनि ।
अष्टात्रिंशत्कलान्यासं श्रीचक्रन्यासमेव च ॥ १२३ ॥
रश्मिन्यासं तथा षोढान्यासं वाग्देवताभिधम् ।
नित्यन्यासानपि तथा कुर्याच्छिष्यकलेवरे ॥ १२४ ॥
समर्च्य चक्रराजं तु कलशस्थां च देवताम् ।
सहु(ह)स्रं साधिते वह्नौ तिलैः श्वेतैस्तु हावयेत् ॥ १२५ ॥
सुवासिनीमुखानिष्ट्वा वाद्यगीतादिभिः सह ।
पीठे त्वलङ्कृते शिष्यमुपवेश्येशदिङ्मुखम् ॥ १२६ ॥
पल्लवान्मूर्ध्नि निक्षिप्य मूलमावर्तयन्गुरुः ।
अभिषिञ्चेत्समुद्धृत्य कलशं सुविधानतः ॥ १२७ ॥
अङ्गमन्त्राण्युपदिशेद् देवतासविधे स्थितः ।
प्राङ्मुखायोपविष्टाय स्वयं सोमदिशामुखः ॥ १२८ ॥
रक्तकौशेयखण्डेन बद्ध्वा नेत्रं ततो गुरुः ।
षोडशीमादिशेत् तस्मै मुद्राः संक्षोभिणीमुखाः ॥ १२९ ॥
शङ्खाद्या अपि तत्पश्चाद् धर्मान्समयसम्भवान् ।
उपदिश्याथ शिष्येण भक्त्या शक्त्या प्रपूजितः ॥ १३० ॥
ब्रह्माद्यान् विसृजेन्सर्वान् दक्षिणाद्यैः सुसत्कृतान् ।
गुरवे स्वं च सर्वस्वं निवेद्याराधयेच्छिवे ॥ १३१ ॥

एवं दीक्षां पञ्चदश्याः षोडश्या वाऽपि शैलजे ।
सम्प्राप्य देवताभक्त्या सर्वथोपास्तितत्परम् ॥ १३२ ॥
चिरसेवासुप्रसन्नो गुरुः शिष्यं परीक्ष्य च ।
अचुम्बकमसन्दिग्धमनास्तिकमकौटिलम् ॥ १३३ ॥
सर्वलक्षणसम्पन्नमनन्यशरणं ह्युमे ।
पूर्णाभिषेकयोगेन योजयेत् तदनन्तरम् ॥ १३४ ॥
तत्रोपास्तिः पूर्णतां वै समेति प्राणवल्लभे ।
महाश्रीषोडशी यत्र श्रीमहापादुकापि च ॥ १३५ ॥
ऊर्ध्वाम्नायोऽनुत्तरश्च प्राप्यते साधकेन वै ।
ज्ञानं शाक्तं दिव्यमपि चोपास्तिर्देहसंश्रया ॥ १३६ ॥
अन्तराराधनाख्याना पादुकाप्यात्मनस्तथा ।
स वै पूर्णाभिषेकाख्यो न तस्यो(स्या)न्यो गुरुर्भवेत् ॥
सम्पूर्णाधिकृतिस्तस्य नान्येषां तु कदाचन ॥ १३७ ॥
अन्यत्रत्या हि या दीक्षा सा क्षुद्रा सुलभा तथा ।
पूर्णाभिषेकंरूपा तु महती बहुदुर्लभा ॥ १३८ ॥
तस्मात् सर्वप्रयत्नेन कुर्यात् पूर्णाभिषेचनम् ।
स्वात्मनः श्रीगुरोर्देवि तेनैव कृतकृत्यता ॥ १३९ ॥
पूर्वोक्तवच्छुभे देशे काले च समुपक्रमेत् ।
तत्रादौ श्रीगुरुं देवं प्रार्थयेद् दण्डवन्नतः ॥ १४० ॥
भो स्वामिन् गुरुनाथार्य मामार्तं शरणागतम् ।
ससांरसागरात् तीर्णं कृपया कुरु मां गुरो ॥ १४१ ॥
प्रार्थ्यैवमाज्ञया तस्य सङ्कल्पादिकमाचरेत् ।
आचार्यो वेदिकामध्ये सर्वतो भद्रमण्डलम् ॥ १४२ ॥
आगमोक्तेन विधिना रचयेच्छुभदर्शनम् ।
प्रागादिधान्यपुञ्जेषु कलशान् पञ्च विन्यसेत् ॥ १४३ ॥
[1]समाः सर्वे मध्यमो त्रा(वा) प्रोक्तमानेन संयुतः ।
पूर्वाद्युत्तरकुम्भान्तमाम्नायाद्याः प्रपूजयेत् ॥ १४४ ॥

---

1. इतः पूर्वं 'कलशो द्रोणजलयुक् तदर्धः पाद एव वा'–क।

ऊर्ध्वाम्नायादिकामध्ये षोडशीं कलशे यजेत् ।
साङ्गाश्च समयास्तत्र यष्ट्वा प्रत्येकमद्रिजे ॥ १४५ ॥
समष्ट्या वापि सम्पूज्य प्रत्येकं कलशेषु वै ।
पूर्ववन्मुख्यविद्याश्चाङ्गविद्याः प्रजपेत् पृथक् ॥ १४६ ॥
सर्वा आम्नायविद्याश्च प्रजप्य तु सकृत्सकृत् ।
चक्रराजं ततोऽभ्यर्च्य महद्भिरुपचारकैः ॥ १४७ ॥
कलशान्तरदेव्यश्च मुख्यदेव्यास्तु सम्मुखाः ।
मुख्यां तु मध्यमे कुम्भे षोडशीं विद्धि पार्वति ॥ १४८ ॥
प्राग्वत् सङ्कल्प्य होमं तु कृत्वा नेत्राञ्जनावधि ।
तन्मूर्ध्नि श्रीचक्रराजं ध्यायेन्निश्चलमानसः ॥ १४९ ॥
तत्र सावरणां देवीं यजेन्मानसवर्त्मना ।
तत्तन्मन्त्रोल्लेखपूर्वं ततः स्वात्मानमद्रिजे ॥ १५० ॥
प्रदीपकलिकाकारं प्रविष्टं भावयेद्दृशा ।
तद्बुदिस्थ जीवकलां स्वात्मन्येव निवेशयेत् ॥ १५१ ॥
निवृत्त्यादि पञ्चकलां विन्यसेत् तत्कलेवरे ।
निवृत्तिं पादयोर्नाभौ प्रतिष्ठां हृदि मूर्धनि ॥ १५२ ॥
विद्यां च शान्तिमगजे शान्त्यतीतां विधेर्बिले ।
नाभौ हृदि मुखे तत्त्वत्रयमात्माख्यतत्त्वकम् ॥ १५३ ॥
विद्यातत्त्वं शिवाख्यं च षट्त्रिंशद्भेदभेदितम् ।
भुवनत्रितयं तद्वदधोमध्योर्ध्वसंस्थितम् ॥ १५४ ॥
चतुर्विंशतिसंयुक्तं द्विशतेन सुसम्मितम् ।
वर्णास्तु मातृकान्यासप्रोक्तवद् विन्यसेदुमे ॥ १५५ ॥
सत्क्रिया सदिति पदं त्रिविधं विन्यसेत् तथा ।
एकाशीतिविभेदाख्यं मन्त्रं तद्वत् त्रिधा स्थितम् ॥ १५६ ॥
बीजं पिण्डश्च माला च सप्तकोटिप्रभेदितम् ।
एवं षडध्वान् विन्यस्य पुनर्मन्त्रांस्तु विन्यसेत् ॥ १५७ ॥
तत्तन्मन्त्रोच्चारपूर्वं ललाटे च हिमाद्रिजे ।
भुवनं तत्त्वसंयुक्तं कलायां तु विलापयेत् ॥ १५८ ॥

मन्त्रं पदेन संयुक्तं वर्णे तु प्रविलापयेत् ।
कलां वर्णे तं च शक्तौ तामात्मनि विलापयेत् ॥ १५९ ॥
ततस्तिलैरष्टषष्टिमन्त्रैर्होमं समाचरै(रेत्) ।
अध्वमन्त्रैरष्टधापि प्रतिमन्त्रं हुनेत् तथा ॥१६०॥
विलापितान् प्रागुत्पाद्य हृदि जीवं निवेशयेत् ।
ततः परदिने सर्वं पूर्ववत् तु समाचरेत् ॥ १६१ ॥
अभिषेकात्पूर्वतस्तु कुर्याद् दीक्षास्तु सप्तधा ।
मातृकां परमेशानीं वर्णक्लृप्तशरीरिणीम् ॥ १६२ ॥
ध्यात्वोत्पत्तिं तु वर्णानां शिष्यदेहे निरूपयेत् ।
इयं वर्णमयी दीक्षा कलादीक्षामथो शृणु ॥ १६३ ॥
पादाज्जान्वन्तकं तस्मान्नाभ्यन्तं तत आगलम् ।
ततः फालान्तकं तस्माद् ब्रह्मरन्ध्रान्तकं न्यसेत् ॥१६४॥
निवृत्त्यादिकलाः पश्चाद्विलाप्य प्रथमं क्रमात् ।
शान्त्यतीतामात्मनि च पुनरुत्पादयेत्क्रमात् ॥ १६५ ॥
कूर्चेन विन्यसेत् पश्चाद्विपरीतक्रमेण च ।
कृत्वैवं तु कलादीक्षां दक्षिणे करमध्यतः ॥ १६६ ॥
ध्यात्वा गुरुं मातृकाङ्गमूलविद्यां जपन् ततः ।
मूर्ध्नि स्पृशेत्स्पर्शदीक्षा वाग्दीक्षा प्रोच्यतेऽधुना ॥ १६७ ॥
मन्त्रान् शिवात्मकान् ध्यात्वा ध्यायन् स्वं च शिवात्मकम् ।
मन्त्रानुपदिशामीति वदेदेषा तु वाङ्मयी ॥ १६८ ॥
मन्त्रात्मिकां परां ध्यायन्निर्विकल्पः क्षणं स्थितः ।
पश्येत् प्रसन्नया दृष्ट्या दृग्दीक्षेयं समीरिताः ॥ १६९ ॥
वेधदीक्षामथो वक्ष्ये भावनैकशरीरिणीम् ।
प्रविशेन्नेत्रमार्गेण शिष्यदेहान्तरं गुरुः ॥ १७० ॥
कुण्डलिन्या षडाधारस्थितयोगिनिमुख्यकैः ।
गणेशादौ योजनेन नयेदूर्ध्वं सुषुम्णया ॥ १७१ ॥
क्रमेण ब्रह्मरन्ध्रस्थपूर्णपीयूषवर्षिणि ।
गुरौ संयोज्य किञ्चित्तु विश्रम्योन्मनभावकः ॥ १७२ ॥

सुधावर्षैः सञ्जाप्लाव्य पुनरुत्पादयेत् क्रमात् ।
देवतौघमयं शिष्यं ध्यायेन्निश्चलमानसः ॥ १७३ ॥
इत्याख्याता वेधदीक्षा मन्त्रदीक्षा ततो भवेत् ।
क्रमात् पूर्वादिकलशैरभिषिच्योक्तवर्त्मना ॥ १७४ ॥
पूर्वाद्याम्नायषट्कं च क्रमादुपदिशेदुमे ।
दृष्टिबन्धं विधायैव पादुकामुपदेशयेत् ॥ १७५ ॥
अनुत्तराम्नायशेषमुपदिश्य हिमाद्रिजे ।
पुनर्दृष्टिं बन्धयित्वा श्रीमहाषोडशीं पराम् ॥ १७६ ॥
प्रकाश्य पश्चान्मुद्राश्च विदिशेदखिला अपि ।
संक्षोभिणीं विद्राविणीमाकर्षिणीं वशङ्करीम् ॥ १७७ ॥
उन्मादिनीमङ्कुशां च खेचरीं बीजयोनिके ।
पाशाङ्कुशे चापबाणौ पूजामुद्रास्त्रयोदश ॥ १७८ ॥
जपमुद्रा जपादौ तु सुन्दरीतुष्टिदायिकाः ।
शङ्खं चक्रं गदां खड्गं पद्मं योनिं त्रिशूलकम् ॥ १७९ ॥
तार्क्ष्यं धेनुं च डमरुं शार्ङ्गं नाराचकौस्तुभौ ।
श्रीवत्सं मुसलं चेति पञ्चदश्याः प्रदर्शयेत् ॥ १८० ॥
त्रिखण्डया युताश्चेमाः षोडश्यास्तु प्रदर्शयेत् ।
ततो ज्येष्ठक्रमात्सर्वान् प्रणमेद् भक्तिभावतः ॥ १८१ ॥
मत्वा कृतार्थमात्मानं गुर्वादीन् पूजयेदथ ।
शिष्यस्य तत्त्वशुद्धिं वै कारयेत्तदनन्तरम् ॥ १८२ ॥
हृत्तर्पणान्ते शिष्येण स्पर्शयेत् तस्य चाङ्गकम् ।
तन्मातृकावर्णमुखं नाम कर्तव्यमद्रिजे ॥ १८३ ॥
आनन्दनाथशब्दान्तं पुंसामम्बान्तिमं स्त्रियः ।
द्व्यक्षरादि विशिष्टार्थं तेन नाम्ना युतेन तु ॥ १८४ ॥
आत्मनः पादुकायास्तु मन्त्रेणाधारमण्डले ।
शक्तिशेषा हि पूर्वं तु शोधयेत् तत्त्वपञ्चकम् ॥ १८५ ॥
प्रयच्छेन्नवरत्नैस्तु पूर्णपात्रं गुरूत्तमे ।
सर्वान् सन्तोषयेन्मानपूजावस्त्रधनादिभिः ।
एवं पूर्णाभिषेकस्तु कथितो हिमशैलजे ॥ १८६ ॥

देव्युवाच

महेश कैलासपते श्रुता दीक्षा त्वयेरिता ।
अनेकमन्त्राङ्गयुता विद्वदेकसमाश्रया ॥ १८७ ॥
अतिश्रद्धावतां देव मूढानां नित्यरोगिण[ा]म् ।
प्रोक्ता दीक्षातिगहना कथं स्याद् वद मे विभो ॥१८८॥

ईश्वर उवाच

सम्यक् पृष्टं त्वया देवि दीनवात्सल्यभावतः ।
योग्यस्तवायं प्रश्नो वै नैवं प्रश्नोऽन्यसंश्रयः ॥ १८९ ॥
परोपकृतिशीलायाः प्रश्नरत्नो भवेदयम् ।
शृण्वत्र तेऽभिधास्यामि समाधानं नगोद्भवे ॥ १९० ॥
ये मूढा व्यापृताश्चैव योषितश्चातुरास्तथा ।
तेषां तु योग्यता ज्ञात्वा मुख्यमन्त्रानुदीरयेत् ॥ १९१ ॥
अथवा श्रीगुरोर्नाम तथा श्रीषोडशाक्षरीम् ।
हृल्लेखां षोडशीबीजं द्वयमेकमथापि वा ॥ १९२ ॥
इति योषिन्मूढरोगयुतानां ही(दी)क्षणं भवेत् ।
तेषां यावतिशक्तिः स्यात्तावदेव निरूपयेत् ॥ १९३ ॥
तैर्यावच्छक्यते कर्म कर्त्तुं तावदुदीरयेत् ।
दीक्षाकाले मुख्यमन्त्रानुपदिश्याद्रिकन्यके ॥ १९४ ॥
दीक्षाकालेऽनन्तरं वा शेषमन्त्रानुदीरयेत् ।
एवंविधानां देवेशि गुरुत्वं नैव विद्यते ॥ १९५ ॥
योषित्सु नियमो नास्ति सर्वास्ता गुरुरीरिताः ।
मुख्यमन्त्रमात्रवती या सापि गुरुरुत्तमा ॥ १९६ ॥
मुख्यमन्त्रानुपदिशेदन्यत् पुस्तकमर्पयेत् ।
नैवं पुंसोऽधिकारः स्यात् स्त्रीर्यतः परदेवता ॥ १९७ ॥
एवंविधानां दीक्षायाः करणं प्रोच्यतेऽधुना ।
योषिद्वा शक्तिहीनो वा गुरुर्यदि महेश्वरि ॥ १९८ ॥
उपदेशं विना सर्वमुपाचार्येण कारयेत् ।
यथाशक्त्या गुरुः कुर्यादन्यत् तेन तु कारयेत् ॥ १९९ ॥

अध्वशोधनकं देवि स्पृशन्नाचार्यमीरितम् ।
एवं देवेशि सम्प्रोक्तः पूर्णदीक्षाविधिः शिवे ॥ २०० ॥
आदौ बाला पञ्चदश्योर्दीक्षां प्राप्यतु तत्परम् ।
किञ्चित्कालमुपासित्वा प्रोक्तदीक्षाधिकारिता ॥ २०१ ॥
दीक्षासमर्थ आदौ तु बालां पञ्चदशीमपि ।
मन्त्रग्रहणरीत्या तु गृहीत्वोपास्य वै क्रमात् ॥ २०२ ॥
पूर्णदीक्षा ततो ग्राह्या तद्विधानं शृणु प्रिये ।
प्रार्थितो गुरुराड्(ट्) देवि कलशे यन्त्रकेऽथवा ॥ २०३ ॥
सम्पूज्योपदिशेन्मन्त्रं बालां पञ्चदशीं तथा ।
गुरुत्रयं गणेशश्च बालाङ्गं प्रोच्यते शिवे ॥ २०४ ॥
मन्त्रिणी दण्डिनी नित्यास्तिरस्कृतिरिति क्रमात् ।
अङ्गं सौभाग्यविद्याया उपास्यैवं तु दीक्षयेत् ॥ २०५ ॥
दीक्षाक्रमं विना देवि षोडशीं पादुकामपि ।
मन्त्रग्रहणरीत्या तु गृहीत्वा पापभाग् भवेत् ॥ २०६ ॥
षोडशीं पादुकां चापि मन्त्रग्रहणरीतितः ।
प्रमादादपि शिष्याय दत्त्वा पातित्यमाप्नुयात् ॥ २०७ ॥
पादुकोपासने देवि द्विजानामधिकारिता ।
श्रीमहाषोडशी विद्या तथैव स्यान्नगात्मजे ॥ २०८ ॥
न लभ्यते स्वल्पपुण्यैः श्रीमहाषोडशाक्षरी ।
राज्यं देयं शिरोदेयं न देया षोडशाक्षरी ॥ २०९ ॥
एतामन्यायतो दत्त्वा गुरुघ्नः स्यान्न संशयः ।
इयं न शूद्रे देया स्यादयोग्ये वा कदाचन ॥ २१० ॥
अयोग्ये दानतो यद्वत् तथा शूद्रेऽपि पापभाक् ।
इति तेऽभिहितं सर्वं यन्मां त्वं पृष्टवत्यसि ॥ २११ ॥
दीक्षाभेदविधानं च किं पुनः श्रोतुमिच्छसि ॥

॥ इति श्रीत्रिपुरार्णवे त्रिपुरासारसर्वस्वे दीक्षाविधिः प्रथमस्तरङ्गः ॥

●

अथ द्वितीयस्तरङ्गः

श्रीदेव्युवाच

महादेव प्रियतम दीक्षाविधिरुदाहृतः ।
श्रोतुमिच्छामि चेदानीं दीक्षा प्र[ा]प्तेरनन्तरम् ॥ १ ॥
कर्तव्यं प्रातरारभ्य साधकेन यथोचितम् ।
तन्ममाचक्ष्व भगवान् विस्पष्टं च यथातथम् ॥ २ ॥

श्रीमहादेव उवाच

शृणु पार्वति श्रीदेव्याः साधने सुविधिं ब्रुवे ।
सङ्गृह्य सारसर्वस्वं यत्प्रोक्तं त्रिपुरार्णवे ॥ ३ ॥
साधकस्तु त्यजेन्निद्रामुषःकाले सुपावने ।
स्थिरपद्मासनः शान्तचित्तः श्रीगुरुमामृशेत् ॥ ४ ॥
सुषुम्णोर्ध्व[1] सुधारश्मिकोटिकान्तिसमप्रभम् ।
अधोमुखं गुरुस्थानं सहस्रदलशोभितम्[2] ॥ ५ ॥
तत्रैव द्वादशान्तस्य कमलस्य सुकर्णिके ।
श्रीगुरुं चन्द्रसङ्काशं ध्यात्वा तदनु पार्वति ॥ ६ ॥
सुषुम्णाधो रक्तवर्णं सहस्रदलपङ्कजम् ।
कुलाख्यं कर्णिकासंस्थकुलकुण्डे[3] स्थिता हि सा ॥ ७॥
त्रिपुरा या पराशक्तिः सर्वकारणकारणम् ।
तां संस्मरेत् तटि(डी)त्कोटिप्रभाप्रतिमतेजसम् ॥ ८ ॥
कुण्डलिन्यात्मिकां सार्धमण्डलत्रयशोभिनीम् ।
प्रबोध्य कुम्भकेनाथो षट्चक्राणि विभिद्य च ॥ ९ ॥
प्रविष्टा श्रीपरशिवरूपे गुरुसुधाकरे ।
ध्यात्वा तदुद्गतासारसुधाधाराप्लुतं स्मरन् ॥ १० ॥

---

1. र्ध्वसुधा-क. ।
2. इतः परं 'अकुलं तद्विजानीयात्.....' - ख।
3. कुण्डस्थितं हि–क. ।

आत्मानं संघट्टमुद्रान्यासपूर्वं वराङ्गने ।
केवलं पादुकामन्त्रं मनसैव सकृत् स्मरेत् ॥ ११ ॥
गुरुनामसमायुक्तमन्ते निश्चलमानसः ।
जपपूजातर्पणादौ दीक्षानाम प्रयोजयेत् ॥ १२ ॥
व्यावहारिकमन्यत्र प्रयोगादौ महेश्वरि ।
अ(ा)पादुकानां तत्स्थाने गुरुत्रयजपो भवेत् ॥ १३ ॥
पादुकां तु विमृश्याथ पूजयेन्मनसा गुरुम् ।
गन्धपुष्पधूपदीपनैवेद्यैः क्रमतः शिवे ॥ १४ ॥
पञ्चमुद्राः प्रदर्श्याथ स्तुवीत स्तोत्रमन्त्रकैः ।
स्तम्भनं चतुरस्रं च मत्स्यकूर्मौ च योनिकम् ॥ १५ ॥
ऋज्वङ्गुलं हस्तयुगमूर्ध्वाग्राङ्गुष्ठपार्श्वयुक् ।
आद्येयमेव चाग्राग्रा द्वितीया परिकीर्तिता ॥ १६ ॥
वामपृष्ठे दक्षतलं संयोज्याधोमुखं शिवे ।
ऋज्वङ्गुलयुतं पार्श्वे विरलाङ्गुष्ठयुग्मकम् ॥ १७ ॥
तृतीयेयं पुनश्चेयं तर्जनी च कनिष्ठिका ।
अधोमुखी चतुर्थी स्यान्मध्यमाग्रे तु योजयेत् ॥ १८ ॥
तत्पृष्ठेऽनामिकायुग्मं वामोर्ध्वं व्यत्ययीकृतम् ।
तर्जनीभ्यां धृताग्रं च कनिष्ठे मध्यमोदरे ॥ १९ ॥
संयुक्तेऽङ्गुष्ठयोरग्रयुते स्यात्पञ्चमी त्वियम् ।
एवं मुद्राः प्रदर्श्याथ गुरुस्तोत्रं समीरयेत् ॥ २० ॥
तद्वदामि शृणु गिरितनुजे निश्चलान्तरा ।
श्रीनाथस्तोत्रमेतत्तु सर्वस्मादुत्तमोत्तमम् ॥ २१ ॥
ब्रह्मरन्ध्रे स्थितं पद्मं सहस्रश्वेतपत्रकम् ।
अधोमुखं चन्द्रकोटिप्रतीकाशं भजाम्यहम् ॥ २२ ॥
तदन्तर्द्वादशान्ताख्यं पद्मं श्वेताष्टपत्रकम् ।
तत्कर्णिकायां संक्लृप्तं भजे मातृत्रिकोणकम् ॥ २३ ॥
तदन्तः पूर्णपीयूषकरकोटिसमद्युतिम् ।
चिन्तये श्रीनाथपदद्वन्द्वमानन्दमन्दिरम् ॥ २४ ॥

रक्तशुक्लप्रभामिश्रच्छविच्छादितदिक्तटम् ।
माणिक्यपादुकापृष्ठसंसक्तोदरपल्लवम् ॥ २५ ॥
नखचन्द्रप्रभापुञ्जमूर्छनाविशदाखिलम् ।
एवंविधपदद्वन्द्वं शोभितं गुरुमामृशे ॥ २६ ॥
चित्पुस्तकवराभीतिकरं नेत्रत्रयोज्वलम् ।
श्वेतचन्दनकौशेयभूषापुष्पविराजितम् ॥ २७ ॥
वामाङ्कनिलयारक्तशक्त्याऽऽश्लिष्टकलेवरम् ।
श्रीनाथममुकानन्दनाथात्मानं समुल्लिखेत् ॥ २८ ॥
इति स्तोत्रं गुरोः कृत्वा देवतां चन्द्रमण्डलात् ।
हृदयाम्भोजगां ध्यात्वा वरिवस्येत् तु मानसैः ॥ २९ ॥
प्रजप्य मूलविद्यां च यथाशक्त्या मनोमयीम् ।
स्तुवीत सूक्तिभिर्देवीं त्रिपुरां परमेश्वरीम् ॥ ३० ॥
मन्त्रे स्तोत्रे तथान्यत्र नाम सामान्यतः स्थितम् ।
तत्र तत्तन्नामयोगपूर्वकं तु प्रयोजयेत् ॥ ३१ ॥
एवं प्रातःस्मृतिं कृत्वा ततः स्नानं समाचरेत् ।
कृत्वा तु वैदिकस्नानं द्विजै(ज)स्तान्त्रिकमाचरेत् ॥ ३२ ॥
त्रैवर्णिकैर्वैदिकान्ते तान्त्रिकं क्रियतेऽखिलम् ।
अन्यथा तान्त्रिकं व्यर्थमधिकारं विना शिवे ॥ ३३ ॥
आचम्य तत्त्वैः स्वाहान्तैः कूटाद्यैः पर्वतात्मजे ।
चतुर्धा च ततः प्राणायामं कुर्यादतन्द्रितः ॥ ३४ ॥
कनिष्ठानामिकाङ्गुष्ठैर्नासां धृत्वा तु कुम्भके ।
मूलं त्रिधोल्लिखेदेवं प्राणायामविधिः स्मृतः ॥ ३५ ॥
सङ्कल्प्य स्वपुरोभागे श्रीयन्त्रं तु समालिखेत् ।
तोये तत्र परां देवीमावाह्याभ्यर्च्य मानसैः ॥ ३६ ॥
यन्त्रादिलेखने देवि विधानं शृणु संयता ।
अनामयाऽविशेषे तु लिखेत्सर्वत्र शङ्करि ॥ ३७ ॥
तत्र तीर्थं सूर्यबिम्बादाहूयेद् हिमशैलजे ।
ब्रह्माण्डोदरतीर्थानि करैः स्पृष्टानि ते रवे! ॥ ३८ ॥

तेन सत्येन मे देव तीर्थं देहि दिवाकर ।
आकृष्य चाङ्कुशेनाथो निक्षिपेद्यन्त्रमध्यतः ॥ ३९ ॥
अमृतीकृत्य धेन्वा तु निर्विषीकृत्य ताक्ष्यतः ।
प्रोक्षेत् षोडशधा मूलैर्मस्तके तत्त्वमुद्रया ॥ ४० ॥
अभिषिञ्चेन्मूर्धभुजहृन्मुखेष्वष्टधा क्रमात् ।
मूलेन कुम्भरूपिण्या मुद्रया गिरिराट्सुते ॥ ४१ ॥
अप्सु मग्नः स्मरन् देवीं तीर्थरूपां महेश्वरीम् ।
ततस्तु तर्पयेदौघगुरून् कामेश्वरीमुखाः ॥ ४२ ॥
एवं स्नानं विधायाऽथ सन्ध्यां कुर्यात्सुसाधकः ।
रोगाद्युपद्रुतः स्नाने त्वसमर्थो यदा तदा ॥ ४३ ॥
वस्त्रेणार्द्रेण चाङ्गानां कृत्वा प्रोच्छनमादितः ।
मूलं जपन् सप्तधा तु आपादतलमस्तकम् ॥ ४४ ॥
तलाभ्यां संस्पृशेद्[1] देवि मन्त्रस्नानं प्रकीर्तितम् ।
एतत्स्नानमशक्तस्य विहितं शुद्धिहेतवे ॥ ४५ ॥
स्नात्वैवं परिधायाथ वाससी भस्मलाञ्छितः ।
आमच्य(चम्य) प्राणानायम्य सङ्कल्प्य न्यस्य पूजयेत् ॥ ४६ ॥
तोये श्रीयन्त्रराजं तु ध्यात्वा देवीं समावहेत् ।
हृदि ध्यात्वा समावाह्य चावृत्त्या सहितां शिवाम् ॥ ४७ ॥
यथोपचारैः सम्पूज्य चावृतिं कुसुमैर्यजेत् ।
ततो वामेन हस्तेन जलमादाय साधकः ॥ ४८ ॥
गृहीत्वा दक्षिणे हस्ते वामेनाच्छाद्य शङ्करि ।
मूलं जपेत्तु नवधा पुनर्वामेन धारयेत् ॥ ४९ ॥
तच्छाखासन्धिगलितं मुद्रया तत्त्वसंज्ञया ।
अष्टोत्तरशतावृत्त्या मूर्ध्नि प्रोक्षेन्महेश्वरि ॥ ५० ॥
तत आचम्य तु पुनर्जलमादाय शङ्करि ।
अकुलामृतसंयुक्तं तेजोरूपं विभावयेत् ॥ ५१ ॥
पुरुषं पापसंज्ञं तु वामकुक्षौ विचिन्तयेत् ।
अधोमुखं कृष्णवर्णं खड्गखेटकधारिणम् ॥ ५२ ॥

---

1. स्पृशन् देवि–क।

पातकोपपातकाङ्गं ब्रह्महत्योत्तमाङ्गकम् ।
स्वर्णस्तेयपार्श्वयुगं सुरापानमयोदरम् ॥ ५३ ॥
गुरुतल्पपदद्वन्द्वं तत्संसर्गतनूरुहम् ।
अनृतत्वक्परिवृतमतिपातककीकसम् ॥ ५४ ॥
एवंविधं चिन्तयित्वा नासिकायाः सुवर्त्मना ।
प्रविष्टं तज्जलं ध्यात्वा पापपुरुषसंयुतम् ॥ ५५ ॥
तत्तोये तं विलीनं तु विरेच्येतरवर्त्मना ।
वामे कार्ष्णायसभुवि प्रक्षिपेत् तोयरूपिणि ॥ ५६ ॥
प्रक्षाल्य हस्तावाचम्य त्रिरर्घ्यं विनिवेदयेत् ।
गायत्र्या मूलया पश्चात् तर्पणं मूलया तथा ॥ ५७ ॥
अर्घ्यं च तर्पणं चैव सूर्यमन्त्रेण तु त्रिधा ।
कालत्रयेऽपि चैतावत्समानं शङ्करीरितम् ॥ ५८ ॥
ततः कालत्रये मूलानाहताज्ञासु वै क्रमात् ।
बालाबीजत्रयं पीतरक्तशुक्लप्रभं स्मरन् ॥ ५९ ॥
सुषुम्णावर्त्मना न(न्य)स्त आवाह्याकाशसंस्थिते ।
अग्न्यर्कचन्द्ररूपे तु मण्डले तत उत्थितम् ॥ ६० ॥
वाग्भवीं कामराज्ञीं चामृतेशीं विमृशेद् धिया ।
पीतवर्णां पीतवस्त्रस्रग्भूषासमलङ्कृताम् ॥ ६१ ॥
जपमालापुस्तहस्तां बालां त्रिनयनां स्मरेत् ।
रक्तवर्णां रक्तवस्त्रस्रग्भूषासमलङ्कृताम् ॥ ६२ ॥
पाशाङ्कुशवराभीतिधरां तारुण्यसंयुताम् ।
शुक्लवर्णां शुक्लवस्त्रस्रग्भूषासमलङ्कृताम् ॥ ६३ ॥
पाशाङ्कुशाक्षस्रक्पुस्तधरां वृद्धां त्रिलोचनाम् ।
ध्यात्वैवं मानसैरिष्ट्वा त्रिरर्घ्यं परिकल्पयेत् ॥ ६४ ॥
वाक्कामशक्तिसंज्ञाभिर्गायत्रीभिः क्रमादुमे ।
त्रिः सन्तर्प्य च तद्बीजैराचम्य प्रजपेदथ ॥ ६५ ॥
शतधा मूलगायत्रीं तत्तद् गायत्रिकां तथा ।
उपतिष्ठेत्ततो [1]देवीं स्तोत्रमन्त्रैर्जपान्ततः ॥ ६६ ॥

---

1. देवी--क.।

वागीश्वरी विद्महे च कामेश्वरी च धीमहि ।
तन्न शक्तिः प्रचोदयान्मूलगायत्रिका त्वियम् ॥ ६७ ॥
एतत्कूटत्रयादौ तु मूलकूटत्रयं न्यसेत् ।
वागीश्वरीं कामेश्वरीं शक्तीश्वरीं च धीमहि ॥ ६८ ॥
मुक्तिः क्लिन्नाऽमृतान्ते तु वदेद् देवि प्रचोदयात् ।
त्रिपुरा देवि विद्महे सर्वाद्यं कूटमीश्वरि ॥ ६९ ॥
सर्वादावेकशो बीजमेवं गायत्रिकात्रयम् ।
एवं सन्ध्यां समाप्याथाचम्य वै [1]प्रजपेदुमे ॥ ७० ॥
नाथात्मकत्वेन तथा घटिकात्मकत्वेन च ।
नवधा षष्टिधा चैवं पारायणमथापि वा ॥ ७१ ॥
एवं सन्ध्यामुपासित्वा त्वजपाजपमाचरेत् ।
प्रातःस्मृत्युत्तरं वापि शुचिर्भूतो महेश्वरि ॥ ७२ ॥
प्राणानायम्य मन्त्रेण पूर्वजप्तं निवेदयेत् ।
सङ्कल्पयेत्तत्र चादौ कालेनैतावता कृतम् ॥ ७३ ॥
एतावत्संख्यकं देवि उच्छ्वासाद्यात्मकं जपम् ।
गणेशादिदेवताभ्यस्त्वर्पयामीति शङ्करि ॥ ७४ ॥
सङ्कल्प्यैवं देवताभ्यो यथाभागं निवेदयेत् ।
वादिवर्ण चतुष्केण(ळ)युक्ते पीतचतुर्दले ॥ ७५ ॥
आधारे तु गणेशाय षट्शतं जपमर्पये ।
बाद्रिवर्णा[2]ख्यषट्पत्रे विद्रुमाभे स्वयम्भुवे ॥ ७६ ॥
स्वाधिष्ठाने षट्सहस्रसंख्याकं जपमर्पये ।
डादिवर्णयुते विद्युन्निभे दशदलोज्ज्वले ॥ ७७ ॥
विष्णवे मणिपूरे षट्सहस्रं जपमर्पये ।
काद्यक्षरयुते नीलप्रभे द्वादशपत्रके ॥ ७८ ॥
अनाहते षट्सहस्रजपं रुद्राय चार्पये ।
स्वरयुक्ते धूमवर्णे षोडशच्छदशोभिते ॥ ७९ ॥

---

1. 'प्र' नास्ति-क.।
2. र्णाढ्यषट्–क.।

जीवात्मने विशुद्धाख्ये सहस्रं जपमर्पये ।
हक्षयुक्ते तप्तहेमनिभे द्विदलसंयुते ॥ ८० ॥
सहस्रं जपमाज्ञायामर्पये परमात्मने ।
अशेषमातृकायुक्ते चन्द्राभे शतपत्रके ॥ ८१ ॥
अकुलाख्ये श्रीगुरवे सहस्रं जपमर्पये ।
अजपाजपमेवं वै समर्प्य परमेश्वरि ॥ ८२ ॥
श्वासोच्छ्वासैः षष्टिसंख्यैरेकः प्राणोऽभिधीयते ।
षट्प्राणैर्घटिका प्रोक्ता षष्टिघट्यो दिनं भवेत् ॥ ८३ ॥
एकविंशतिसाहस्रं षट्शतं कीर्तितं दिने ।
हंसमन्त्रः प्राणरूपी दिनरात्रं प्रवर्तते ॥ ८४ ॥
प्रोक्तसंख्याजपस्तेन प्राणिनामजपं भवेत् ।
अज्ञानान्मोहितः प्राणी न विजानात्यमुं जपम् ॥ ८५ ॥
ज्ञात्वा फलं समाप्नोति संकल्पाच्च समर्पणात् ।
अद्यैतत्कालमारभ्य भावि [1]कालावधीश्वरि ॥ ८६ ॥
श्वासोच्छ्वासात्मकं प्रोक्तसंख्यं संकल्पयेत् ततः ।
न्यसेद् ऋष्यादिकं तस्य तत्प्रकारं शृणु प्रिये ॥ ८७ ॥
ऋषिर्हंसोऽव्यक्तगायत्रीच्छन्दः सम्प्रकीर्तितम् ।
देवता परमो हंसो हंसमित्यादि वै न्यसेत् ॥ ८८ ॥
एकैकं बीजकं शक्तिः कीलकं चोभयं भवेत् ।
विनियोगस्तु मोक्षार्थं ध्यायेत् तदनु शङ्करि ॥ ८९ ॥
चिद्विमर्शमयं दिव्यं शिवशक्तियुगात्मकम् ।
भोक्तृभोग्यस्वरूपं च स्वस्वभावमहं भजे ॥ ९० ॥
दक्षाङ्गे स्फटिकाभासं शूलमालालसत्करम् ।
भस्माक्षचर्मसर्पाद्यैः शोभितं जटिलं शिवम् ॥ ९१ ॥
वामाङ्गे तप्तहेमाभं पाशचापलसत्करम् ।
नवरत्नविभूषादिवस्त्रकोटीरशोभितम् ॥ ९२ ॥

---

1. विबाला-मूलपुस्तके. ।

अर्धनारीश्वरं देवमहङ्कारतनुं स्मरेत् ।
मानसैस्तु ततोऽभ्यर्च्य चैवं प्रतिदिनं[1] भवेत् ॥ ९३ ॥
एवं देवेशि सम्प्रोक्तस्त्वजपाविधिरुत्तमः ।
एवमाचरतां नित्यं मुक्तिः करतले स्थिता ॥ ९४ ॥
नैतस्य सदृशो देवि जपोऽन्यो भुवि विद्यते ।
एतत्पातकदावानां प्रलयानलसम्मितम् ॥ ९५ ॥
सुभक्ताय विरक्ताय साधवे समुदीरयेत् ।
नान्यस्य लोभान्मोहाद् वा चान्यथा नाशमाप्नुयात् ॥ ९६ ॥
एवं देवेशि सन्ध्यादिकर्त्तव्यं नित्यमेव तु ।
आशौचे सति देवेशि न कुर्यात्पूजनं तथा ॥ ९७ ॥
सन्ध्यादि संक्षेपतो वै कुर्यान्नैव त्यजेत् क्वचित् ।
मन्त्रोच्चारो मानसः स्यात् कर्मसन्ध्यादिकं चरेत् ॥ ९८ ॥
आशौचे मुख्यमेव स्यान्नाङ्गमेवं महापदि ।
आलस्येनान्यथा वापि चाङ्गलोपे पतत्यधः ॥ ९९ ॥
जाताऽशौचे न्यासजपौ यथावत् तु समाचरेत् ।
बुद्धिपूर्वकृतेऽङ्गस्य लोपे साकल्यलोपतः ॥ १०० ॥
यत्पापं तद्भवेद् देवि तस्माद् बुद्ध्या न लोपयेत् ।
अर्घ्यस्तथा मूलदेव्या जपः सन्ध्यासु मुख्यकम् ॥ १०१ ॥
अन्यदङ्गं क्रमाल्लोपे शतधा दशधा जपः ।
सनक्षत्रः समानार्कस्तथार्धार्कस्तु मुख्यकः ॥ १०२ ॥
प्रातर्मध्याह्नसन्ध्याख्यकालो मध्यः प्रकीर्तितः ।
द्वितीयकालपर्यन्तो गौणकालः प्रकीर्तितः ॥ १०३ ॥
प्रातःसन्ध्या प्राङ्मुखेन कर्तव्याऽन्यत्र वै शिवे ।
उदङ्मुखेन सूर्याभिमुखश्चार्घ्यं जपं चरेत् ॥ १०४ ॥
इत्येवं कथितं प्रातःकृत्यं सन्ध्यादिकं तथा ।
संक्षेपादर्णवप्रोक्तं किं भूयः श्रोतुमिच्छसि ॥ १०५ ॥

॥ इति श्रीत्रिपुरार्णवे त्रिपुरासारसर्वस्वे सन्ध्याविधिर्द्वितीयस्तरङ्गः ॥ २ ॥

●

1. दिने भ–क।

अथ तृतीयस्तरङ्गः

गौर्युवाच

महेश्वर महादेव सन्ध्योपास्तेरनन्तरम् ।
यत्कर्त्तव्यं तद्वदस्व यथोक्तवदतिस्फुटम् ॥ १ ॥

महेश्वर उवाच

शृणु देवि प्रवक्ष्यामि त्रिपुरार्णवसंस्थितम् ।
संक्षेपादेव सन्ध्यायाः पश्चात्कर्तव्यमद्रिजे ॥ २ ॥
निरुक्तविधिना सन्ध्यामुपासित्वाऽथ साधकः ।
पूजामन्दिरमागच्छेदागमोक्तसुलक्षणम् ॥ ३ ॥
तत्र द्वारं यजेद् देवि तद्विधानं वदामि ते ।
सामान्यार्घ्यस्य विधिना मण्डलेऽर्घ्यं प्रपूजयेत् ॥ ४ ॥
अखण्डमण्डलाकारं विश्वं व्याप्य व्यवस्थितम् ।
त्रैलोक्यं मण्डितं येन मण्डलं तत्सदाशिवम् ॥ ५ ॥
इत्यभ्यर्च्य मण्डलेशं तर्पयेत् पूजयेदपि ।
अविघ्नं च महालक्ष्मीं तद्वदेव सरस्वतीम् ॥ ६ ॥
ऊर्ध्वे सम्पूज्य गणपक्षेत्रपालौ तथैव च ।
पूज्ये च गङ्गा यमुने तथा धात्रीविधात्रिके ॥ ७ ॥
शङ्खपद्मनिधी चैव पार्श्वयोर्दक्षवामतः ।
देहल्यामस्त्रदेवीं च ब्राह्म्यादिमातृकाष्टकम् ॥ ८ ॥
असिताङ्गमुखानष्टभैरवांश्चापि पार्श्वयोः ।
अविघ्नाद्यास्तु द्वारेशास्तत्तत्स्थाने वरानने ॥ ९ ॥
नामोऽन्तनामभिश्चोक्तैः सन्तर्प्याः कुसुमोद्धृतैः ।
सूर्यास्त्रन्यासमन्त्रेण सन्तर्प्यार्चास्त्रदेवता ॥ १० ॥
एवं द्वारे मण्डलं तु पूजयेत्परमेश्वरि ।
इदं तन्मण्डलं देवि प्रारभ्यैतस्य पूजनम् ॥ ११ ॥

मार्तण्ड[1]भैरवार्घ्यान्तं मण्डलं प्रोच्यते शिवे ।
सदाशिवात्मकं यस्मान्मण्डलं तन्मयत्वतः ॥ १२ ॥
सर्वे सदाशिवात्मानः प्रविष्टास्तस्य मध्यतः ।
सर्वे द्विजातयस्तत्र सदाशि[व]मयत्वतः ॥ १३ ॥
नान्तरं तत्र वै पश्येत् पश्चात्सर्वे यथा पृथक् ।
मध्ये भेदं बहिश्चैक्यं कृत्वा पातित्यमाप्नुयात् ॥ १४ ॥
मण्डले ये तु सम्प्रोक्ता धर्मास्तेऽत्रैव सम्मता ।
ततः प्राणस्य मार्गेण वामां सङ्कोचेय(चये)त्तनुम् ॥ १५ ॥
प्रविशेत् पूजनगृहे देवातायास्तु सम्मुखे ।
कल्पयेदासनं स्वस्य चैलाजिनकटात्मकम् ॥ १६ ॥
कार्पासपट्टोर्णजातं वस्त्रं वेत्रसमुद्भवम् ।
दर्भजं मुञ्जजं वापि कटं व्याघ्रसमुद्भवम् ॥ १७ ॥
हरिणं सिंहजं वापि समग्रं खण्डमेव वा ।
लोमहीनं कीटजग्धं दुर्गन्धिं चापि वर्जयेत् ॥ १८ ॥
ऊर्ध्वपृष्ठं च तत्कुर्यात् समग्रे मस्तके विशेत् ।
दक्षिणाग्रं वर्जयेद् वै दग्धं च स्फुटितं तथा ॥ १९ ॥
अधश्चर्ममयं चोर्ध्वे वस्त्रजं परिकल्पयेत् ।
भूमौ समाविश्य कर्म विधिनाऽपि कृतं शिवे ॥ २० ॥
तन्निरर्थकतामेति भिन्नकुम्भस्थतोयवत् ।
भूतानुत्सार्य भूमिं तु प्रार्थयेत् पर्वतात्मजे ॥ २१ ॥
भूमि त्वया धृता लोका देवि त्वं विष्णुना धृता ।
त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥ २२ ॥
इति सम्प्रार्थ्य भूंभूम्यै नम इत्यर्चयेद् भुवम् ।
आसनं ह्रीमनन्तासनाय इत्यभिपूजयेत् ॥ २३ ॥
उपविश्यासने पश्चाद् दक्षवामांसयोर्हृदि ।
गुरून् गणपतिं मूलदेवतां प्रणमेत् क्रमात् ॥ २४ ॥
त्रिर्वामपार्ष्णिघातं तु आसनाधो विधाय च ।
फडित्यथो नमः पश्चात् सुदर्शनपुरःसरम् ॥ २५ ॥

---

1. ण्डमण्डलार्घ्यान्तं–ख. १२,

अस्त्रमन्त्रेण विन्यस्य कुर्याद् दिग्बन्धनं ततः ।
तलभूखेचरान् विघ्नान् त्रिभिरेवं निरस्य च ॥ २६ ॥
विभावयेत् स्वपरितो वह्निप्राकारमद्रिजे ।
भूशुद्धिमेव निर्वर्त्य भूतशुद्धिं समाचरेत् ॥ २७ ॥
प्राणानायम्य हंसेन प्राणवायुं विचिन्तयेत् ।
प्रदीपकलिकाकारं ततस्तेनाभिघातिताम् ॥ २८ ॥
मूलाधारे संस्थितां तां कुण्डलिन्यभिधां पराम् ।
प्रोत्थितामूर्ध्वमार्गेण जीवेन सहितां तथा ॥ २९ ॥
देहस्थदेवताभिश्च सर्वोर्ध्वस्थे परे शिवे ।
प्रविश्यैक्यं गतां ध्यात्वा देहं शून्यं विचिन्तयेत् ॥ ३० ॥
पूर्वोक्तवद् वामकुक्षौ चिन्तयेत् पापपूरुषम् ।
तद्युक्तं तं स्थूलदेहं यं रं वं प्रोच्चरेत् क्रमात् ॥ ३१ ॥
पुरकुम्भरेचकेषु यावत् स्याद्वेगरोधनम् ।
संशोषितं विनिर्दग्धं तद्भस्माप्लावितं तथा ॥ ३२ ॥
वायुर्वह्न्यमृतैर्लं हं सोहं चोच्चार्य पूर्ववत् ।
आचरन् पूरकाद्यं तु घनीभूतं च चेतितम् ॥ ३३ ॥
हृद्यागतं तथा जीवं भावयेत् प्राणवल्लभे ।
जीवात्मनो निर्गताश्च स्वं स्वं स्थानं समाश्रिताः ॥ ३४ ॥
देवताः कुण्डलिन्याद्या ध्यायेद् देवमयीं तनुम् ।
भूतशुद्धिं विधायाथ प्राणस्थापनमाचरेत् ॥ ३५ ॥
मम प्राणा इह प्राणा मम जीव इह स्थितः ।
मम सर्वेन्द्रियाणीति इह पश्चात् स्थितानि च ॥ ३६ ॥
मम वाङ्मन इत्यन्ते श्रोत्रत्वक्चक्षुरेव च ।
जिह्वा-घ्राण-पद-प्राणा इहागत्य सुखं चिरम् ॥ ३७ ॥
तिष्ठन्त्वग्निप्रिया चैवं खण्डानां स्याच्चतुष्टयम् ।
ममादिकं तदादौ तु प्रत्येकं बीजयोजना ॥ ३८ ॥
आं ह्रीं क्रों यादिसान्तं तु सबिन्दुं हों ध्रुवं च क्षम् ।
सं हं सश्चापि ह्रीं ऊँ वै वदेदष्टादशोन्मितम् ॥ ३९ ॥

क्षमादिषट्कं सर्वान्ते प्राणस्य स्थापने मनुः ।
ऋषिर्मूर्तित्रयं छन्दो वेद-त्रितयमेव च ॥ ४० ॥
प्राणशक्तिर्देवता च नियोगः प्राणसंस्थितौ ।
आद्यैस्त्रिभिर्बीजशक्तिकीलकानि प्रविन्यसेत् ॥ ४१ ॥
ह्रां ह्रीं इत्यादिषट्केन न्यसेत् करषडङ्गकम् ।
बन्धूककुसुमाभासां त्रिनेत्रां लोहिताम्बराम् ॥ ४२ ॥
अङ्कुशं च तथा पाशं पौण्ड्रं चापं त्रिशूलकम् ।
कपालं रक्तभरितं दधानां पञ्चसायकान् ॥ ४३ ॥
रक्ताम्भोधिस्थ-नौकायां ध्यायेद् रक्ताम्बुजासनाम् ।
इति ध्यात्वा च सम्पूज्य त्रिर्जपेद्धृदयं स्पृशन् ॥ ४४ ॥
ततस्तु मातृकान्यासं कर्यात् तद्विधिरुच्यते ।
ऋषिर्ब्रह्मा च गायत्रीछन्दो देवी सरस्वती ॥ ४५ ॥
हलो बीजानि तद्वत्तु स्वराः शक्तय ईरिताः ।
व्यक्तिश्च कीलकं मूर्ध्नि वक्त्रे हृद्गुह्यपादयोः ॥ ४६ ॥
नाभौ च विन्यसेदेतत् क्रमात् साधकपुङ्गवः ।
अं आं मध्ये कवर्गं स्यादिं ईं मध्ये चवर्गकम् ॥ ४७ ॥
उं (ऊं) मध्ये टवर्गं तु एं ऐं मध्ये तवर्गकम् ।
ओं औं मध्ये पवर्गं तु अं अः मध्ये यष(श)द्वयम् ॥ ४८ ॥
एवं षडङ्गं विन्यस्य ध्यायेन्मूर्ध्न्यकुलाह्वये ।
कर्णिकायां तु ह्सौःकारं केसरेषु स्वरद्वयम् ॥ ४९ ॥
कचटास्तपयाः शो ल इति पत्रेषु वर्गकान् ।
चतुरस्रं बहिस्तस्य वं ठः दिक्कोणयोः क्रमात् ॥ ५० ॥
एवं श्रीमातृकादेव्या यन्त्रं ध्यात्वा विभावयेत् ।
मूलाधारात् कुड(ण्ड)लिनीं षट्चक्रक्रमभेदतः ॥ ५१ ॥
अनुसंरुध्य तन्नादं बिलस्थ-विधुमण्डले ।
प्राणसंरोधसञ्जात-प्रबुद्धां परमेश्वरीम् ॥ ५२ ॥
निविश्य मिलितां तस्मात् प्रस्रवामृत-विप्रुषः ।
मातृकार्णा इति स्मृत्वा न्यसेदाधारवर्त्मसु ॥ ५३ ॥

शुद्धावनाहते पूरे स्वाधिष्ठानेऽथ मूलके ।
आज्ञायां नृपसूर्याशा षट्चतुर्द्विदलं स्मरेत् ॥ ५४ ॥
अकडाद्यान् बवाद्यांश्च लक्षौ च क्रमतो न्यसेत् ।
प्रादक्षिण्यात् प्राग्दलादि-चतुस्तार-नमोन्तरान् ॥ ५५ ॥
न्यसेदेकैकशो वर्णान् पश्चाद् बाह्ये प्रविन्यसेत् ।
स्वराननां स्पर्शशाखा-मध्याङ्गीं यादिसन्धिनीम् ॥ ५६ ॥
चन्द्रचूडां चन्द्रनिभां त्रिनेत्रां पद्मवासिनीम् ।
अक्षमालां सुधाकुम्भं पुस्तकं वरदानकम् ॥ ५७ ॥
दधानां वाङ्मयीं ध्यायेद् विद्याभेदौ-घमातरम् ।
एवं ध्यात्वा सुपूज्याथ न्यसेद् वक्त्रादिषु क्रमात् ॥ ५८ ॥
मूर्ध्न्यास्यमण्डले नेत्रश्रोत्रनासाकपोलयोः ।
ओष्ठदन्तयुगे जिह्वा ब्रह्मरन्ध्रे स्वरान् न्यसेत् ॥ ५९ ॥
स्कन्धादि-सन्धिषु तथा शाखामूलतदग्रयोः ।
बाह्वोरेवं पादयोश्च पार्श्वपृष्ठेषु शाङ्करि ॥ ६० ॥
नाभौ च जठरे स्पर्शान् क्रमादेकैकशो न्यसेत् ।
हृदि स्कन्धद्विककुदि वान्तं चापि प्रविन्यसेत् ॥ ६१ ॥
हृदयादग्रपर्यन्तं हस्तयोः पादयोस्तथा ।
नाभ्यन्तं ब्रह्मरन्ध्रान्तं शादिषट्कं प्रविन्यसेत् ॥ ६२ ॥
त्रिर्व्यापयेत्ततः पश्चान्मातृकाविद्यया शिवे ।
अन्तर्न्यासस्तु मनसा चानामाङ्गुष्ठमध्यमैः ॥ ६३ ॥
दक्षहस्तेन बाह्यस्य तस्मिन् वामकरेण तु ।
व्यापकं तु तलाभ्यां स्यात् त्क(क)रयोः परमेश्वरि॥ ६४ ॥
ऊँ ऐं ह्रीं श्रीं चतुस्तारमेतदन्ते मनुं पठन् ।
कर्माणि कुर्यात् सर्वाणि फलं सम्यगभीप्सता ॥ ६५ ॥
एतद्बीजैरयोगे तु नेप्सितं सिध्यति क्वचित् ।
अवश्यं कामनासिध्यै बीजान्येतानि योजयेत् ॥ ६६ ॥
ततस्तु वशिनीन्यासं मूर्ध्नि फाले भ्रुवोऽन्तरे ।
कण्ठहृन्नाभिगुह्येषु पादान्मूर्धान्तमेव च ॥ ६७ ॥

स्वरान् कचटतान् पञ्च यशौ वर्गान् मनूंस्तथा ।
वशिनी वाग्देवतायै नम एवं प्रविन्यसेत् ॥ ६८ ॥
वशिनी कामेश्वरी च मोदिनी विमला तथा ।
अरुणा जयिनी सर्वेश्वरी पश्चात्तु कौलिनी ॥ ६९ ॥
ततो मूलाक्षरान् देहे मूर्ध्नि फाले दृशोस्तथा ।
वक्त्रे कण्ठे च हृत्पार्श्वनाभिषूपस्थगुह्ययोः ॥ ७० ॥
ऊरुद्वयेऽङ्घ्रौ क्रमतो न्यसेत् पञ्चदशक्रमात् ।
क(का)मेश्वरीं च वज्रेशीं भगमालिनिकां तथा ॥ ७१ ॥
आधारानाहताज्ञासु मूर्ध्नि श्रीत्रिपुराम्बिकाम् ।
समष्टिव्यष्टिकूटान्ते नमोऽन्तैर्नामभिर्न्यसेत् ॥ ७२ ॥
अं आं सौरिति द्विधा तु अङ्गुष्ठादिषु विन्यसेत् ।
करशुद्धिं विधायेत्थं षडङ्गन्यासमाचरेत् ॥ ७३ ॥
ऋष्यादिकं प्रवक्ष्यामि षोडशी-पञ्चदश्ययोः ।
आनन्दभैरव ऋषिः पङ्क्तिश्छन्दः प्रकीर्तितम् ॥ ७४ ॥
देवता त्रिपुरसुन्दरी सौभाग्यादि-विद्यका ।
कूटत्रयेण क्रमतो बीजं शक्तिश्च कीलकम् ॥ ७५ ॥
न्यासोऽपि च कराङ्गानां षोडश्याः शृणु ते ब्रुवे ।
पञ्चत्रिपञ्चषट्वर्णैः चतुर्भिः पञ्चभिः क्रमात् ॥ ७६ ॥
ततो न्यसेत् तु चरणान् कूटयष्टिसमष्टिकम् ।
हंसो रक्तात् तु चरणाभ्यां नमस्त्वाद्यकूटतः ॥ ७७ ॥
एवं शुक्लान् मिश्रपदान् निर्वाणाच्चरणं वदेत् ।
अन्ते च नमसा युक्ता मन्त्राश्चरणसंज्ञकाः ॥ ७८ ॥
त्रिकोणे मातृकायास्तु मध्ये मूर्ध्नि प्रविन्यसेत् ।
श्रीपादुकां पूजयामि नम इत्यन्तयोजनात् ॥ ७९ ॥
चरणाभिधमन्त्राणां प्रोक्तानां तु महेश्वरि ।
ध्यानं तु ते प्रवक्ष्यामि षोडशीपञ्चदश्ययोः ॥ ८० ॥
कुरुविन्दसमानाभामरुणाम्बरभूषणाम् ।
चन्द्रचूडां त्रिनयनां कोटिकन्दर्पसौभगाम् ॥ ८१ ॥

दक्षे वामे करे चाधः पुष्पबाणेक्षुकार्मुके ।
तथैव सृणिपाशौ तु करयोरूर्ध्वसंस्थयोः ॥ ८२ ॥
लघुषोढान्यासमथो शृणु संयतमानसा ।
ऋषिस्तु दक्षिणामूर्तिः पङ्क्तिश्छन्दः प्रकीर्तितम् ॥८३ ॥
न्यसेद् बालां द्विरावृत्त्या मुखे षड्वर्गयोगतः ।
मातृकान्याससम्प्रोक्तरीत्या षड्वर्गयोजनम् ॥ ८४ ॥
एवं कराङ्गे विन्यस्य ध्यायेच्छ्रीत्रिपुरां पराम् ।
उद्यत्सूर्यसहस्राभां रक्तमाल्याम्बरोज्ज्वलाम् ॥ ८५ ॥
पाशाङ्कुशेषु चापाढ्यां त्रिनेत्रां चन्द्रशेखराम् ।
गणेशग्रहनक्षत्रयोगिनीराशिरूपिणीम् ॥ ८६ ॥
देवीं पीठमयीं ध्यायेन्मातृकां सुन्दरीं पराम् ।
सम्पूज्य मानसैरादौ गणेशन्यासमाचरेत् ॥ ८७ ॥
तत्र ध्यानं गणेशानां सशक्तीनां निशामय ।
तरुणादित्यसङ्काशान् गजवक्त्रान् त्रिलोचनान् ॥ ८८ ॥
पाशाङ्कुशवराभीतिकरान् शक्तिसमन्वितान् ॥
तास्तु सिन्दूरवर्णाभाः सर्वालङ्कारभूषिताः ॥ ८९ ॥
एकहस्तधृताम्भोजा इतरालिङ्गितप्रियाः ।
ध्यात्वैवं मानसैरिष्ट्वा मातृकावत् प्रविन्यसेत् ॥ ९० ॥
विघ्नेश्वराय श्रियै च नम आदौ सबिन्दुकान् ।
एकैकशो मातृकार्णास्तेषां नाम क्रमाच्छृणु ॥ ९१ ॥
विघ्नेश्वरो विघ्नराजो विनायक-शिवोत्तमौ ।
विघ्नकृद्विघ्नह[1]र्तारौ विघ्नराड् गणनायकः ॥ ९२ ॥
एकदन्तो द्विदन्तश्च गजवक्त्रो निरञ्जनः ।
कपर्दी दीर्घवक्त्रश्च सङ्कर्षण-वृषध्वजौ ॥ ९३ ॥
गणनाथो गजेन्द्रश्च शूर्पकर्णस्त्रिनेत्रकः ।
लम्बोदरो महानादश्चतुर्मूर्तिः सदाशिवः ॥ ९४ ॥
आमोदो दुर्मुखश्चैव सुमुखश्च प्रमोदकः ।
एकपादो द्विजिह्वश्च शूरो वीरश्च षण्मुखः ॥ ९५ ॥

---

1. हर्ता च वि-क. ।

वरदो वामदेवश्च वक्रतुण्डो द्विरण्डकः ।
सेनानीर्ग्रामणीर्मत्तो विमत्तो मत्तवाहनः ॥ ९६ ॥
जटी मुण्डी तथा खड्गी वरेण्यो वृषकेतुकः ।
भक्षप्रियो मेघनादो गणपश्च गणेशकः ॥ ९७ ॥
श्रीर्ह्रीस्तुष्टिश्च शान्तिश्च पुष्टिश्चापि सरस्वती ।
रतिर्मेधा च कान्तिश्च कामिनी मोहिनी तथा ॥ ९८ ॥
जटा तीव्रा ज्वालिनी च नन्दा च सुरसा तथा ।
कामरूपिणी सुभ्रूश्च जयिनी च ततः परम् ॥ ९९ ॥
सत्या तथैव विघ्नेशी सुरूपिणी च कामदा ।
मदविह्वला विकटा धूम्रा भूतिस्तथैव च ॥ १०० ॥
भूमिः सती रमा पश्चान्मानुषी मकरध्वजा ।
विकर्णा भ्रुकुटिर्लज्जा दीर्घघोणा धनुर्धरा ॥ १०१ ॥
यामिनी चं तथा रात्रिश्चन्द्रिका च शशिप्रभा[1] ।
लोला च चपलाक्षिणी ततो ऋद्धिश्च दुर्भगा ॥ १०२॥
सुभगाथ शिवा दुर्गा कालिका च ततः परम् ।
कालजिह्वा च तत्पश्चाद् भवेद् वै विघ्नहारिणी ॥१०३॥
एवं गणेशान् शक्त्यन्तान् न्यस्य ध्यायेद् ग्रहानथ ।
रक्तं श्वेतं तथा रक्तं श्यामं पीतं च पाण्डुरम् ॥१०४॥
धूम्रं कृष्णं तथा धूम्रं ग्रहानेवं विचिन्तयेत् ।
रविमुख्यान् कामरूपान् सर्वाभरणभूषितान् ॥ १०५ ॥
वामोरुन्यस्तहस्तांश्च दक्षिणेन वरप्रदान् ।
ध्यात्वैवं मानसैरिष्ट्वा ग्रहानेवं क्रमान्न्यसेत् ॥१०६॥
हृदये च भ्रुवोर्मध्ये त्रिनेत्रे हृदयादधः ।
तदूर्ध्वेऽथ गले नाभौ वक्त्रे चाथ गुदे शिवे ॥ १०७ ॥
स्वरैर्यकचटैर्वर्गैस्तपशाद्यैः लवर्णतः ।
सूर्यश्चन्द्रो मङ्गलश्च बुधश्चैव बृहस्पतिः ॥ १०८ ॥
शुक्रः शनैश्चरो राहुः केतुरेवं नवग्रहाः ।
रेणुका चामृता धात्री ज्ञानरूपा यशस्विनी ॥ १०९ ॥

---

1. शशिक्रमा-क. ।

शाङ्करी शक्तिकृष्णे च धूम्राम्बा[1]न्तास्तु शक्तयः ।
नक्षत्राणामथ न्यासस्तद्ध्यानं गिरिजे शृणु ॥ ११० ॥
ज्वलत्कालाग्निसङ्काशाः सर्वाभरणभूषिताः ।
नतिपाण्योऽश्विनीमुख्या वरदाभयपाणयः ॥ १११ ॥
ध्यात्वैवं मानसैरिष्ट्वा क्रमेण न्यासमाचरेत् ।
ललाटे नेत्रयोः कर्णनासिकायुगले गले ॥ ११२ ॥
स्कन्धकूर्परयुग्मे च मणिबन्ध-युगे तथा ।
तलयोश्च तथा नाभौ कट्यूरुजानुयुग्मके ॥ ११३ ॥
जङ्घयोः पादयुग्मे च क्रमेणैव तु विन्यसेत् ।
अश्वीद्व(द्वा)न्यब्धिचन्द्रेन्दुपक्षेन्द्वश्व्य(श्व)श्विभू(भ्रू)द्वयम् ॥ ११४ ॥
नेत्राश्विचन्द्रपक्षाग्निभूरामेन्दुशशिक्षितिः ।
नेत्रभूपक्षरामाब्धिसङ्ख्या वर्णाः सबिन्दुकाः ॥ ११५ ॥
स्वरान्त्यौ क्षान्तनिहितौ नामादौ क्रमतो न्यसेत् ।
अश्विनी भरणी चैव कृत्तिका रोहिणी तथा ॥ ११६ ॥
मृगशीर्षमथार्द्रा वै ततः स्यात्तु पुनर्वसुः ।
पुष्यस्तथैवाश्लेषा च मघा पूर्वादिफाल्गुनी ॥ ११७ ॥
उत्तराफल्गुनी हस्तश्चित्रा स्वाती ततः परम् ।
विशाखा चानुराधा च ज्येष्ठा मूला(लं) ततः परम् ॥११८॥
द्विराषाढा च श्रवणो धनिष्ठा च शताद्भिषक् ।
तथा भाद्रपदायुग्मं रेवती सप्तविंशतिः ॥ ११९ ॥
ततस्तु योगिनीन्यासं कुर्यात् तद्विधिरुच्यते ।
सितासितारुणारक्ताश्चित्रां पीतां च चिन्तयेत् ॥१२०॥
चतुर्भुजाः समैर्वक्त्रैर्युता भूषणभूषिताः ।
पुस्तकं च कपालं च वराभीतिधराः शुभाः ॥ १२१ ॥
ध्यात्वैवं मानसैरिष्ट्वा क्रमेण न्यासमाचरेत् ।
मातृकां योगिनीविद्यामनुविद्यां ततः परम् ॥ १२२ ॥
रक्ष रक्ष धातुनामात्मने नाम नमोन्तकम् ।
स्वरैः कडबवाद्यैश्च हक्षाभ्यामादिक्षान्तकैः ॥ १२३ ॥

---

1. म्बा तास्तु-क।

ठान्तं यान्तद्वयं खाद्यं षान्तयुग्मं षषष्ठकम् ।
षड्दीर्घबिन्दुसहितं सप्तविद्यास्त्विमाः क्रमात् ॥ १२४ ॥
तत्तद्वर्णोत्तरं मलवरयूं प्रोच्चरेत् क्रमात् ।
सप्तेमास्त्वनुविद्याः स्युर्धातुनामान्यपि शृणु ॥ १२५ ॥
त्वगसृङ्मांसमेदोऽस्थिमज्जाशुक्लानि सप्तधा ।
डाकिनी राकिनी पश्चाल्लाकिनी काकिनी ततः ॥१२६॥
साकिनी हाकिनी याकिनीत्येवं(व) योगिनीगणः ।
अकारादिविसर्गान्तं डां डीमित्यादि षट्ककम् ॥१२७॥
डमलाद्वरयूं रक्ष रक्ष पश्चात् त्वगात्मने ।
डाकिन्यै नम इत्येवं योगिनीन्यासमाचरेत् ॥ १२८ ॥
विशुद्ध्यनाहते पूरे स्वाधिष्ठाने च मूलके ।
आज्ञायां ब्रह्मरन्ध्रे च नृपार्कदशषड्दलम् ॥ १२९ ॥
वेदपक्षदलं ध्यायन् सहस्रारमपि क्रमात् ।
राशिन्यासं ततः कुर्यात् तद्विधानं निगद्यते ॥ १३० ॥
रक्तं श्वेतं हरिद्वर्णं पाण्डुं चित्रं सितं स्मरेत् ।
पिशङ्ग(ा)पिङ्गलौ कम्बुकर्बुरासितधूम्रभाः ॥ १३१ ॥
मेषादिनामसदृशाकारान् ध्यात्वा प्रविन्यसेत् ।
मेषो वृषोऽथ मिथुनं कर्कटः सिंहकन्यके ॥ १३२ ॥
तुला च वृश्चिको धनुर्मकरः कुम्भमीनकौ ।
वेदपक्षाब्ध्यश्विपक्षरसभूतशरास्तथा ॥ १३३ ॥
शरेषु शरभूतात्मसङ्ख्यवर्णान् समीरयेत् ।
स्वरान्ते शादिहान्तं तु क्षकारं वान्ततो न्यसेत् ॥ १३४ ॥
गुल्फे जानुनि वृषणे कुक्षिस्कन्धशिरःसु च ।
दक्षगुल्फादिके वाममूर्धादौ च क्रमान्न्यसेत् ॥ १३५ ॥
पीठानि विन्यसेत् पश्चाद् राशीनां न्यासतः परम् ।
तद्विधानं प्रवक्ष्यामि शृणु संयतमानसा ॥ १३६ ॥
सितासितारुणश्यामहरित्पीतान्यनुक्रमात् ।
पुनः पुनः क्रमादेवं पञ्चाशत्स्थानसञ्चये ॥ १३७ ॥

पीठानि संस्मरेद् विद्वान् सर्वकार्यार्थसिद्धये ।
अभ्यर्च्य मानसैः पश्चान्मातृकावत् प्रविन्यसेत् ॥ १३८ ॥
कामरूपं वाराणसीं नेपालं पौण्ड्रवर्धनम् ।
काश्मीरं कान्यकुब्जं च पूर्णशैलं तथाऽर्बुदम् ॥ १३९ ॥
आम्रातकेश्वरैकाम्रे त्रिःस्रोतः कामकोटकम् ।
कैलासो भृगुकेदारौ ततश्चन्द्रपुरी भवेत् ॥ १४० ॥
श्रीरोड्डारस्तथा जालन्धरो मालव एव च ।
कुलान्तं देवकोटं च गोकर्णो मारुतेश्वरः ॥ १४१ ॥
अट्टहासोऽथ विरजो राजगृहं महागिरिः ।
कोलगिरिश्चैलापुरं कालेश्वरो जयन्तिका ॥ १४२ ॥
उज्जयिन्यथ चरित्रं क्षीरिका हस्तिनापुरम् ।
ओड्डीशोऽथ प्रयागश्च षष्ठीशश्च मायापुरी ॥ १४३ ॥
जलेश्वरश्च मलयः श्रीशैलो मेरुरेव च ।
गिरिर्महेन्द्रो वामनो हिरण्यपुरमेव च ॥ १४४ ॥
महालक्ष्मीस्तथोड्याणं छायाछत्रमिति क्रमात् ।
मातृकार्णमुखाश्चैते पीठान्ताः क्रमतो न्यसेत् ॥ १४५ ॥
एवं तु लघुषोढाख्यो न्यासः प्रोक्तो हिमाद्रिजे ।
एवं विन्यस्तदेहस्तु देवताभावमाप्नुयात् ॥ १४६ ॥
एवं देवेशि सन्ध्यातोऽनन्तरी कथिता क्रिया ।
अकृत्वैनां तु पूजादि निष्फलं सर्वमद्रिजे ॥ १४७ ॥

॥ इति श्रीत्रिपुरार्णवे त्रिपुरासारसर्वस्वे भूशुद्ध्यादिविधिर्नाम तृतीयस्तरङ्गः ॥ ३ ॥

●

अथ चतुर्थस्तरङ्गः

पार्वत्युवाच

महेश श्रोतुमिच्छामि न्यासस्यानन्तरक्रियाम् ।
ब्रूहि मे त्रिपुरादेव्याः साधकानां विधानतः ॥ १ ॥

महेश्वर उवाच

शृणु देवि प्रवक्ष्यामि न्यासानन्तरसत्क्रियाम् ।
त्रिपुरार्णवसम्प्रोक्तां सारं तस्माच्छृणु प्रिये ॥ २ ॥
साधकः समनुष्ठाय न्यासान्तं कर्म प्रोक्तवत् ।
जपादिकं विधायाथ पूजनं तु समाचरेत् ॥ ३ ॥
तच्चापि यन्त्रे कर्तव्यं मुख्यपक्षस्त्वयं शिवे ।
तस्माद् यन्त्रं प्रवक्ष्यामि शृणु सम्यक् समाहिता ॥ ४ ॥
स्वेष्टमानेन सद्वृत्तं विलिख्य विभजेत् ततः ।
प्राक्प्रत्यग्ब्रह्मसूत्रे वै नागवेदांशकैः शिवे ॥ ५ ॥
षड्भिः षड्भिः पञ्चभिश्च त्रिभिस्त्रिभिरगात्मजे ।
चतुर्भिस्त्रिभिरप्येवं षड्भिः षड्भिस्तथांशकैः ॥ ६ ॥
रेखां कुर्यात्पूर्वतस्तु षट्शेषांशास्तु पश्चिमे ।
नवरेखास्तिर्यगेवं वृत्तान्तं विलिखेत् ततः ॥ ७ ॥
तृतीयरेखाप्रान्ताभ्यां रेखायुग्मं विकृष्य तु ।
वृत्ते पश्चिमसूत्रे तदग्रयुग्मं नियोजयेत् ॥ ८ ॥
प्रत्यगग्रं त्रिकोणं स्यादेवं सप्तमप्रान्ततः ।
त्रिकोणमपरं पूर्ववृत्तसूत्राग्रमालिखेत् ॥ ९ ॥
षट्कोणमेवं सम्पाद्य डमरुद्वयपार्श्वकम् ।
आद्यरेखासूत्रसन्धेरष्टमी पार्श्वयोर्नयेत् ॥ १० ॥
सप्तमीसन्धिभेदेन तथान्त्यब्रह्मसूत्रतः ।
तृतीयासन्धिभेदेन द्वितीयापार्श्वयोर्नयेत् ॥ ११ ॥

षट्कोणमपरं तेन सिद्धं पूर्ववदद्रिजे ।
द्वितीयाष्टमसूत्राभ्यां षष्ठतुर्यद्विपार्श्वयोः ॥ १२ ॥
अन्तर्डमरुपर्यन्तं कोणं षट्कोणमालिखेत् ।
सूत्रसप्तमसन्धेस्तु पञ्चमीपार्श्वयोर्नयेत् ॥ १३ ॥
त्रिकोणमन्तर्डमरुस्पृष्टकोणं भवेत्ततः ।
षष्ठसूत्रसन्धितस्तु प्रथमापार्श्वयोर्नयेत् ॥ १४ ॥
तुर्यतृतीयतत्पूर्वसन्धिषट्क-विभेदतः ।
त्रिकोणमेवमपरं तृतीयासूत्रसन्धितः ॥ १५ ॥
अन्त्यपार्श्वं द्वयं नीत्वा पञ्चम्याद्यष्टसन्धिभित् ।
त्रिकोणं विलिखेत् सम्यक् समसूत्रप्रपातनैः ॥ १६ ॥
तेन त्रिचत्वारिंशत्तु त्रिकोणानां भवेच्छिवे ।
अष्टादश तु मर्माणि चतुर्विंशतिसन्धयः ॥ १७ ॥
शोभितं नवभिस्तद्वन्महायोनिभिरद्रिजे ।
ब्रह्मसूत्रं पार्श्वशेषरेखाश्चापि प्रमार्जयेत् ॥ १८ ॥
मध्ये बिन्दुं लिखित्वा तु तद्बाह्ये क्रमतो लिखेत् ।
वृत्तेऽष्टपत्रं तद्बाह्ये वृत्ते षोडशपत्रकम् ॥ १९ ॥
वृत्तं ततो भूपुराणां त्रितयं द्वारशोभितम् ।
समप्रमाणपत्राणि दिक्सन्ध्यग्राणि तानि तु ॥ २० ॥
मध्ये [1]दशांशकं हित्वा प्रत्येकं पार्श्वयोर्लिखेत् ।
तिर्यग्रेखात्रयं तेषां प्रान्तेभ्योऽधः समाक्षिपेत् ॥ २१ ॥
रेखामङ्गुलमानेन त्रिचतुःपञ्चसङ्ख्यया ।
परस्परं तु तद्बाह्ये मेलयेत् पर्वतात्मजे ॥ २२ ॥
एवं युक्त्या तु विलिखेद् भूपुरत्रितयं शिवे ।
पार्श्वद्वयस्थैरष्टाभिः समैर्डमरुभिर्युतम् ॥ २३ ॥
त्रिभिश्च चत्वारिंशद्भिस्त्रिकोणैः सन्धिभिस्तथा ।
चतुर्विंशतिसङ्ख्याकैरष्टादशसुमर्मभिः ॥ २४ ॥
समबिन्दुत्रिकोणाग्रं विलिखेदतियुक्तितः ।
रेखारूपं समैवोच्चे भूमिकारूपमेव वा ॥ २५ ॥

---

1. दशाङ्गुलं हित्वा–क. ।

मिश्रितं वा कोणमयं सर्वत्राप्युक्तरीतितः ।
रत्ने सुवर्णे रजते त्रिलोहे वापि पीठके ॥ २६ ॥
ताम्रे वाश्मनि वा प्रोक्तयन्त्रं श्रीपूर्वकं भवेत् ।
कुण्डली शिवनाभं च सालिग्राममपीश्वरि ॥ २७ ॥
यन्त्रालाभे पूजनाय पीठं तु परिकल्पयेत् ।
तिर्यग्रेखा समाकीर्णा सार्धत्रिवलयैर्युता ॥ २८ ॥
अन्तःसूक्ष्मा बहिःस्थूला सर्पवेष्टनवत् स्थिता ।
मध्यगर्ता कुण्डली स्याद् वामावर्ता महाफला ॥ २९ ॥
शिवनाभसमारूढा सालिग्रामेण संयुता ।
द्वाभ्यां च सङ्गतायां तु सा सर्वत्र सुदुर्लभा ॥ ३० ॥
शिवनाभं[1] तु संयुक्तं सालिग्रामेण चेच्छिवे ।
दुर्लभं तत् त्रिलोक्यां तु तत्र पूजा महाफला ॥ ३१ ॥
यवार्धमानं लिङ्गं तु गर्तसंस्थं यदा भवेत् ।
तद् गौरीशिवनाभं स्यात् त्र्यस्रगर्तं ततोऽधिकम् ॥ ३२ ॥
सालिग्रामश्च चक्राढ्यश्चक्राधिक्ये महत् फलम् ।
नर्मदोद्भवलिङ्गेऽपि पूजयेदथवा शिवे ॥ ३३ ॥
अरक्तवर्णं [2]तच्चापि सक्षतं चिपिटं त्यजेत् ।
सुस्निग्धं वर्त्तुलं दीर्घं कुक्कुटाण्डसमं शुभम् ॥ ३४ ॥
अथवा प्रतिमायां तु पूजयेदगकन्यके ।
प्रतिमा ध्यानसदृशी नवरत्नादिनिर्मिता ॥ ३५ ॥
समानाङ्गा सुशोभाढ्या प्रसन्नवदनेक्षणा ।
क्रूररूपा कुलं हन्ति भग्ना दारिद्र्यदायिनी ॥ ३६ ॥
अथवा पुस्तके पूज्या यथोक्तविधिना शिवे ।
यन्त्रं मूर्तिं च गिरिजे त्यजेत् खण्डमयं तथा ॥ ३७ ॥
रिक्तगर्भं च यस्तत्र पूजयेत्तस्य वै मृतिः ।
प्रतिमां यन्त्रराजं च संस्कृत्यैव प्रपूजयेत् ॥ ३८ ॥

---

1. भात्तु–क. ।
2. तत्रापि–क. ।

स्थापयेद् देवतामूर्तिं यस्तस्य शृणु वै फलम् ।
समस्ततीर्थदानानां पुण्यानां शतधा फलम् ॥ ३९ ॥
चक्रस्थिरस्थापकानां फलं वक्ष्ये शृणु प्रिये ।
तत् प्रशंसन्ति वै देवा ब्रह्मविष्णुशिवादयः ॥ ४० ॥
तीर्थव्रताद्याचरणं पुण्यकर्माखिलं शिवे ।
एकतः संस्थितं चापि न समं चक्रसंस्थितेः ॥ ४१ ॥
त्रिपुरासाधकानां तु नान्यत् किञ्चिदितो वरम् ।
संस्थाप्य चक्रराजं तु मण्डलेशत्वमाप्नुयात् ॥ ४२ ॥
सकृद्दृष्ट्वा स्थिरं चक्रमाजन्मकृतपातकात् ।
मुक्तः सद्यो भवत्येव सत्यं प्रतिशृणोमि ते ॥ ४३ ॥
तस्माद् यत्नेन श्रीदेवीसाधकः सकृदेव वा ।
चक्रराजं स्थिरं पश्येत् स्पृशेदपि च पूजयेत् ॥ ४४ ॥
सप्तजन्मभवं पापं स्पर्शनान्नश्यति क्षणात् ।
पूजनात् त्रिपुरा तुष्टा वाञ्छितार्थान् प्रयच्छति ॥ ४५ ॥
पत्रं पुष्पं फलं तोयं यत्किञ्चिदपि वार्पितम् ।
फलानन्त्यप्रदं तत्तु तस्माद्यत्नेन पूजयेत् ॥ ४६ ॥
येन सस्थापितं यन्त्रं तस्या(स्य) शतकुलोद्भवाः ।
पितरः पुण्यलोकेषु वसन्त्यगणिताः समाः ॥ ४७ ॥
कुण्डल्यादौ पूजनं स्याद्यन्त्रालाभे तु सर्वथा ।
भूर्जे पट्टेऽथवा भूमौ लिखित्वा वापि पूजयेत् ॥ ४८ ॥
आद्ययोरष्टगन्धेन भूमौ सिन्दूररेणुना ।
षडङ्गुलान्यूनमिते भूर्जपत्रे समालिखेत् ॥ ४९ ॥
पट्टवस्त्रे विलेख्यं स्यादन्यूनं द्वादशाङ्गुलात् ।
भूमौ लिखेत् तथा यन्त्रं हस्तान्यूनं महेश्वरि ॥ ५० ॥
अन्यत्तु त्र्यङ्गुलान्यूनं धातुजं च शिलाभवम् ।
द्वादशाङ्गुलतश्चोर्ध्वं स्थावरं न तु जङ्गमम् ॥ ५१ ॥
ततो न्यूनमपि व्यर्थं स्थावरं यन्त्रमद्रिजे ।
तत्स्थापनविधिं वक्ष्ये शृणु देवि समाहिता ॥ ५२ ॥

दीक्षादिषूक्तदिवसे स्वयं वाचार्यतोऽपि वा ।
स्थापयेदुक्तविधिना स्थिरं वा चरमेव वा ॥ ५३ ॥
अत्राचार्यो गुरुर्वापि ज्येष्ठो वा भवतीश्वरि ।
नान्यः कदाचिदथवा स्वयं कुर्यात् तदाज्ञया ॥ ५४ ॥
ब्रह्माणं च सदस्यं च वृणुयात् सम्भवे सति ।
कृताह्निकः पूर्वदिने सङ्कल्प्य स्थापनं ततः ॥ ५५ ॥
स्वस्तिवाच्याथाभ्युदयं कृत्वा नत्वा गुरून् द्विजान् ।
संस्कृते पञ्चगव्ये तु पात्रे वै मज्जयेत् शिवे ॥ ५६ ॥
प्रणवेनाथ तस्मिंस्तु जपेदब्लिङ्गमन्त्रकान् ।
मूलं सहस्रधा जप्त्वा तत उद्धृत्य चान्यतः ॥ ५७ ॥
मूलाष्टमन्त्रितैः पञ्चामृतैश्चाप्यभिषेचयेत् ।
शुद्धतोयैश्च सन्धूप्य चन्दनाष्टकमिश्रिते ॥ ५८ ॥
वर्णौषधक्वाथजले मज्जयेन्मूलमन्त्रतः ।
देवतां पूजयेत् तत्र विशेषविधिना ततः ॥ ५९ ॥
रात्रौ जागरणं कार्यं गीतवाद्यकथादिभिः ।
परेऽह्नि वापि सङ्कल्प्य पद्ममष्टदलं लिखेत् ॥ ६० ॥
तस्मिन् मध्ये चाग्रतश्च कलशानां तु सप्तकम् ।
संस्थाप्योक्तविधानेन पूजयेदङ्गदेवताः ॥ ६१ ॥
मध्यमे त्रिपुरामिष्ट्वा स्पृशन् कलशसप्तकम् ।
अष्टाधिकशतं मूलं जपेन्मालामनुं तथा ॥ ६२ ॥
जलादुद्धृत्य तद्यन्त्रं शोधितं दोषजालतः ।
पीठे संस्थाप्य विविधवाद्यघोषपुरःसरम् ॥ ६३ ॥
तत्तन्मन्त्रेण कलशानभिषिच्य क्रमेण तु ।
शुद्धैर्जलैश्चाभिषिच्य मार्जयेच्छुद्धवाससा ॥ ६४ ॥
पीठं च कलशोदैश्चाभिषिच्याऽगतनूद्भवे ।
अमृतीकृत्य मूलेन प्रजप्याथाष्टधा ततः ॥ ६५ ॥
पञ्चरत्नं सुवर्णं च बन्धनौषधमेव च ।
पीठगर्ते विनिक्षिप्य मूलविद्यां च मातृकाम् ॥ ६६ ॥

जपन् संस्थाप्य मालां तु पठन् वै बन्धयेद् दृढम् ।
प्रत्यङ्मुखं तु संस्थाप्यमथवा प्राङ्मुखं शिवे ॥ ६७ ॥
प्रजप्य मूलाष्टशतं यथाविभवमर्चयेत् ।
आवाह्य चक्रराजं तु तत्प्राणस्थापनं चरेत् ॥ ६८ ॥
ततः प्रपूजयेत् तत्र होमं कुर्याद्यथाविधि ।
संस्थाप्याग्निं सावरणां गायत्रीमष्टधा हुनेत् ॥ ६९ ॥
अष्टोत्तरं सहस्रं वा शतं वा पायसं हुनेत् ।
होमशेषं समाप्याथ चक्रे देवीं प्रपूजयेत् ॥ ७० ॥
प्राणान् संस्थाप्य चादर्शं नैवेद्यं विविधौदनम् ।
समर्पयेत् प्रभूतं तु ततः पूजां समाचरेत् ॥ ७१ ॥
तोषयेच्च गुरून् विप्रान् वटुकाँश्च सुवासिनीः ।
दक्षिणावस्त्रभूषाद्यैर्भक्ष्यभोज्यैश्च शाङ्करि ॥ ७२ ॥
मूर्तिस्थापनमप्येवं चरं चापि हिमाद्रिजे ।
चरे पीठस्य संस्कारं पञ्चरत्नादिकं नहि ॥ ७३ ॥
उद्वासनं स्थिरे नास्ति सकृदावाहनं भवेत् ।
निमित्तेन स्थिरं वापि चरं वा स्थापयेत् पुनः ॥ ७४ ॥
तत्ते वदामि संक्षिप्य त्रिपुरार्णव(र्णाद)तः शृणु ।
रजस्वलाऽन्त्यजैश्चोरैर्विण्मूत्रासृक्श्वगर्दभैः ॥ ७५ ॥
वराहपतितैः स्पर्शे स्थानभ्रंशेऽग्निदाहके ।
शिलादिशुद्धिमुद्धृत्य कृत्वा संस्थापयेत् पुनः ॥ ७६ ॥
चोरैर्हृते खण्डिते वा तद्दिने स्यादभोजनम् ।
खण्डितं मूलमन्त्रेण चोद्धृत्य प्रक्षिपेज्जले ॥ ७७ ॥
पुनः संस्थापयेत् तत्र हृते चोरैरपीश्वरि ।
अमेध्यादिस्पर्शने च त्रिरात्रोर्ध्वमपूजने ॥ ७८ ॥
दृष्टादृष्टाशेषदोषशान्तये प्रतिवत्सरम् ।
महाभिषेकः कर्तव्यस्तद्विधानं शृणूच्यते ॥ ७९ ॥
संस्कृतैः पञ्चगव्यैश्च गन्धाष्टक-जलैस्तथा ।
संस्नाप्य कुशतोयेन मूलेनाष्टोत्तरं शतम् ॥ ८० ॥

प्रोक्ष्य संस्पृश्य मूलेन तत्त्वं मन्त्रं च मातृकाम् ।
विन्यस्य सिन्दूरकेन(ण) कुर्यादष्टदलाम्बुजम् ॥ ८१ ॥
तण्डुलोपरि तस्मिंस्तु दीक्षावत् कलशं न्यसेत् ।
देवतां तत्र सम्पूज्य जपेन्मूलं सहस्रधा ॥ ८२ ॥
मालामन्त्रं चाष्टधा च श्रीसूक्तं चाष्टधा तथा ।
प्रजप्य नित्यामन्त्राँश्च मातृकामूलमन्त्रतः ॥ ८३ ॥
अभिषिञ्चेत् ततो रात्रौ पूजयेत् तु विशेषतः ।
सुवासिनीर्ब्राह्मणाँश्च पूजयेद् गिरिकन्यके ॥ ८४ ॥
एतेन सर्वदोषाणां चरस्यापि स्थिरस्य च ।
यन्त्रस्य चाथवा मूर्तेः शान्तिः स्याद् गिरिराट्सुते ॥ ८५ ॥
प्रत्यब्दमेतत्कर्तव्यं स्थावरे वा चरेऽपि वा ।
दोषसम्भावनायां तु नूतने वापि शाङ्करि ॥ ८६ ॥
कर्तव्यं सर्वथा ह्येतत् त्रिपुरास्थितिहेतवे ।
महामहाभिषेके तु मालामन्त्रं च सूक्तकम् ॥ ८७ ॥
जपेच्चतुःषष्टिवारमष्टधा चापि वै हुनेत् ।
अशक्तेन ब्राह्मणैस्तु कारयेद्धवनं जपम् ॥ ८८ ॥
एवं सकृदनुष्ठानात् प्रसन्ना देवता भवेत् ।
एतत्तु स्थावरे कृत्वा वाजपेयफलं भवेत् ॥ ८९ ॥
सान्निध्यं त्रिपुरायास्तु नित्यं तत्र महेश्वरि ।
इति यत्तु त्वया पृष्टं तदाख्यातमगात्मजे ॥ ९० ॥

॥ इति श्रीत्रिपुरार्णवे त्रिपुरासारसर्वस्वे यन्त्रोद्धारादिश्चतुर्थस्तरङ्गः ॥ ४ ॥

●

अथ पञ्चमस्तरङ्गः

अद्रिकन्योवाच

विश्वेश श्रोतुमिच्छामि पूजाविधिमनुत्तमाम् ।
यथावत्तद्वद विभो त्रिपुरार्णवगोचरम् ॥ १ ॥

महादेव उवाच

शृणु प्रालेयाद्रिकन्ये पूजाया विधिमादरात् ।
श्रीयन्त्रादौ यथालब्धमेकं प्रोक्तसुलक्षणम् ॥ २ ॥
नवरत्नादिसम्भूते पीठे स्वच्छे मनोहरे ।
मृदु तूलाद्यासने च संस्थाप्य यन्त्रराजकम् ॥ ३ ॥
भूमौ वा केवले पीठे आसनादिविवर्जिते ।
संस्थाप्य देवतां रोगी भवेद् दारिद्र्यवानपि ॥ ४ ॥
पात्राण्यासाद्य तत्पश्चान्मध्ये पीठात्मनोः शिवे ।
संशोधितमुखो मन्त्री पूजयेत् त्रिपुराम्बिकाम् ॥ ५ ॥
जपादौ मुखदुर्गन्धो देवताशापमाप्नुयात् ।
अतो दुर्गन्धिनाशाय ताम्बूलादिकमिष्यते ॥ ६ ॥
ताम्बूलं पञ्चतिक्ताढ्यमथवा पञ्चतिक्तकम् ।
एलाद्यन्यतमं वापि मुखशोधनमुच्यते ॥ ७ ॥
जातीफलं च तत्पत्रं कर्पूरैलालवङ्गकम् ।
पञ्चतिक्तं समाख्यातं देवता-प्रीतिकारकम् ॥ ८ ॥
पीठं यजेत् सुपुष्पाद्यैरलङ्कृतमतीव तु ।
मण्डूकं कालाग्निरुद्रं मूलप्रकृतिमेव च ॥ ९ ॥
आधारशक्तिं कूर्मं चानन्तं पश्चाद् वराहकम् ।
एकैकस्योर्ध्वतश्चैतान् क्रमात् सम्पूज्य वै ततः ॥ १० ॥
पृथिवीं तस्य दंष्ट्राग्रे तच्चतुर्दिक्षु चाग्रतः ।
समुद्रानिक्षुमदिराधृतदुग्धमयान् क्रमात् ॥ ११ ॥

सप्तद्वीपं च तन्मध्ये नवखण्डविराजितम् ।
पञ्चाशद्वर्णसहितं तत्प्रागाद्यष्टदिक्षु वै ॥ १२ ॥
वामतः पुष्परागं च नीलवैडूर्यविद्रुमान् ।
मौक्तिकं गोमेदपद्मरागवज्रांस्तु मध्यमे ॥ १३ ॥
यजेन्मरकतं रत्नान्येतन्नामप्रपूर्वकम् ।
नाथवर्गसमायोगान्मध्ये सौवर्णपर्वतम् ॥ १४ ॥
तदूर्ध्वे नन्दनोद्यानं तस्मिन् कल्पद्रुमवाटिकाम् ।
तस्यामृतून् वसन्ताद्यान् तत्प्रत्यक्पूर्वयोः क्रमात् ॥ १५ ॥
इन्द्रियाश्वान् तदर्थात्मगजान् तन्मध्यतः शिवे ।
विचित्ररत्नभूमिं च यजेच्चक्रेश्वरीः क्रमात् ॥ १६ ॥
रत्नवन्नवकं कालमुद्रामातृश्च देशकम् ।
रत्नं गुरुं तत्त्वकं च ग्रहं मूर्तिं च मध्यमे ॥ १७ ॥
करुणातोयपरिखं स्वर्णप्राकारकं तथा ।
मध्येमणीमण्डपकं कोणेषु राक्षसादितः ॥ १८ ॥
शक्तीः कालं देशमथाकारं शब्दं च रूपिणीः ।
सङ्गीतयोगिनीं मध्ये तत्र वै मणिवेदिकाम् ॥ १९ ॥
श्वेतच्छत्रं पूर्वदिशि रत्नसिंहासनं ततः ।
तद्वायव्यादिपादेषु ब्रह्मादित्रयमीश्वरम् ॥ २० ॥
सदाशिव-महाप्रेतफलकं तस्य चोपरि ।
पादोर्ध्वेषु प्राग्वदेव धर्मं च ज्ञानमेव च ॥ २१ ॥
वैराग्यं चैश्वर्यमधर्माद्यान् पश्चिमादितः ।
तत्र मायां तत्र विद्यामनन्तं तत्र पूजयेत् ॥ २२ ॥
फणापञ्चदशोपेतं तस्य मध्यफणे स्मरेत् ।
अष्टपत्रं सुपद्मं तु तस्मिन्नेव प्रपूजयेत् ॥ २३ ॥
पद्ममानन्दकन्दं च संविन्नालमपीश्वरि ।
प्रकृतिमयपत्राणि विकारमयकेसरान् ॥ २४ ॥
कर्णिकां मातृतत्त्वाढ्यामर्केन्दू वह्निरेव च ।
प्रणवाद्यैः क्रमाद् देवि यजेत्प्रोक्तत्रिमण्डलम् ॥ २५ ॥

बोधप्रकृतिमोहोत्थं सत्त्वादित्रिगुणं क्रमात् ।
आत्मानमन्तरात्मानं परमात्मानमद्रिजे ॥ २६ ॥
ज्ञानात्मानं च ह्रीमाद्यं प्रागादिषु तु मध्यतः ।
तत्त्वात्मपञ्चकं ज्ञानं मायां तद्वत् कलामपि ॥ २७ ॥
विद्यां परं चादियोगात् पूर्वस्मादष्टपत्रके ।
मोहिनीं क्षोभिणीं तद्वद्वशिनीं स्तम्भिनीमपि ॥ २८ ॥
आकर्षिणीं द्राविणीं वै ततश्चाह्लादिनीमपि ।
क्लिन्नां ततः क्लेदिनीं तु मध्ये पश्चात्तु सर्वतः ॥ २९ ॥
क्लीं सर्वतत्त्वकमलासनमेवमगोद्भवे ।
एवं समर्चयेत् पीठमथापदि तु प्रोच्यते ॥ ३० ॥
मण्डूकात् परतत्त्वान्तं समष्ट्याभ्यर्च्य तत्परम् ।
अर्चयेत् पीठशक्त्याद्याः प्रोक्तरीत्या महेश्वरि ॥ ३१ ॥
इति पीठार्चनं प्रोक्तमाद्यबीजयुतान् यजेत् ।
प्रोक्तान्यत्राथ मूलार्चां वदामि शृणु संयता ॥ ३२ ॥

॥ इति श्रीत्रिपुरार्णवे त्रिपुरासारसर्वस्वे पीठपूजाविधिः पञ्चमस्तरङ्गः ॥ ५ ॥

●

अथ षष्ठस्तरङ्गः

महेश्वर उवाच

एवं पीठं समभ्यर्च्य पूजयित्वाऽऽत्मदेवताम् ।
आवाह्य त्रिपुरामाद्यां त्रिधा पूजां समाचरेत् ॥ १ ॥
पराख्यां मिश्ररूपां चापराख्यां क्रमतः शिवे ।

गौर्युवाच

कथं महेश त्रिविधा पूजा तत्र च को विधिः ॥ २ ॥
वद बालेन्दुचूडाल यदि मत्प्रीतिमानसि ।

शिव उवाच

शृणु देवि प्रवक्ष्यामि रहस्याच्च रहस्यकम् ॥ ३ ॥
गोपितं सर्वतन्त्रेषु न क्वचित् प्रकटीकृतम् ।
आत्मानं गन्धपुष्पाद्यैरभ्यर्च्य शिवरूपिणम् ॥ ४ ॥
स्वात्मीकृत्य स्वपात्रात् तु परापूजां समाचरेत् ।
ततः परापरां कृत्वा बाह्ये कुर्यात् ततोऽपराम् ॥ ५ ॥
सङ्घट्टमुद्रया मूर्ध्नि पादुकां प्रजपन् बुधः ।
आत्मानं शिवरूपं वै क्षणं ध्यायेन्निराश्रयः ॥ ६ ॥
एषा परा सपर्योक्ता मिश्रा तु द्विविधा स्थिता ।
स्थूलसूक्ष्मविभेदेन स्थूलं मानसमर्चनम् ॥ ७ ॥
सूक्ष्मं जगन्मातृमन्त्रसामरस्यात्मचिन्तनम् ।
बाह्योपचाररूपा तु[1] बाह्यपूजाऽपराऽभिधा ॥ ८ ॥
मानसार्चा तु या स्थूला सा ज्ञेया गुरुमार्गतः ।
षडाधारे त्रिपीठे वा भुवनेऽध्व-क्रमेऽथवा ॥ ९ ॥
ज्ञात्वोपदेशमार्गेण जपादिषु समाचरेत् ।
अशक्तो बाह्यपूजायां कुर्यादन्तःप्रपूजनम् ॥ १० ॥

---

1. तु पूजा स्यादपराभिधा–क.।

समर्थस्तु यथा साङ्गं कुर्याद् विस्तारतोऽपि च ।
मन्त्रपाठं प्रकुर्वंश्च तदानन्त्यफलं स्मृतम् ॥ ११ ॥
सूक्ष्मे तु सामरस्यात्मचिन्तनं प्रब्रवीमि ते ।
वाच्यानां वाचकं रूपं तत्पूर्वं प्रतिभासनात् ॥ १२ ॥
वाचका मातृकारूपा सा त्रिखण्डा त्रिकूटगा ।
कूटत्रयं च स्थूलादिस्वात्मरूपं महेश्वरि ॥ १३ ॥
बाह्योपकरणैः पूजा तृतीया त्वपरा स्मृता ।
एवं तु मिश्रपूजां तां कृत्वा विन्यस्य व्यापकम् ॥ १४ ॥
पुष्पाण्यञ्जलिनादाय बिन्दौ पञ्चशिवात्मके ।
मञ्चे कामेशवामाङ्के ध्यात्वोक्तां त्रिपुरां पराम् ॥ १५ ॥
उत्थाप्य कुण्डलीं मार्गाच्छिवेन्दुसहितां स्मरन् ।
तेजोमयीं तु संयोज्य पुष्पेष्वथ विनिक्षिपेत् ॥ १६ ॥
मूर्ध्नि तस्यास्तु तत्पश्चात् प्रविष्टां भास्वरूपतः ।
साङ्गां विमृश्य पूर्वोक्तां मन्त्रपाठप्रपूर्वकम् ॥ १७ ॥
आवाहयेद् ब्रह्मरन्ध्रे ध्यातां तेजोमयीं पराम् ।
तत्प्रकारं शृणु परे त्रिपुराम्बामनुं पठन् ॥ १८ ॥
महापद्मवनान्तःस्थे कारणानन्दरूपिणि ।
सर्वभूतहिताकारे एह्येहि त्रिपुरे शिवे ॥ १९ ॥
एह्येहि देवदेवेशि त्रिपुरे परमेश्वरि ।
परामृतप्रिये मातः सन्निधानं कुरु प्रिये ॥ २० ॥
देवेशि भक्तिसुलभे सर्वावरणसंयुते ।
यावत् त्वां पूजयिष्यामि तावत् त्वं सुस्थिरा भव ॥ २१ ॥
इत्येवं प्रार्थयन् तत्र समावाह्य प्रदर्शयेत् ।
आवाहनाद्याः षण्मुद्राः क्रमेण तु निदर्शयेत् ॥ २२ ॥
आवाहनं वै[1] मुख्यस्य यथोक्तविधिना भवेत् ।
अन्यत्राङ्गेषु ध्यातानामागतानां विभावनम् ॥ २३ ॥
एवं विज्ञाय कुर्वीत नान्यथाऽद्रितनूद्भवे ।
अङ्गं विन्यस्य सकलीकृत्य धेनुं प्रदर्श्य च ॥ २४ ॥

---

1. वै' इत्यस्य स्थाने 'च'–क. ।

त्रिधा मूलेन सम्प्रोक्ष्य विप्रुड्भिः शङ्खसंस्थितैः ।
प्राणान् प्रतिष्ठाप्य पश्चात् सावृतेर्हृदि संस्पृशन् ॥ २५ ॥
मूलमष्टशतं जप्त्वा ततो मुद्राः प्रदर्शयेत् ।
त्रयोदशविधाः पश्चाद् विशेषार्घ्यात् तु तर्पयेत् ॥ २६ ॥
उपचारैस्ततो देवीं पूजयेद् भक्तिसंयुक्तः ।
षोडशैर्वा चतुःषष्टिविधैर्वापि तु पूजयेत् ॥ २७ ॥
तत्प्रकारं ब्रुवे देवि क्रमेण शृणु साम्प्रतम् ।
आसनं स्वागतं चार्घ्यं पाद्यमाचमनं ततः ॥ २८ ॥
मधुपर्कं चाचमनं स्नानभूमिप्रवेशनम् ।
स्नानवस्त्रं चासनं च दन्तधावनमेव च ॥ २९ ॥
गण्डूषणं मुखस्याथो क्षालनं प्रोञ्छनं शिवे ।
आचामोऽभ्यञ्जनं केशशोधनं चाङ्गशोधनम् ॥ ३० ॥
उष्णोदकैः पञ्चसङ्ख्यामृतैः फलरसैर्जलैः ।
आचामोऽङ्गप्रमार्जश्च तत्पश्चादद्रिकन्यके ॥ ३१ ॥
दुकूलं कञ्चुकं चान्ते पुनराचमनं तथा ।
ब्रह्मसूत्रं भूषणानां[1] स्थानयानं तथासनम् ॥ ३२ ॥
भूषणानि विचित्राणि यागस्थानप्रवेशनम् ।
कामेश्वराङ्कोपवेशं गन्धाक्षतसुमानि च ॥ ३३ ॥
धूपं दीपं च नैवेद्यं पूर्वापोशनमेव च ।
प्रार्थनं प्राणमुद्रा च पानीयापोशनं परम् ॥ ३४ ॥
हस्तक्षालनगण्डूषौ करोद्वर्त्तनकं ततः ।
पाद्यमाचमनीयं च फलं ताम्बूलमेव च ॥ ३५ ॥
दक्षिणामारार्तिकं च परिक्रामं नमस्क्रिया ।
पुष्पाञ्जलिं स्तोत्रमपि छत्रचामरवीजनान् ॥ ३६ ॥
गीतं वाद्यं प्रनृत्यं च निवेदनमतः परम् ।
चतुःषष्ट्युपचारोऽयं त्रिपुराप्रीतिवर्धनः ॥ ३७ ॥
पाद्यार्घ्याचमनस्नानवस्त्राभरणचन्दनम् ।
पुष्पधूपदीपभक्ष्यताम्बूलाऽऽरतिपूजनम् ॥ ३८ ॥

---

1. णानि स्था-क. ।

प्रदक्षिणा-नमस्कारावुपचारास्तु षोडश ।
गन्धपुष्पधूपदीपनैवेद्यं पञ्चपूजनम् ॥ ३९ ॥
पुनः पूजनके चैतज्जपादौ मानसेऽपि च ।
धराव्योमवायुतेजोऽमृतरूपां क्रमाद् यजेत् ॥ ४० ॥
आसनं नवरत्नादि-पीठवस्त्रादिसम्भवम् ।
गन्धपू(पु)ष्पाक्षतयवदूर्वासर्षपसंयुतम् ॥ ४१ ॥
कुशरत्नतिलैस्तोयमर्घ्यं स्याद् देवताप्रियम् ।
कर्पूरतोयैः पाद्यं च तथाचमनमेव च ॥ ४२ ॥
मधुदुग्धदधिस्वाज्यशर्कराफलसंयुतम् ।
मधुपर्कं[1] तु कांस्ये[2] स्यादथवा हैमराजते ॥ ४३ ॥
तोयोपचारे सर्वत्र सुवासितजलं भवेत् ।
सुगन्धितैलैरभ्यङ्गं तथा द्रव्यैश्च शोधनम् ॥ ४४ ॥
स्नानं नानाविधजलैस्तीर्थानीतैः सुनिर्मलैः ।
कुर्यादचालयन् देवि यन्त्राद्यं देवतार्चनम् ॥ ४५ ॥
अभिषिच्यैव यन्त्राद्ये पूजयेत् त्रिपुराम्बिकाम् ।
यत उद्वासनात्पूर्वं कुप्यत्युच्चालने परा ॥ ४६ ॥
श्रीसूक्तेनाभिषेके तु कृते प्रीता भवेत् परा ।
यस्मात्परावाचकं तदतो नान्यत्तु तत्समम् ॥ ४७ ॥
वस्त्रं तु नवरत्नाद्यं रक्तकौशेयमुत्तमम् ।
कौसुम्भमप्यतीवेष्टं देवताया हिमागजे ॥ ४८ ॥
हरिद्रां चापि सिन्दूरं कुङ्कुमं कज्जलं तथा ।
सौभाग्यद्रव्यकं देयं देव्यै सौभाग्यमिच्छता ॥ ४९ ॥
उक्तोपचारादधिकैः सम्भवे सति पूजयेत् ।
केशधूपाङ्गरागादि-श्रेष्ठराजोपचारकैः ॥ ५० ॥
चन्दनैरष्टगन्धैश्च नानापुष्पैः सुगन्धिभिः ।
शाकसूपौदनापूपभक्ष्यलड्डुकसंयुतम् ॥ ५१ ॥

---

1. पर्के तु–क.।
2. कांस्यं स्याद–क.।

पायसेन समायुक्तं नैवेद्य परिकल्पयेत् ।
पायसेन विना सर्वं न श्रीदेव्याः प्रियं भवेत् ॥ ५२ ॥
केवलं पायसेनापि प्रीता भवति सुन्दरी ।
पञ्चतिक्तसमायुक्तं ताम्बूलं च मनोहरम् ॥ ५३ ॥
तत आरार्तिकं कुर्यात् त्रिपुराप्रीतिकारकम् ।
स्वर्णादिपात्रे देवेशि पञ्चवर्णैः प्रकल्पयेत् ॥ ५४ ॥
पद्मं वा स्वस्तिकं वापि चान्या वा रङ्ग-वल्लिका ।
सुशोभना कृता तत्र षोडश द्वादशापि वा ॥ ५५ ॥
नव सप्त पञ्च वापि त्रयं वा दीपपात्रकम् ।
डमर्वाकारमपि च पिष्टजं वोदनोद्भवम् ॥ ५६ ॥
सुवर्णादिधातुजं वा चैकं वाप्युक्तसंख्यया ।
वर्तिकासंयुतं तच्च[1] घृतपूर्णं प्रकल्पयेत् ॥ ५७ ॥
सर्वतोभद्रसंयुक्तं महापुण्यफलप्रदम् ।
नानाविधसुयन्त्राढ्यं बीजाक्षरसमन्वितम् ॥ ५८ ॥
देवताप्रीतिजनकमारार्त्तिकमिहेश्वरि ।
एवं श्रीत्रिपुरां देवीं पूजयेदुपचारकैः ॥ ५९ ॥
चतुष्षष्टिविधैस्तद्वदथवा षोडशात्मकैः ।
सर्वं सम्यग्भावनया कर्त्तव्यमगराट्सुते ॥ ६० ॥

॥ इति श्रीत्रिपुरार्णवे त्रिपुरासारसर्वस्वे आवाहनाद्युपचारकथनं नाम षष्ठस्तरङ्गः ॥ ६ ॥

---

1. तच्च–क.।

अथ सप्तमस्तरङ्गः

गौर्युवाच

चन्द्रशेखर देवेश सम्पूज्याथोपचारकैः ।
ब्रूहि कर्तव्यमखिलं मम विस्तरशः प्रभो ॥ १ ॥

शङ्कर उवाच

शृणु तच्चन्द्रचूडाले विधिं तत्पश्चिमं स्फुटम् ।
उपचारैरेवमिष्ट्वा पूजयेदावृतिं ततः ॥ २ ॥
तत्रादौ मूलदेवीं तु सर्वादौ च त्रिधा यजेत् ।
सव्य-दक्षकराभ्यां च बिन्दुभिः कुसुमाक्षतैः ॥ ३ ॥
द्वितीयाद्युद्धृतैः सम्यक् तत्तत्स्थाने विभावयन् ।
श्रीपादुकां पूजयामि तर्पयामि नमो वदन् ॥ ४ ॥
तत्तन्नाम पठित्वा तु तत एतदुदीरयेत् ।
प्रतिपत्तिथिमारभ्य पर्वान्तं शुक्लकृष्णयोः ॥ ५ ॥
कामेश्वर्यादिचित्रान्ताश्चानुलोमविलोमतः ।
नित्यास्त्रिकोणे रेखासु दक्षपूर्वोत्तरासु वै ॥ ६ ॥
पञ्चकं प्रतिरेखायां ज्ञात्वा तत्तिथिजां यजेत् ।
उदयव्याप्तितिथिजां तिथिनित्यां प्रपूजयेत् ॥ ७ ॥
क्षये नित्याद्वयं वृद्धावेकां नित्यां दिनद्वये ।
ततो नित्यामण्डलं तु पूजयेत् पूर्ववत्क्रमात् ॥ ८ ॥
तथैव षोडशीमिष्ट्वा गुरुमण्डलकं यजेत् ।
तत्रौघा बहुधा भिन्नाः प्रकृतं तत्र वै शृणु ॥ ९ ॥
अष्टकोणस्य पश्चात् तु त्रिकोणात्पूर्वभागतः ।
चतुरस्रे महाक्षेत्रे गुरूणां पूजनं भवेत् ॥ १० ॥
रेखात्रयं तत्र तिर्यक् स्मृत्वौघत्रयमर्चयेत् ।
प्रत्यग्रेखां समारभ्य चौघरेखासु वै क्रमात् ॥ ११ ॥

परप्रकाशोऽथ परशिवः शक्तिस्तदादिका ।
कौलेश्वरः शुक्ला देवी कुलेश्वरः कामेश्वरी ॥ १२ ॥
भोगोऽथ क्लिन्नसमयौ सहजो गगनस्ततः ।
विश्वो विमलमदनौ भुवनो लील एव च ॥ १३ ॥
स्वात्मा प्रियश्चाद्विवेदनागसङ्ख्याः क्रमात् स्मृताः ।
दिव्यौघश्चापि सिद्धौघो मानवौघस्ततः परम् ॥ १४ ॥
एवमोघं समभ्यर्च्य मानवौघस्य चान्ततः ।
शिवादींस्तर्पयेज्ज्ञाते नवमाद्यानथापि वा ॥ १५ ॥
तृतीयादीन् वापि तथा तत्तन्मन्त्रैस्तु तर्पयेत् ।
रेखात्रये समष्ट्या तु महाश्रीपादुकां यजेत् ॥ १६ ॥
तत्तद्रेखासु सम्पूज्य पुष्पाञ्जलिभिरद्रिजे ।
तर्पयेत् क्रमतश्चौघान् परांश्चापि परापरान् ॥ १७ ॥
अपरानपि देवेशि ततोऽङ्गाख्याः प्रपूजयेत् ।
ततो भूपुररेखासु पूजयेदणिमादिकाः ॥ १८ ॥
ब्राह्म्यादिकास्तथा मुद्राः पश्चिमादिचतुर्ष्वपि ।
वायव्यादिषु कोणेषु पार्ष्णि-राक्षसमध्यतः ॥ १९ ॥
हरीशयोस्तथा मध्ये क्रमेणैव तु तर्पयेत् ।
त्रैलोक्यमोहनं चक्रं पुष्पाञ्जल्यादितोऽर्चयेत् ॥ २० ॥
तत्तद्रेखां समभ्यर्च्य चाणिमाद्याः प्रपूजयेत् ।
ततः पुष्पाञ्जलिं दत्त्वा सर्वाशापरिपूरके ॥ २१ ॥
प्रत्यग्दलादिवामेन कामाकर्षिणिका यजेत् ।
सर्वसंक्षोभणं चक्रं पुष्पाञ्जल्या प्रपूज्य च ॥ २२ ॥
पूर्वादितो दलेष्वेवमाग्नेय्यादित एव च ।
सन्तर्प्यानङ्गकुसुमा-प्रमुखाः क्रमशस्ततः ॥ २३ ॥
पूजयेत् सर्वसौभाग्यदायकं चक्रमद्रिजे ।
प्रत्यक्कोणात्तु वामेन यजेत् संक्षोभिणीमुखाः ॥ २४ ॥
सर्वार्थसाधके तद्वदिष्ट्वा पूर्वक्रमेण तु ।
सिद्धिप्रदाद्याः सन्तर्प्याः सर्वरक्षाकरे तथा ॥ २५ ॥

सर्वज्ञाद्याः सर्वरोगहरेऽर्च्या वशिनीमुखाः ।
पूर्वक्रमेण तत्पश्चात् सर्वसिद्धिप्रदायके ॥ २६ ॥
पुष्पाञ्जलिं प्रदायेत्थमायुधानि प्रपूजयेत् ।
त्रिकोणकोणेषु ततो कामेश्वर्यादिकं त्रयम् ॥ २७ ॥
तुर्यां समष्ट्या संपूज्य सर्वानन्दमयेऽर्चयेत् ।
मूलदेवीं तु तत्पश्चात् समष्ट्या चैकरूपतः ॥ २८ ॥
ध्यात्वाऽखण्डां समभ्यर्च्य मूलां तु शतधा यजेत् ।
तत्तदावरणस्यान्ते चक्रेशीस्त्रिपुरादिकाः ॥ २९ ॥
प्रकटाद्या योगिनीश्चाप्याद्यायाः पुरतो यजेत् ।
वामदक्षिणयोर्देवि चक्रेश्वर्या क्रमेण तु ॥ ३० ॥
मुद्राः सिद्धीश्च सम्पूज्या नाथान्षड्दर्शनानि च ।
षडाधारानध्वषट्कं द्विशः सन्तर्पयेत् क्रमात् ॥ ३१ ॥
समर्पयेत् तत्तदन्ते पुष्पाञ्जल्या प्रपूजयेत् ।
अभीष्टसिद्धिं मे देहि शरणागतवत्सले ॥ ३२ ॥
भक्त्या समर्पये तुभ्यं तत्तदावरणार्चनम् ।
नित्यामन्त्राः स्वराद्याः स्युर्बालाद्याद्यास्तथौघकाः ॥ ३३ ॥
अणिमास्त्वाद्यबीजाद्या ब्राह्म्याद्या दीर्घसंयुताः ।
मुद्रा-बीजादिकाः कामाकर्षिण्याद्याः स्वरादिकाः ॥ ३४ ॥
काद्यष्टवर्गसंयुक्तास्त्वनङ्गाद्याः प्रकीर्तिताः ।
काद्याः संक्षोभिणीमुखा णाद्याः सिद्धिप्रदायिकाः ॥ ३५ ॥
माद्यादिकास्तु सर्वज्ञा वर्गाद्या वशिनीमुखाः ।
एतत्ते सर्वमाख्यातं यत्ते शुश्रूषितं पुरा ॥ ३६ ॥

॥ इति श्रीत्रिपुरार्णवे त्रिपुरासारसर्वस्वे आवरणकथनं नाम सप्तमस्तरङ्गः ॥ ७ ॥

●

अथाष्टमस्तरङ्गः

देव्युवाच

वृषवाहावृतिं ध्यानं पूजां च तदनन्तरम् ।
अत्रानुक्तं तु यत्सर्वं कृपया वद मानद ॥ १ ॥

महादेव उवाच

शृणु सर्वाङ्गसुभगे सावधानेन चेतसा ।
पीतशुक्लरक्तवर्णाः प्रत्येकं तु त्रिपञ्चिकाः ॥ २ ॥
कामेश्वरीमुखाश्चैव महाविद्येश्वरीमुखाः ।
तथा नीलपताकाद्यास्त्वेवं प्रोक्तास्त्रिपञ्चिकाः ॥ ३ ॥
सृणिपाशवराभीतिकरा मालां च पुस्तकम् ।
धनुर्बाणान् दधानाश्च मूलदेव्यायुधाः पराः ॥ ४ ॥
तथा वर्णांशुका भूषास्त्रिणेत्राश्चन्द्रशेखराः ।
एवं नित्याः सुसम्पूज्या ध्यात्वा निश्चलमानसः ॥ ५ ॥
चन्द्रकोटिप्रभानिन्दुभूषान्नेत्रत्रयोज्ज्वलान् ।
चित्पुस्तकाभयवरकरान् श्वेतांशुकादिकान् ॥ ६ ॥
रक्तशक्त्याढ्यवामाङ्कान् ध्यायेदोघादिकान् गुरून् ।
त्रिकोणाद् बहिराग्नेयरुद्रासुरमरुत्सु च ॥ ७ ॥
पुरतश्च चतुर्दिक्षु चाङ्गदेवीः प्रपूजयेत् ।
सर्वज्ञा नित्यतृप्ताऽनादिबोधा च स्वतन्त्रका ॥ ८ ॥
तथा नित्यमलुप्ता चानन्ता चापि क्रमाच्छिवे ।
मूलदेवीसमानाभा ध्यात्वा पूज्याङ्गदेवताः ॥ ९ ॥
शुक्लरक्तपीतवर्णा रेखा भू-सदनस्य वै ।
नृपपत्रमिन्दुनिभमष्टपत्रं जपारुणम् ॥ १० ॥
मनुकोणं दाडिमाभं सिन्दूरकुङ्कुमप्रभम् ।
द्विदशारं तु माणिक्यनिभमष्टास्रकं भवेत् ॥ ११ ॥

रक्तशुक्लविमिश्राभं बैन्दवं चक्रमद्रिजे ।
अङ्कुशं पाशमपि च पद्मद्वयकराः शिवे ॥ १२ ॥
अणिमाद्या रक्तवर्णा बालेन्दुकृतशेखराः ।
लोहितोत्पलयुग्मं च नृकपालद्वयं तथा ॥ १३ ॥
नीलोत्पलनिभाश्चापि नीलाम्बरविभूषणाः ।
सृणिं पाशं स्वमुद्रां च दधानाः क्रमशः शिवे ॥ १४ ॥
सर्वसंक्षोभिणीमुख्या रक्ताङ्गांशुकभूषणाः ।
अङ्कुशं पाशममृतपूर्णस्फटिकपात्रकम् ॥ १५ ॥
वरं दधानाः शुक्लाभाः कामाकर्षिणिकामुखाः ।
पूर्वद्वयं चेन्द्रनीलपात्रनीलोत्पलं तथा ॥ १६ ॥
दधाना रक्तवर्णाभाश्चानङ्गकुसुमादिकाः ।
पूर्वद्वयं रत्नमयदर्पणामृतपात्रकम् ॥ १७ ॥
बिभ्रत्यो रक्तवर्णाङ्गाः सर्वसंक्षोभिणीमुखाः ।
प्राक्प्रोक्तद्वितयं भूषा मञ्जूषां रत्ननिर्मिताम् ॥ १८ ॥
सिताङ्गा धारयन्त्यश्च सर्वसिद्धिप्रदा मुखाः ।
टङ्कपाशज्ञानवरधराज्ञाद्यारुणाङ्गकाः ॥ १९ ॥
पुष्पबाण।।न् पुण्ड्रचापं विद्यावरलसद्भुजाः ।
वशिन्याद्या रक्तवर्णगात्रवस्त्रविभूषणाः ॥ २० ॥
मूर्ध्न्यासक्तस्वायुधोद्यदूर्ध्वबाहुद्वयास्तथा ।
अभीवरकरा रक्तवर्णाश्चायुधदेवताः ॥ २१ ॥
दक्षाग्राद् वामतः कोणे पीतश्वेतारुणप्रभाः ।
मूलदेवीसुताः काम(श्व)री-मुख्यारुणप्रभाः ॥ २२ ॥
मूलदेव्याः पुरा ध्यानमुक्तमद्रीशकन्यके ।
तथा खण्डामपि ध्यायेत् पञ्चिकां तु ततो यजेत् ॥ २३ ॥
तत्राद्या मूलदेवी स्याद् दक्षे वामे च पार्श्वके ।
द्वयं प्रदक्षिणेनैव यजेद् ध्यात्वा महेश्वरि ॥ २४ ॥
लक्ष्म्यम्बापञ्चकं चाद्यं बालेन्दुकृतभूषणम् ।
रक्तवर्णं त्रिणयनं मूलदेव्यायुधैर्युतम् ॥ २५ ॥

सर्वत्र चैवं ध्यात्वा वै क्रमेणैव तु तर्पयेत् ।
लक्षी(क्ष्मी) चापि महालक्ष्मी त्रिशक्त्याद्या ततः परा ॥ २६ ॥
साम्राज्यलक्ष्मी चेत्येवं लक्ष्म्यम्बापञ्चकं स्मृतम् ।
परं ज्योतिर्निष्कला च पराद्या शाम्भवी ततः ॥ २७ ॥
अजपा मातृका चेति कोशाम्बापञ्चकं भवेत् ।
पञ्चकामा पारिजाता चेश्वरी च कुमारिका ॥ २८ ॥
पञ्चबाणेश्वरी चेति पञ्चकल्पलताभिधाः ।
ततश्चामृतपीठेशी सुधासूरमृतेश्वरी ॥ २९ ॥
अन्नपूर्णा चाद्रिकन्ये पञ्चकामदुघास्त्विमाः ।
सिद्धलक्ष्मी च मातङ्गी ततस्तु भुवनेश्वरी ॥ ३० ॥
वाराही चेति संप्रोक्ताः पञ्चरत्नाभिधास्त्विमाः ।
एताः समभ्यर्च्य पञ्चपञ्चिकाख्यास्ततः परम् ॥ ३१ ॥
षोढा-न्यासोदिताशेषदेवताश्चापि पूजयेत् ।
गणेशं षोडशदलबाह्येऽग्राद् वृत्तरीतितः ॥ ३२ ॥
ग्रहान् बिन्द्वादिनवके नक्षत्राणि त्रयं त्रयम् ।
योगिन्यः कोणचक्रेऽशं राशयोऽष्टदलाद् द्विशः ॥३३ ॥
पीठान्यष्टदलाद् बाह्ये वृत्ते त्वेवं प्रपूजयेत् ।
आम्नायांस्तु चतुर्द्वारे युक्त्या स्थानं तु पूर्ववत् ॥ ३४ ॥
कथञ्चिदप्यसंसिद्धस्थानानां स्थानमीरितम् ।
पूर्वप्रोक्तप्रयुक्त्यैव ततः स्यात् समयार्चनम् ॥ ३५ ॥
कामेश्वरीत्रयं तुर्या महात्रिपुरसुन्दरी ।
इत्येतत् कथितं देवि यथावत् पूजनादिकम् ॥ ३६ ॥

॥ इति श्रीत्रिपुरार्णवे त्रिपुरासारसर्वस्वे आवरणध्यानकथनं नामाष्टमस्तरङ्गः ॥ ८ ॥

●

अथ नवमस्तरङ्गः

देव्युवाच

देवेश श्रोतुमिच्छामि विधिमर्घ्यस्य साधने ।
त्रिपुरार्णवसम्प्रोक्तं तन्ममाचक्ष्व शङ्कर ॥ १ ॥

श्रीशिव उवाच

शृणु त्रैलोक्यशुभदे पात्राणां विधिमुत्तमम् ।
सर्वत्र गोपितं ह्येतत् सावधानेन चेतसा ॥ २ ॥
हेतुकुम्भं च सामान्यं विशेषार्घ्यमिति त्रयम् ।
पात्राणामथ तोयस्य कलशं चेति शङ्करि ॥ ३ ॥
हेतुकुम्भं विशेषार्घ्यं सौवर्णं राजतं तथा ।
शिलाशङ्खालाबुनारिकेलकाचमहीमयम् ॥ ४ ॥
सामान्यार्घ्यं शङ्खमयं कुर्यात् तद्विधिरुच्यते ।
शङ्खोदरस्थितावर्त्तं युक्त्या निःसार्य तत्र तु ॥ ५ ॥
योनित्रयं तथैकां वा शङ्खं कुर्याद् विचक्षणः ।
सौवर्णं सौख्यजननं राजतं वश्यकारकम् ॥ ६ ॥
शिलाभवं रिपुहरं शङ्खं ज्ञानप्रदं भवेत् ।
आ(अ)लाबुजं पापहरं नारिकेलमरोगदम् ॥ ७ ॥
काचं मनः शुचिकरं मृण्मयं पुष्टिकारकम् ।
रुचिराणि तु पात्राणि सुप्रमाणयुतानि च ॥ ८ ॥
साधाराणि पिधानेन सहितानि महेश्वरि ।
नारिकेलं तु तिर्यक् स्यात् सार्धनेत्रसमन्वितम् ॥ ९ ॥
अनन्तयज्ञफलदं तस्मादुत्तममुच्यते ।
अनेत्रं वा द्विनेत्रं वा पिशाचानां प्रियङ्करम् ॥ १० ॥
एकनेत्रं राक्षसं स्यादाधाराण्यथ ते ब्रुवे ।
वर्त्तुलं वा त्रिकोणं वा सपादं वाप्यपादकम् ॥ ११ ॥

आवश्यकं तद्विना तु सर्वं तद्रूपं स्मृतम् ।
आधारेण विना पात्रं शक्रस्याप्यशुभप्रदम् ॥ १२ ॥
तथाच्छादनहीनं च सुकृतानां प्रणाशनम् ।
एवं त्रिपात्रं संस्थाप्य पूजां कुर्याद् यथाविधि ॥ १३ ॥
कुलद्रव्यैः साधितैस्तु शुद्धैर्दोषविवर्जितैः ।
सामान्यार्घ्य–विशेषार्घ्यावनुकल्पेन पूजने ॥ १४ ॥
एकपात्रं नान्यथा तु कुर्याद्धानिस्ततो भवेत् ।
विशेषार्घ्यान्न वीराणां शक्तीनां हेतुपात्रतः ॥ १५ ॥
ततो निषिद्धमन्यत्र प्रोक्तमप्येकपात्रकम् ।
आत्मयोगपराणां तु नाङ्गलोपेन हीयते ॥१६॥
तस्मात्तैरेव कर्तव्यं तोयपात्रं तु ताम्रजम् ।
तथा नैवेद्यपात्रं तु कांस्यमुत्तममुच्यते ॥ १७ ॥
बलिपात्रं ताम्रभवं नैवान्यत्तु कदाचन ।
तथार्घ्यपात्रं देवेशि चैवं पात्राणि साधयेत् ॥ १८ ॥
वृत्तं च चतुरस्रं च गन्धतोयैस्तु मण्डलम् ।
कृत्वा तत्र षडङ्गं तु पूजयेत् कुसुमाक्षतैः ॥ १९ ॥
अग्नीशराक्षसमरुन्मध्ये दिक्षु च पूजयेत् ।
जलपात्रं तु साधारं तत्र निक्षिप्य शङ्करि ॥ २० ॥
तीर्थं समावाह्य तस्मिन्नमृतीकृत्य पूजयेत् ।
मूलं प्रजप्य त(द्)ध्यायेत् तीर्थरूपं तु पार्वति ॥ २१ ॥
हेतुपात्राधरे तद्वद् वृत्तं च चतुरस्रकम् ।
त्रिकोणमपि कृत्वा तु वृत्ते मण्डलपूजनम् ॥ २२ ॥
चतुरस्रे षडङ्गानि त्रिकोणे तु त्रिपीठकम् ।
तत्राधारं विनिक्षिप्य तत्राग्निकलया यजेत् ॥ २३ ॥
प्रागादिवृत्तरूपेण दश धूम्रादिकांस्ततः ।
अलङ्कृतं हेतुपात्रं धूपितं चास्त्रक्षालितम् ॥ २४ ॥
विन्यस्य पूर्ववत् तत्र द्वादशार्ककला यजेत् ।
सम्पूज्य पात्रं तत्पश्चाद् द्वितीया द्वित्रिपात्रकम् ॥ २५ ॥

सामान्यमण्डले न्यस्य सम्पूज्याग्निकलात्मकम् ।
आधारं तत्र पात्रेषु यजेत् सूर्यकला अपि ॥ २६ ॥
द्वितीयं च तृतीयं च मुद्रां तत्र क्रमान्न्यसेत् ।
सम्प्रोक्ष्य कलशोदैस्तु तथा संशोध्य मन्त्रकैः ॥ २७ ॥
यजेत् सोमकलास्तेषु सामान्यार्घ्यं तथा यजेत् ।
आपूर्य कलशोदैस्तु सर्वं तैरेव पावयेत् ॥ २८ ॥
ततस्तु योगिनीं ध्यायेन्निर्विकल्पस्वभावतः ।
सुवासिनीं हेतुपात्रधरां ध्यात्वा समर्चयेत् ॥ २९ ॥
अरुणामरुणालेपभूषावस्त्रधरां शुभाम् ।
मन्दस्मितानन्दमुखां हेतुपात्रलसत्कराम् ॥ ३० ॥
पुष्पाक्षताद्यैः सम्पूज्य तत्पात्रं संस्पृशन् जपेत् ।
त्रिधा तु मातृकां पञ्चधाऽमृतेशीं च सप्तधा ॥ ३१ ॥
वासुदेवं द्वादशार्णं नवधा मूलमीश्वरि ।
आदाय योगिनीहस्तात् कलशं न्यस्य चाग्रतः ॥ ३२ ॥
पथिकाः पूजयेत् पश्चाच्छोधनं चापि दोषतः ।
तर्पयेत् पथिकाख्यास्तु कुसुमोद्धृतबिन्दुभिः ॥ ३३ ॥
पथि नानाविधा दोषास्ते सर्वे द्रव्यसंश्रिताः ।
तस्माद् दुष्टेन भागेन पथिकाख्यास्तु तर्पयेत् ॥ ३४ ॥
दोषभागविनिर्मुक्तं द्रव्यं तेन पवित्रितम् ।
एकमेवेति सम्प्रोक्ताऽऽथर्वणैः शुक्रशापतः ॥ ३५ ॥
मोचयेत्तु त्रिभिर्मन्त्रैः संस्पृशन् हि समाहितः ।
हेतोस्तु बहुधा शापांस्तत्तन्मन्त्रेण पावयेत् ॥ ३६ ॥
अपावितमनर्हं स्यात् पूजनादौ भे(भ)वेदतः ।
तथैव तान्त्रिकैश्चापि शापेभ्यः शोधयेत् क्रमात् ॥ ३७ ॥
सामान्यार्घ्ये तु तद्विन्दुं दत्त्वा शुद्ध्यादि पावयेत् ।
तेनापूर्य हेतुपात्रं यजेत् सोमकलात्मकैः ॥ ३८ ॥
त्रिकोणं मातृकाकारं भावयेत् तत्र चाद्रिजे ।
वर्णत्र्यस्राद् बहिर्देवि चतुरस्रं ततो बहिः ॥ ३९ ॥

पश्चिमाग्रं त्रिकोणं च षट्कोणं वसुपत्रकम् ।
एवं ध्यात्वा पञ्चरत्नान् वर्णत्र्यस्रे महीगृहे ॥ ४० ॥
मिथुनत्रितयं पञ्चभूतान्यपि समर्चयेत् ।
शक्तित्रयं त्रिकोणे तु तत्त्वपीठत्रयं तथा ॥ ४१ ॥
कामेश्वरीत्रयं चापि मध्यतुर्यं प्रपूजयेत् ।
षट्कोणे चाङ्गदेवीश्च भैरवान् वसुपत्रके ॥ ४२ ॥
समभ्यर्च्य सुधादेवीं ध्यात्वा तत्र समावहेत् ।
पूजयेच्च यथाकामं तदालभ्य ततः परम् ॥ ४३ ॥
प्रपठेच्च कला देवि ब्रह्मादीनां क्रमेण तु ।
तत्तन्मन्त्रांश्चापि त्रिधा मातृकां हेतु-संस्तुतिम् ॥ ४४ ॥
अमृतेशीं मूलमपि चतुःपञ्चाष्टधा पठेत् ।
मालामन्त्रं च श्रीसूक्तं पठेत् तत्र सकृत्सकृत् ॥ ४५ ॥
प्रजपेन्मूलविद्यां च शतमष्टोत्तरं ततः ।
विशेषार्घ्यं शङ्खवत्तु हेतुपात्रात् प्रपूरितम् ॥ ४६ ॥
संस्थाप्य मूलविद्याया जपेदष्टकमद्रिजे ।
एतन्मूलाष्टकजपः पञ्चमप्रतिरूपकः ॥ ४७ ॥
प्रजपेत् तु त्रिधा देवि प्रत्येकं मातृकामपि ।
एतत्ते देवि सम्प्रोक्तमर्घ्यस्थापनकादिकम् ॥ ४८ ॥

॥ इति श्रीत्रिपुरार्णवे त्रिपुरासारसर्वस्वेऽर्घ्यविधिर्नाम नवमस्तरङ्गः ॥ ९ ॥

●

अथ दशमस्तरङ्गः

पार्वत्युवाच

कैलासनिलय श्रोतुं कुलद्रव्यं समीहितम् ।
अनुकल्पमपि प्राज्ञ कथयस्व क्रमेण तु ॥ १ ॥

शशिशेखर उवाच

शृणु तेऽत्र प्रवक्ष्यामि हिमाचलयशस्करि ।
कुलद्रव्यं चानुकल्पं तद्भेदं क्रमतः स्फुटम् ॥ २ ॥
कुलद्रव्यं पञ्चविधं मपञ्चकमितीरितम् ।
मद्यं मांसं मत्स्यमपि मुद्रा मैथुनमेव च ॥ ३ ॥
एते पञ्चमकाराः स्युस्त्रिपुरा-प्रीतिदायकाः ।
तत्राद्यं कारणं द्रव्यं हेतुस्तत्त्वमलीति च ॥ ४ ॥
प्रोक्तं कुलपथे गुह्यनामानि प्रथमस्य वै ।
शुद्धिः साधनमामत्रं तर्पणं च द्वितीयकम् ॥ ५ ॥
वारिजं केतनं शल्यं निर्निमेषं तृतीयकम् ।
उपयोज्यं वैष्णवं च मुद्रास्वाद्यं चतुर्थकम् ॥ ६ ॥
आनन्दः सामरस्यं च संसृतिः पञ्चमं भवेत् ।
एवं संज्ञा(:)प्रभेदा हि प्रोक्ताः स्युस्त्रिपुरार्णवे ॥ ७ ॥
एवं मपञ्चकैः पूजा केवलं शिवतामयी ।
आद्यं सदाशिवस्तद्वद् द्वितीयं चेश्वरः स्मृतः ॥ ८ ॥
रुद्रस्तृतीयं तुर्यं तु विष्णुर्ब्रह्मा तु पञ्चमम् ।
तस्मात्पञ्च(ब्रह्म)[1]'म'मयो यज्ञः सर्वोत्तमोत्तमः ॥ ९ ॥
तत्राद्यभेदं वक्ष्यामि शृणु सम्यक् समाहिता ।
गौडी माध्वी च पैष्टी च त्रिविधं द्रव्यमीरितम् ॥ १० ॥
ऐक्षवक्षौद्रजाताद्या गौडी स्यात् सात्त्विकी स्मृता ।
मधूककुसुमद्राक्षातालवृक्षादिसम्भवा ॥ ११ ॥

---

1. 'म' इत्यस्य स्थाने 'ब्रह्म'–क. ।

माध्वीति कीर्तिता तज्ज्ञै राजसी सा भवेच्छिवे ।
पिष्टतण्डुलजाताद्या तामसी पैष्टिकी स्मृता ॥ १२ ॥
सात्त्विकी ब्राह्मणे ख्याता राजसी नृपवैश्ययोः ।
तामसी चोत्तमा शूद्रे तन्त्रेष्वेवं विनिर्णयः ॥ १३ ॥
अतिबोधसमायुक्तं स्वच्छं तैक्ष्ण्यौष्ण्यवर्जितम् ।
रञ्जितं रक्तपीताद्यैः सुगन्धं तत्र चोत्तमम् ॥ १४ ॥
एवं तु प्रथमं प्रोक्तं द्वितीयं शृणु वच्मि ते ।
ग्रामजं च तथारण्यं भूचरं खेचरं तथा ॥ १५ ॥
आगमोक्तं पवित्रं च सम्यक् संस्कारसंस्कृतम् ।
मधुराम्लहिङ्गुजीरमरिचाज्यसुपाचितम् ॥ १६ ॥
सुगन्धं मृदुपक्वं च सुस्वादु च मनोहरम् ।
अल्पकण्टकसंयुक्तं सुपक्वं स्वादुसंयुतम् ॥ १७ ॥
लिकुचाम्लादिसंयुक्तं विधिना संस्कृतं तथा ।
तृतीयमेवं सम्प्रोक्तं चतुर्थमथ वै शृणु ॥ १८ ॥
माषैश्च चणकैस्तद्वद् गोधूमाद्यैरपीश्वरि ।
घृतादिपक्वै रुचिरैर्मधुरैर्लावणैरपि ॥ १९ ॥
साधितं वटकाद्यं तु ग्राह्यं मुद्रात्मकं शिवे ।
उक्तलक्षणसम्पन्नां दूतीमानीय पूजने ॥ २० ॥
यथोक्तवत् सुसम्पूज्य (त)स्या अङ्गेषु विन्यसेत् ।
पाययित्वा भोजयित्वा तरुणोल्लाससंयुतः ॥ २१ ॥
तथाभूतां तु तां दूतीमक्षुब्धेन्द्रियमानसः ।
कामपीठं विनिर्मथ्य शिवशक्तिमयं रसम् ॥ २२ ॥
पञ्चमं तु समादाय विशेषार्घ्ये विनिक्षिपेत् ।
पञ्चमं नहि सर्वेषां सुलभं पर्वतात्मजे ॥ २३ ॥
योगीन्द्राणामपि तु तद् दुर्लभं सर्वथा भवेत् ।
समानमिलितं तच्च ग्राह्यं ज्ञात्वा यतो भवेत् ॥ २४ ॥
अतस्तत्तु महायोगिगम्यमेव न चान्यथा ।
एवं विधानमज्ञात्वा विचलेन्द्रियमानसः ॥ २५ ॥

अन्यथाभावमापन्नः समूलं नाशमाप्नुयात् ।
तस्मात् तु पञ्चमं मुख्यं नोक्तं चानधिकारतः ॥ २६ ॥
अनुकल्पं समासाद्य पूजयेत् त्रिपुराम्बिकाम् ।
एवमेव कुलद्रव्यं साधितं सर्वमुत्तमम् ॥ २७ ॥
अन्यथा सेवमानस्तु सुरापो भवति द्विजः ।
कामान्मोहाद् यदि सुरां पिबेत् सकृदपि द्विजः ॥ २८ ॥
विद्वानपि[1] स संत्याज्यस्तन्त्रज्ञैरविचारिभिः ।
प्रमादाद् यः पिबेत् तस्य प्रायश्चित्तं विधीयते ॥ २९ ॥
अनुकल्पैरथापि स्यात् पूजा हिमशिलात्मजे ।
सर्वैर्वर्णैः सदा देवी सम्पूज्योक्तविधानतः ॥ ३० ॥
मुख्याभावे चानुकल्पैर्न पूजां लोपयेत् क्वचित् ।
मुख्ये निषिद्धबुध्या तु नानुकल्पैः प्रपूजयेत् ॥ ३१ ॥
निषिद्धबुध्या मुख्ये तु योऽनुकल्पैः प्रपूजयेत् ।
स याति नरकान् घोरान् कुम्भीपाकादिकान् नरः ॥ ३२ ॥
अथानुकल्पं वक्ष्यामि शृणु संयतमानसा ।
नारिकेलोदकं कांस्ये ताम्रे क्षीरं तथैव च ॥ ३३ ॥
गुडोदकं तथा तक्रमाद्य-प्रतिनिधिर्भवेत् ।
पलाण्डुर्लशुनं वापि द्वितीयस्य तथार्द्रकम् ॥ ३४ ॥
मूलकं गृञ्जनं वापि तृतीये सन्निवेशयेत् ।
मुद्राया नानुकल्पः स्यात्तदवश्यं समीहितम् ॥ ३५ ॥
लिङ्गयोन्योस्तु कुसुमं मूलाष्टकजपोऽथवा ।
अनुकल्पः पञ्चमस्य भवेन्मत्प्राणवल्लभे ॥ ३६ ॥
अलाभे तु तृतीयस्य द्वितीये त्र्यम्बकं जपेत् ।
प्रथमालाभयोगेषु घुटिकामपि साधयेत् ॥ ३७ ॥
प्रथमं च द्वितीयं च योजयेदष्टगन्धकम् ।
एवं तु घुटिकां कृत्वा संशोष्य तु निधापयेत् ॥ ३८ ॥

---

1. नपि च स त्याज्य–क.।

हेतोरभावे तोयो(ये) तु सङ्घृष्यार्घ्ये निधापयेत् ।
अलाभे घुटिकायास्तु नारिकेलजलादिकम् ॥ ३९ ॥
घुटिकानन्तरे कल्पे न द्वितीय-तृतीयके ।
पुष्पेण तर्पणं कुर्यादन्यथा पापमाप्नुयात् ॥ ४० ॥
अनुकल्पेन पूजायां गुरुपूजादिमानसम् ।
कर्तव्यं नित्यपूजायां मन्त्रपाठप्रपूर्वकम् ॥ ४१ ॥
तत्त्वशोधनकं त्यक्त्वा गुर्वादीनर्चयेत् क्रमात् ।
नैमित्तिकार्चने तत्तन्मन्त्रपाठेन भावयन् ॥ ४२ ॥
तृतीयस्यानुकल्पत्वे द्वितीयेन सह न्यसेत् ।
एकस्मिन्नेव पात्रे तु संस्कुर्यादपृथक्तया ॥ ४३ ॥
एतत्पर्युषितं सर्वमनर्हं पूजनादिषु ।
तत्पूजया प्रकुप्यन्ति योगिन्यस्त्वतिभीषणाः ॥ ४४ ॥
तत्प्रकारं तु ते वक्ष्ये यथावन्नगराट्सुते ।
संस्कारैः संस्कृतं तद्वल्लौकिकैरागमेरितैः ॥ ४५ ॥
पूजासमाप्त्युत्तरं तु यामात् पर्युषितं भवेत् ।
प्रथमादिचतुर्थान्तं सर्वं त्याज्यं सुसाधकैः ॥ ४६ ॥
तथा विकृतिमापन्नं मार्जाराद्यैरुपाहतम् ।
केशाश्रुनखनिष्ठीवदूषितं च परित्यजेत् ॥ ४७ ॥
एतत्पवित्रभूतैस्तु साधनीयं द्विजैः सदा ।
अन्यथा साधितं सर्वं न पूजार्हं समीरितम् ॥ ४८ ॥
भक्तिमद्भिश्चतुर्थाद्यैर्द्वितीयाद्यं सुसंस्कृतम् ।
पूजनार्थं तु यद् देवि तत्पवित्रं प्रचक्षते ॥ ४९ ॥
तथा पूजानिमित्तं वै प्रथमाद्यमुपाहृतम् ।
यज्ञीयं तत्पवित्रं स्याद् दृष्ट्वा स्पृष्ट्वा शुचिर्भवेत् ॥ ५० ॥
तथैव मण्डले प्राप्तं सर्वं तदमृतं भवेत् ।
विप्रेणान्येन वानीतं देवतायै निवेदयेत् ॥ ५१ ॥
प्रथमाद्यैः संस्कृतैस्तु युक्तं तत्तदगात्मजे ।
अविशेषेण सर्वैस्तु ग्राह्यं शङ्काविवर्जितैः ॥ ५२ ॥

यस्त्वत्र संशयात्मा स्यात् स दारिद्र्यं समाप्नुयात् ।
तथाऽन्यत् तेऽभिधास्यामि सर्वत्रैव सुगोपितम् ॥ ५३ ॥
देव्यै निवेदितं सर्वं प्रथमादिकमद्रिजे ।
येन केनापि संस्पृष्टं समानीतं सुसंस्कृतम् ॥ ५४ ॥
उद्वासानन्तरं वापि मण्डलाद् बाह्यतोऽपि वा ।
आदरेण समादेयं सर्वैः पर्वतगोत्रजे ॥ ५५ ॥
उपवासपरैश्चापि स्वीकर्तव्यं सुभक्तितः ।
भोजनादौ तथा सर्वैः स्वीकर्तव्यं प्रसादकम् ॥ ५६ ॥
निवेदितं यत् प्रथमं सर्वैरापोशनान्ततः ।
चुलुकेन समादेयं मूलं स्वाहां ततोच्चरन् ॥ ५७ ॥
एतत्सर्वं तदमृतं करोति शृणु शङ्करि ।
नैवेद्यं तु पराया यत्तत्ख्यातममृतं यतः ॥ ५८ ॥
अखिलव्रतधर्मस्य साधनं वै सुसम्मितम् ।
निवेदितान्यद्यत्किञ्चित् कामाज्जक्ष(क्ष्य) सकृ छि(च्छि)वे ॥ ५९ ॥
व्रतलोपमवाप्नोति दृष्टं तु त्रिपुरार्णवे ।
मण्डले येन केनापि यत्किञ्चिदुपसंहृतम् ॥ ६० ॥
अनिवेद्य परायै तन्न स्वीकर्तव्यमद्रिजे ।
यस्तु मोहात् प्रमादाद् वा मण्डले प्रथमादिकम् ॥ ६१ ॥
फलं वा पुष्पमपि वा नाचार्याय समर्पयेत् ।
निवेदनाय देवेश्यै तथैव स्वयमाददेत् ॥ ६२ ॥
तस्मै देवी महाराज्ञी क्रुद्धा यच्छति चापदम् ।
सम्भवेद् देवताद्रोही वहिष्कार्यस्तु मण्डलात् ॥ ६३ ॥
तस्माद् यत्किञ्चिदानीतमाचार्याय समर्पयेत् ।
आचार्यस्त्रिपुरायै तन्निवेद्य च समर्पयेत् ॥ ६४ ॥
अन्यथा त्रिपुराकोपादापदां भाजनं भवेत् ।
एतत्तेऽभिहितं यत्तत्पुरा पृष्टमगात्मजे ॥ ६५ ॥

॥ इति श्रीत्रिपुरार्णवे त्रिपुरासारसर्वस्वे कुलद्रव्यादिकथनं नाम दशमस्तरङ्गः ॥ १० ॥

अथैकादशस्तरङ्गः

गिरिजोवाच

महेशार्घ्यविधावुक्तान् मन्त्रान् कथय वै क्रमात् ।
तत्क्रियामपि वै गूढां कृपया प्राणवल्लभे(भ) ॥ १ ॥

वृषध्वज उवाच

निशामय ब्रुवे सर्वं यत्पृष्टं पार्वति त्वया ।
क्रमेण सर्वं सुस्पष्टं समाधाय स्वकं मनः ॥ २ ॥
धूम्रार्चिरथ चोष्मा वै ज्वलिनी ज्वालिनी तथा ।
तथैव विस्फुलिङ्गिनी सुश्री चाथ सुरूपका ॥ ३ ॥
कपिला चाथ हव्यात्तु वहा कव्यवहेति च ।
एतास्त्वग्निकलाः प्रोक्ता यकाराद्यर्णसंयुताः ॥ ४ ॥
तपिनी तापिनी धूम्रा मरीचिर्ज्वालिनी ततः ।
रुचिः सुषुम्णा भोगदा विश्वा वै भोगिनी ततः ॥ ५ ॥
धारिणी च क्षमा चेति द्वादशार्ककलास्त्विमाः ।
काद्याः क्रमेण भाद्यास्तु व्युत्क्रमेण द्विशः स्थिताः ॥ ६ ॥
पशुपाशाय विद्महे शिरश्छेदाय धीमहि ।
तन्नश्छागः प्रचोदयादिति त्रिस्तदनन्तरः ॥ ७ ॥
शिवोत्कृत्तमिदं पिण्डमतस्त्वं शिवतां व्रज ।
उद्बुध्यस्व पशो त्वं हि न पशुस्त्वं शिवो ह्यसि ॥ ८ ॥
इत्यपि त्रिस्तु सद्योजातादिपञ्चकमेव च ।
द्वितीयस्य त्र्यम्बकेति तृतीयस्य च तत्परम् ॥ ९ ॥
तद्विष्णोरिति तुर्यस्य मन्त्राः प्रोक्ता वरानने ।
अमृता मानदा पूषा तुष्टिर्वै पुष्टिरेव च ॥ १० ॥
रतिर्धृतिश्च शशिनी चन्द्रिका(का)न्तिरित्यपि ।
ज्योत्स्ना श्रीप्रीतिरपि चाङ्गदा पूर्णामृतान्तिका ॥ ११ ॥

इमाः सोमकलाः प्रोक्ताः स्वराद्याः षोडशैव तु ।
तारं नमो भगवते वासुदेवाय चेति वै ॥ १२ ॥
वासुदेवमनुस्तद्वदमृतेशीं शृणु प्रिये ।
वाग्भवं प्लूं स्त्रौं सुधा च बाणान्त्यश्चामृते ततः ॥ १३ ॥
अमृतोद्भवे अमृतेश्वरि अमृतवर्षिणी ।
अमृतं स्रावय द्वन्द्वमग्निजायां ततः पठेत् ॥ १४ ॥
अमृतेश्या मन्त्र एष पथिकानथ वै शृणु ।
पथिकाद्या देवताभ्यो ग्रामचण्डालिनी ततः ॥ १५ ॥
तपिनी चण्डालिनी च निन्दाचण्डालिनी तथा ।
सर्वान्ते पशुं तत्पश्चाज्जनदृष्टि ततः परम् ॥ १६ ॥
दोषायेति पञ्च भवेदादावन्ते पृथक् पृथक् ।
षान्तं विलोमतो युग्मं कान्तं पान्तं चलादिमम् ॥ १७ ॥
रुद्रस्वरबिन्दुयुतं जलबीजचतुष्टयम् ।
वर्मास्त्रं च शिरश्चान्ते समानं पञ्चकं भवेत् ॥ १८ ॥
एकमेव परं ब्रह्म स्थूलसूक्ष्ममयं ध्रुवम् ।
कचोद्भवां ब्रह्महत्यां तेन ते नाशयाम्यहम् ॥ १९ ॥
सूर्यमण्डलसम्भूते वरुणालयसम्भवे ।
उमाबीजमये देवि शुक्रशापाद्विमुच्यताम् ॥ २० ॥
वेदानां प्रणवो बीजं ब्रह्मानन्दमयं यदि ।
तेन सत्येन ते देवि ब्रह्महत्या व्यपोहतु ॥ २१ ॥
शुक्रशापमोचनाख्यो मन्त्रस्त्वेष समीरितः ।
ध्रुवो नमो भगवति वारुणी जलमूर्तये ॥ २२ ॥
ग्रामेश्वरि पथि प्रान्तेकदेवते गृह्णद्वयम् ।
सर्वदोषान् मोचय द्विर्लक्ष्मी ह्रीकामबीजकम् ॥ २३ ॥
वाग्भवं शां शीं(शीं)मित्यादि षट्कं तस्यां ततः शिवे ।
शुक्रशापविमोचीति कायै स्वाहेति वै भवेत् ॥ २४ ॥
तान्त्रिकः शुक्रशापस्य मोचने मन्त्र ईरितः ।
स्वाधिष्ठयेत्यादि मन्त्रान् पठेद् वै त्वेन आशसः ॥ २५ ॥

विष्णुर्योनिं कल्पयतु आधत्तां पुष्करस्रजा ।
हिरण्य(ण्म)यी अरणी दशमे मासि सूतवे ॥ २६ ॥
त्रिभिष्ट्वं देव सवितर्जातवेदः पुनीहि मा ।
प्रप्यायस्व प्रस्थन्दस्व देवेभ्य उत्तमं . हविः ॥ २७ ॥
इमं मे गङ्गे यमुने ये शृणु ह्यासुषोमया ।
सितासिते सरिते यसो अमृतत्वं भजन्ते ॥ २८ ॥
ता मन्दसानामनुषोष्वामप दुर्मति हतम् ।
श्रोणामेक उदकं गाभ्यः पितरा उपावतु ॥ २९ ॥
हिरण्यपात्रं मधोः पून आयुस्तेजो दधाति ।
पवमानः सुवर्जनः दामोर्जयन्त्या पुनातु ॥ ३० ॥
मधुवाता ऋतायते माध्वीर्गावो भवन्तु नः ।
एवंविधैर्मन्त्रजालैः संशोध्य तदनन्तरम् ॥ ३१ ॥
शुक्रशापान्मोचयित्वा हेतुकुम्भे तु पूरयेत् ।
ग्लूं स्लूं म्लूं प्लूं न्लूं च देवि रत्नबीजानि वै क्रमात् ॥ ३२ ॥
गगनस्वर्णमर्त्यानि पातालं नागमेव च ।
पञ्चरत्नानि चैतानि मिथुनत्रितयं शृणु ॥ ३३ ॥
आनन्दभैरवो देवि तद्वादानन्दभैरवी ।
स्वच्छन्दभैरवद्वन्द्वं परभैरवयुग्मकम् ॥ ३४ ॥
हसक्षमलवरयान्संयोज्य षष्ठके स्वरे ।
बिन्दुसंयोजनादेव बीजमानन्दभैरवम् ॥ ३५ ॥
नामान्ते तु शिखा चैवमाद्ययोस्तत्र व्युत्क्रमात् ।
नेत्रान्त्यं शक्तिपूजायां सर्वत्रैवं भवेच्छिवे ॥ ३६ ॥
इच्छाज्ञानक्रियाशान्ता चेति शक्तिचतुष्टयम् ।
आत्मविद्याशिवाख्यानि सर्वं तत्त्वचतुष्टयम् ॥ ३७ ॥
कामरूपं पूर्णगिरिर्जालन्धरमतः परम् ।
ओड्याणं चेति पीठानि प्रोक्तानि परमेश्वरि ॥ ३८ ॥
यजेद् ब्राह्म्यादिसहितानसिताङ्गादिभैरवान् ।
असिताङ्गं रुरुं चण्डं क्रोधमुन्मत्तमेव च ॥ ३९ ॥

कपालिभीषणौ तद्वत् संहारं भैरवाष्टकम् ।
ब्राह्मी माहेश्वरी तद्वत् कौमारी वैष्णवी तथा ॥ ४० ॥
वाराही चैव माहेन्द्री चामुण्डा च ततः परम् ।
महालक्ष्मी चेति शिवे अष्टपत्रे प्रपूजयेत् ॥ ४१ ॥
अग्निसूर्यसोमकलाः प्रागुक्ताश्चापि वै पठेत् ।
बीजान्यादौ तु बालायाश्चरमे नमसा युतम् ॥ ४२ ॥
ब्रह्मादिषु कलास्वेवं तारवर्णानहौ तथा ।
एवं तत्तत्कलादौ स्यादाधारादिषु पूजने ॥ ४३ ॥
बीजान्ते मण्डलायोक्त्वा धर्मप्रददशां ततः ।
कलात्मनेऽमुकान्ते चाधाराय हृदयं वदेत् ॥ ४४ ॥
अग्निसूर्यसोमरूपं मण्डलत्रितयं स्मृतम् ।
धर्मार्थकामा देवेशि पुमर्थाश्च निरूपिताः ॥ ४५ ॥
सृष्टिर्ऋद्धिः स्मृतिर्मेधा कान्तिर्लक्ष्मीर्द्युतिः स्थिरा ।
स्थितिः सिद्धिश्चेति दशकला ब्राह्म्याः परिकीर्तिताः ॥ ४६ ॥
जराथ पालिनी शान्तिरीश्वरी च रतिस्ततः ।
कामिका वरदाऽह्लादिनी प्रीतिदीर्घिका दश ॥ ४७ ॥
विष्णोः कलाथ तीक्ष्णा रौद्री भयाथो निद्रा तन्द्री ।
क्षुधा च क्रोधिनी क्रियोद्गारी मृत्युर्दशेरिताः ॥ ४८ ॥
रौद्र्यः कलास्तथा पीता श्वेता वै चारुणा सिता ।
अनन्ता पञ्चेश्वरस्य कलाः शृणु सदाशिवाः ॥ ४९ ॥
निवृत्तिर्वै प्रतिष्ठापि विद्या शान्तिरपीन्धिका ।
दीपिका रेचिका मोचिका परा वै ततः परम् ॥ ५० ॥
सूक्ष्मा सूक्ष्माऽमृता ज्ञानामृताथाप्यायिनी ततः ।
व्यापिनी व्योमरूपा चानन्ता षोडशं प्रोदिताः ॥ ५१ ॥
कटपादिषादि स्वरवर्णयुक्ता महेश्वरि ।
हंसः शुचिः प्रतद्विष्णुस्त्र्यम्बकं च क्रमात् ततः ॥ ५२ ॥
तद्विष्णोर्वै विष्णु योनिं तत्तदन्ते पठेच्छिवे ।
हेतु-संस्तुति मन्त्रांश्च वक्ष्ये शृणु समाहिता ॥ ५३ ॥

अखण्डै(क)रसानन्दकरे पर-सुधात्मनि।
स्वच्छन्द-स्फुरणामत्र निधेह्यकुलरूपिणी ॥ ५४ ॥
अकुलस्थामृताकारे सिद्धिज्ञानकरे परे।
अमृतत्त्वं निधेह्यस्मिन् वस्तुनि क्लिन्नरूपिणी ॥ ५५ ॥
तद्वपैकरस्यत्वं कृत्वाऽर्घ्ये चित्स्वरूपिणी।
भूत्वा परामृताकारे मयि चित्स्फुरणं कुरु ॥ ५६ ॥
हेतुसंस्तुतिरेतत्तु अयं प्रोक्तमगात्मजे।
इति ते पृष्टमखिलं निरूपितमतिस्फुटम् ॥ ५७ ॥

॥ इति श्रीत्रिपुरार्णवे त्रिपुरासारसर्वस्वेऽर्घ्यादिमन्त्रनिरूपणं नामैकादशस्तरङ्गः ॥ ११ ॥

●

अथ द्वादशस्तरङ्गः

उमोवाच

महेश करुणासिन्धो वद पश्चात्तनीं क्रियाम् ।
पूजायाः सोपचारायाः साङ्गोपाङ्गं सविस्तरम् ॥ १ ॥

महादेव उवाच

उमे शृणु प्रवक्ष्यामि पूजामुत्तरसंज्ञिताम् ।
उपचारं समभ्यर्च्य ताम्बूलान्तं ततः परम् ॥ २ ॥
आवृतिं पूजयेत् पश्चात् पुनः पञ्चोपचारकम् ।
नैवेद्यापोशनं दत्त्वा प्राणाद्यास्तु प्रदर्शयेत् ॥ ३ ॥
चित्पात्रे सद्धविः सौख्यं विविधानेकभक्षणम् ।
निवेदयामि ते देवि सानुगायै जुषाण तत् ॥ ४ ॥
इति प्रार्थ्य जपेन्मूलं ध्यायेत् कामकलां पराम् ।
शिवशक्तिमयं यत्तु वर्णयुग्ममह प्रिये ॥ ५ ॥
विश्वगर्भं पराशक्ति-शून्याकार-परापरम् ।
आत्मशक्तिमभिध्यायेत् प्रत्यावृत्त-स्वचक्षुषा ॥ ६
एतत्कामकलाध्यानं जीवन्मुक्तिप्रवर्तनम् ।
सूक्ष्मध्यानेऽसमर्थश्चेत् स्थूलं ध्यायेद् यथोक्तवत् ॥ ७ ॥
बिन्दुत्रयं तु तज्ज्ञात्वा तत्प्ररूढौ त्रिकोणकम् ।
मुखं स्तनद्वयं योनिर्देवता स्वात्मनोः स्मरेत् ॥ ८ ॥
ततो होमं विदध्याद् वै संसाध्याग्निं निरुक्तवत् ।
वह्निं देवीं प्रपूज्याथ षडङ्गं च गुरुत्रयम् ॥ ९ ॥
कामेश्वर्यादिकं चापि मूलमष्टोत्तरं शतम् ।
पुनः पूज्योद्वास्य चात्र परिषिञ्चेन्मुखान्त्ययोः ॥ १० ॥
बलिपूजां ततः कुर्यात् तद्विधानं क्रमाच्छृणु ।
ईशादिमारुतान्तं वै प्रागादिष्वपि दिक्षु च ॥ ११ ॥

द्वारान्तर्द्वारबाह्ये च बलिदेव्यो दश स्मृताः ।
वटुकं योगिनीं क्षेत्रपालं गणपतिं तथा ॥ १२ ॥
तिरस्कृतिं च वाराहीं सर्वभूतं च मन्त्रिणीम् ।
उच्छिष्टाद्यां श्यामलां च भैरवं चेति वै दश ॥ १३ ॥
चतुरस्रं तथा वृत्तं त्रिकोणं च प्रकल्पयेत् ।
तत्रादौ मण्डलानीष्ट्वा वटुकाद्यांश्च पूजयेत् ॥ १४ ॥
उपचारैः पञ्चभिस्तु तत्तदग्रे तु विन्यसेत् ।
बलिपात्रं व्यञ्जनान्नाद्यखिलोपेतमद्रिजे ॥ १५ ॥
विशेषार्घ्यस्थितैर्हेतुबिन्दुभिश्च द्वितीयकैः ।
तत्तन्मुद्रासमायोगं मन्त्रपाठ-प्रपूर्वकम् ॥ १६ ॥
प्रार्थयेत्तत्तदनु च क्रमेण प्रणमेत् तथा ।
बलिदानेन सन्तुष्टो वटुकः सर्वसिद्धिदः ॥ १७ ॥
शान्तिं करोतु मे नित्यं भूतवेतालसेवितः ।
या काचिद् योगिनी रौद्रा सौम्या घोरतरा परा ॥ १८ ॥
खेचरी भूचरी व्योमचरी प्रीतास्तु मे सदा ।
योऽस्मिन् क्षेत्रे निवासी च क्षेत्रपालः सकिङ्करः ॥ १९ ॥
प्रीतोऽयं बलिदानेन सर्वरक्षां करोतु मे ।
सर्वदा सर्वकार्याणि निर्विघ्नं साधयन् मम ॥ २० ॥
शान्तिं करोतु सततं विघ्नराजः सशक्तिकः ।
पशुवाग्दृष्टिचित्तानि समाच्छाद्य तिरस्कृतिः ॥ २१ ॥
बलिं गृह्णातु सन्तुष्टा पूजिता मे शुभप्रदा ।
दुष्टान् तीव्रेण दण्डेन दण्डयित्वा तु दण्डिनी ॥ २२ ॥
प्रीणातु बलिदानेन सङ्कर्षिण्यादिसंयुता ।
सर्वे भूता विघ्नकराश्चोर्ध्वाधो मध्यलोकगाः ॥ २३ ॥
बलिं गृह्णन्तु पूजां च प्रसन्नाः सन्तु मे सदा ।
मन्त्रिणी बलिदानेन सन्तुष्टा वाञ्छितार्थदा ॥ २४ ॥
पूजिता च मया सम्यङ् मातङ्गी गणसंयुता ।
उच्छिष्टश्यामलायास्तु देवतोद्वासनां ततः ॥ २५ ॥

नैवेद्यान्नेन तस्यै तु बलिर्देयो वरानने ।
पूर्वदत्तै[1]र्बलिद्रव्याण्यादायोच्छिष्टभैरवे ॥ २६ ॥
इमं बलिं समादद्यादुच्छिष्टश्यामला परा ।
उच्छिष्टभागिनी देवी प्रीणात्वखिलपूर्त्तिदा ॥ २७ ॥
बलिद्रव्यैर्मया दत्तैः प्रीयतां भक्तवत्सलः ।
उच्छिष्टभैरवो देवो मम संरक्षको भवेत् ॥ २८ ॥
उच्छिष्टभैरवबलिं तदन्ते तु प्रदापयेत् ।
उच्छिष्टभैरवबलिं मण्डले तु विनिक्षिपेत् ॥ २९ ॥
पात्रं तथा हस्तपादौ प्रक्षाल्याचम्य शङ्करि ।
तत्पात्रं तोयसम्पूर्णं गृहीत्वान्तर्व्रजेत् ततः ॥ ३० ॥
उदयोऽस्तु ब्रुवन् तस्मिन् विशेषार्घ्यस्य लेशकम् ।
दत्त्वा तदुदकैः सर्वानभिषिञ्चन् यथाक्रमम् ॥ ३१ ॥
पठेच्छान्तिस्तवं पश्चात् कुर्यात् पूजासमापनम् ।
एतत्ते कथितं सर्वं यत्त्वया प्राग्विचारितम् ॥ ३२ ॥

॥ इति श्रीत्रिपुरार्णवे त्रिपुरासारसर्वस्वे होमबलिकथनं नाम द्वादशस्तरङ्गः ॥ १२ ॥

●

1. बलिपात्रं–क. ।

अथ त्रयोदशस्तरङ्गः

अगजोवाच

पुरारे श्रोतुमिच्छामि बलिमन्त्रान् यथाक्रमम् ।
विसर्जनं तथाऽर्घ्याणां तद्वत् पूजासमापनम् ॥ १ ॥

त्रिनेत्र उवाच

शृणु गोत्राङ्गजनिते बलिमन्त्रादिकं क्रमात् ।
एह्येहि देवीपुत्राच्च कपिलान्ते जटा ततः ॥ २ ॥
भारभासुर त्रिनेत्र ज्वालामुख च सर्वतः ।
विघ्नान्नाशय सर्वोपचार वै सहितं बलिम् ॥ ३ ॥
गृह्ण द्वयं वह्निजाया वटुकस्य बलेर्मनुः ।
यां योगिनीभ्यः स्वाहा वै सर्वयोगिनीभ्यो हुं फट् ॥ ४ ॥
वह्निजाया तथा चायं योगिन्यास्तु बलेर्मनुः ।
क्षां क्षीमित्यादिषट्कं च वर्मस्थानं च क्षेत्रपा ॥ ५ ॥
ल धूपदीपसहितं बलिं गृह्ण द्वयं ततः ।
सर्वकामान् पूरय च स्वाहा क्षेत्रपतेर्मनुः ॥ ६ ॥
गां गीं गूं गणपतये वर वरद सर्व च ।
विघ्नान् नाशय सर्वोपचार वै सहितं बलिम् ॥ ७ ॥
गृह्ण द्वयं शिरश्चायं गणपस्य बलेर्मनुः ।
त्रितारं च तिरस्करणिके सर्वपशून् ततः ॥ ८ ॥
मोहय द्वितयं चेमं बलिं गृह्ण द्वयं शिरः ।
तिरस्करणिकायास्तु बलेरेष मनुः स्मृतः ॥ ९ ॥
वाग्भवं ग्लौं तु वाराहि दुष्टान् दण्डय दण्डिनि ।
बलिं गृह्ण द्वयं स्वाहा वाराह्यास्तु बलेर्मनुः ॥ १० ॥
सर्वविघ्नकृद्भ्यः सर्वभूतेभ्यो वर्म वै शिरः ।
सर्वभूतेभ्य एषोऽथो बलिर्न मम चेति वै ॥ ११ ॥

सर्वभूतबलेर्मन्त्रः प्रोक्तश्चैवमगात्मजे ।
त्रितारं राजमातङ्गि तथा वीणा-वनोदिनि ॥ १२ ॥
इमां पूजां बलिं गृह्ण द्विर्मां रक्ष द्वयं तथा ।
वर्मास्त्रं वह्निजाया च श्यामलाया बलेर्मनुः ॥ १३ ॥
वाग्भवं हृदयम् उच्छिष्टचण्डाली च मातङ्गी ।
सर्वजनवशङ्करी शिरश्चेति मनुर्भवेत् ॥ १४ ॥
उच्छिष्टश्यामलायास्तु भैरवस्यापि संशृणु ।
त्रितारमुच्छिष्टभैरवबलिं गृह्ण युग्मकम् ॥ १५ ॥
वर्मास्त्रं वह्निजाया च मनुरेषः प्रकीर्तितः ।
होमं बलिं समाप्यान्ते पानीयाद्युपचारकम् ॥ १६ ॥
ताम्बूलं दक्षिणां चापि कुर्यादारार्त्तिकं ततः ।
तत्पात्रं पुरतो न्यस्य मायया ज्वालयेदपि ॥ १७ ॥
गन्धपुष्पाक्षतैरिष्ट्वा नवरत्नानि सञ्जपेत् ।
ज्योतिर्मुद्रां चक्रमुद्रां प्रदर्श्य प्रणमेत् ततः ॥ १८ ॥
पात्रमुत्थाप्य चोत्थाय पादान्मूर्धान्तमीश्वरि ।
त्रिर्भ्राम्य मन्त्रपूर्वं तु संस्थाप्य प्रणतिं चरेत् ॥ १९ ॥
समस्तचक्रचक्रेशीयुते देवि नवात्मिके ।
आरार्त्तिकमिदं दिव्यं गृहाण मम सिद्धये ॥ २० ॥
एवमारार्त्तिकं सर्वैर्दर्शनीयं प्रयत्नतः ।
तज्ज्वालां तु स्पृशेद् देवि हस्ताभ्यां प्रणमेत्ततः ॥ २१ ॥
दृष्ट्वा स्पृष्ट्वा च दौर्भाग्यं पातकं चापि नाशयेत् ।
ततो गुरुं चासनाद्यैरिष्ट्वा नत्वा च पात्रकम् ॥ २२ ॥
विशेषार्घ्यात् प्रदद्याद्वै गुरुश्चापि स्वयं ततः ।
स्वात्मीकुर्याद् विधानेन सन्तर्प्य च यथाक्रमम् ॥ २३ ॥
असान्निध्ये गुरूणां तु पूजयेत्तत्समान् शिवे ।
गुरोः कनिष्ठाः स्वज्येष्ठास्तथा पुत्रादिका अपि ॥ २४ ॥
प्रोक्ता गुरुसमास्तास्तु गुरुस्थाने प्रपूजयेत् ।
गुर्वादिपूर्वपूर्वेषां पत्नी स्यात् सधवा यदि ॥ २५ ॥

स्वज्येष्ठा वा कनिष्ठा वा गुरुपूजां समर्हति ।
गुरोर्ज्येष्ठः कनिष्ठो वा स्वावरो यदि योनितः ॥ २६ ॥
गुरुप्रतिनिधिर्नैव कदापि भवतीश्वरि ।
गुर्वादीनामभावे तु ध्यात्वा तान् स्वकलेवरे ॥ २७ ॥
समर्प्य मनसा तस्य शेषबुद्ध्या हुनेत् स्वयम् ।
निर्वर्त्य श्रीक्रमं सम्यग् गुरवे शिवरूपिणे ॥ २८ ॥
शक्त्यै च श्रीमहाराज्ञीरूपायै भक्तितोऽर्चयन् ।
अलिपात्रं[1] प्रदद्याच्च तेन दत्तं न किं भवेत् ॥ २९ ॥
इष्टास्तेन मखाः सर्वे दत्ताश्चाखिलदक्षिणाः ।
स्वगुरूणां सन्निधौ तु यदि शिष्यः प्रपूजयेत् ॥ ३० ॥
न स्वीकुर्यात् पूजनं वै गुरूणां सन्मुखे क्वचित् ।
तेषामाज्ञां विना देवि त्वन्यथा गुरुघातकः ॥ ३१ ॥
ततः सुवासिनी पूज्या ध्यायेत् तां त्रिपुरामयीम् ।
सुवासिनीमसम्पूज्य पूजनं वै निरर्थकम् ॥ ३२ ॥
तस्माद् यथा कथञ्चिद् सम्पूज्यादौ सुवासिनी ।
श्रद्धाभक्तिसमायुक्ता देवतोपासने रता ॥ ३३ ॥
शुद्धचित्ता दीक्षिता वै शक्तिः श्रेष्ठा सभर्तृका ।
असान्निध्ये सुवासिन्या मनसा तु यथाविधिः ।
सम्पूज्योद्दिश्य तां तत्र त्यजेद् द्रव्यं यथाविधि ॥ ३४ ॥
अलाभे तु सुवासिन्याः सर्वथा हिमशैलजे ।
तद्रूपां देवतां ध्यात्वा पूजयित्वा यथाविधि ॥ ३५ ॥
सन्तर्प्य चाष्टवारं तु शेषं भाव्य हुनेत् स्वयम् ।
शक्तिपूजाविधाने तु दीक्षावत्युत्तमा स्मृता ॥ ३६ ॥
सर्वलक्षणहीनापि दीक्षायुक्ता प्रशस्यते ।
अभावे केवलं मन्त्रवती पूज्या महेश्वरि ॥ ३७ ॥
सापि चेल्लभ्यते नैव तदा पूज्या हि केवला ।
तां तु संस्कृत्यैव सद्यः पूजयेत्तद्विधिं शृणु ॥ ३८ ॥

---

1. बलिपात्रं–क. ।

मूलेन शङ्खतोयेन प्रोक्ष्य तस्याः स्तनौ न्यसेत् ।
मूर्ध्न्यास्ये हृदये नाभौ श्रियं तत्त्वत्रयं क्रमात् ॥ ३९ ॥
प्रजपेद् दक्षकर्णे तु सकृत्तस्याः श्रियं शिवे ।
सुवासिनीं पूजयेत्तु यथाशक्त्युपचारकैः ॥ ४० ॥
प्रदर्श्य मुद्रास्त्वखिला दद्यात् पात्राणि पूर्ववत् ।
अलिपात्रमिदं तुभ्यं दीयते पिशितान्वितम् ॥ ४१ ॥
स्वीकृत्य सुभगे देवि श्रियं देहि रिपून् दह ।
एवं प्रार्थ्य प्रदद्यात् तु पात्रं तस्यै तया ततः ॥ ४२ ॥
तत्त्वत्रयं विधानेन हुत्वा तुर्यं सशेषकम् ।
पीतशेषं प्रदास्यामि वत्स तुभ्यं सुधारसम् ॥ ४३ ॥
तव शत्रून् हनिष्यामि दास्यामि परमां श्रियम् ।
दद्यादाचार्याय चैवं हुनेत् सोऽपि तदात्मनि ॥ ४४ ॥
समवाये बहूनां तु एकत्रैवोत्तमे शिवे ।
गुरुपूजां शक्तिपूजां कुर्यान्न त्वखिलेष्वपि ॥ ४५ ॥
ततः सामयिकानिष्ट्वा दद्यात्पात्राणि हेतुतः ।
स्वात्मीकारविधानेन सर्वैर्होतव्यमद्रिजे ॥ ४६ ॥
सर्वे वर्णा ब्राह्मणाद्याः सधवा विधवाः स्त्रियः ।
कुलटाश्च तथा वेश्या मान्याः पूज्यास्तथेश्वरि ॥ ४७ ॥
मण्डले शिष्यभूताश्च नाप(व)मान्याः कदाचन ।
सर्वान् सम्पूजयेन्मानपूर्वकं देवताधिया ॥ ४८ ॥
एवं सामयिकांनेष्ट्वा प्रदद्यात् कुसुमाञ्जलिम् ।
ततः कामकलां ध्यायन् जपं कुर्याद् विशेषतः ॥ ४९ ॥
अत्रैकधा जपस्यापि फलानन्त्यं समीरितम् ।
तस्मादालस्यसरहितो यथाशक्त्या जपं चरेत् ॥ ५० ॥
ततः शेषोपचारांस्तु कृत्वा पूजां समर्पयेत् ।
इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतः ॥ ५१ ॥
जाग्रत्स्वप्नसुषुप्त्यवस्थासु वै मनसा वाचा ।
कर्मणा हस्ताभ्यां पद्भ्यामुदरेण च वै शिश्ना ॥ ५२ ॥

यत्स्मृतं च यदुक्तं च यत्कृतं च तत्सर्वं श्री ।
गुरुदेवतासमर्पितमस्तु च शिरश्च माम् ॥ ५३ ॥
मदीयं सकलं (चैव) त्रिपुरायै समर्पये ।
ॐ तत्सदिति वै जप्त्वा सामान्यार्घ्यात् समर्पयेत् ॥ ५४ ॥
साधु वासाधु वा कर्म यद्यदाचरितं मया ।
तत्सर्वं कृपया देवि गृहाणाराधनं मम ॥ ५५ ॥
इति शङ्खं देवताग्रे त्रिः परिभ्राम्य शैलजे ।
तेनोदकेन देवीं स्वं सामयिकांश्च प्रोक्षयेत् ॥ ५६ ॥
ततः पुष्पाञ्जलिं दत्त्वा सर्वावरणसंयुताम् ।
तेजोमयीं तु सन्ध्यायन् मुद्राः षोडश दर्शयन् ॥ ५७ ॥
जप्त्वा मूलं यथाशक्त्या समर्प्याथो प्रदर्शयेत् ।
संहारमुद्रां तेनैव ग्राह्यं यन्त्रस्थ-पुष्पकम् ॥ ५८ ॥
गच्छ गच्छ परं स्थानं स्वस्थानं परमेश्वरि ।
यत्र ब्रह्मादयो देवाः न विदुः परमं पदम् ॥ ५९ ॥
आघ्राय कुसुमं तेन तेजसा सहितं ततः ।
मूर्ध्नि तेजोमयं प्राप्य हृदि देवीं समर्चयन् ॥ ६० ॥
मूलाधारे कुण्डलिनीं ध्यायन् निश्चल(मा)नसः ।
आत्मानं तन्मयं ध्यात्वा उच्छिष्टबलिमाहरेत् ॥ ६१ ॥
शान्तिस्तवं पठित्वाऽथ प्रार्थयेच्छ्रीगुरुं शिवम् ।
देव नाथ गुरो स्वामिन् देशिक स्वात्मनायक ॥ ६२ ॥
त्रायस्व मां कृपासिन्धो पूजां पूर्णतरां कुरु।
उत्थाप्य तु विशेषार्घ्यं तर्पयेन्मूर्ध्नि वै गुरून् ॥ ६३ ॥
स्वाहान्तां पादुकां मूलां पठन् स्वात्मनि तद्धुनेत् ।
शेषं शिष्याय भक्ताय प्रदद्यात् तु प्रियाय वै ॥ ६४ ॥
एतन्न देयमप्राप्तषोडशीकाय सर्वथा ।
यद्यनेके प्रियाः शिष्या दत्त्वा ज्येष्ठाय वै गुरुः ॥ ६५ ॥
आज्ञापयेत्तु सर्वांस्तान् क्रमेण नगकन्यके ।
सन्तोष्य श्रीगुरुं यस्तु विशेषार्घ्यस्य शेषकम् ॥ ६६ ॥

गुरोरासाद्य जुहुयात् तस्यानन्त्यफलं भवेत् ।
सहस्रधा सोमपानफलमाप्नोत्यसंशयम् ॥ ६७ ॥
मार्तण्डभैरवायार्घ्यं दत्त्वा पुष्पोदकादिभिः ।
प्राणायामं त्रिधा कृत्वा त्रिपुरां हृदि संस्मरन् ॥ ६८ ॥
विन्यस्य कामबीजेन निर्माल्यं मूर्ध्नि धारयेत् ।
भुक्त्वा सामयिकैः सार्धं विहरेद् देवतात्मकः ।
एतत्सर्वं मयोद्दिष्टं यत्त्वया प्रविवक्षितम् ॥ ६९ ॥

॥ इति श्रीत्रिपुरार्णवे त्रिपुरासारसर्वस्वे पु(पू)जोत्तरविधिर्नाम त्रयोदशस्तरङ्गः ॥ १३ ॥

●

अथ चतुर्दशस्तरङ्गः

गौर्युवाच

भव(ग)वन् श्रोतुमिच्छामि स्वात्मीकारविधिं स्फुटम् ।
कौलिकानां तथा धर्मं मण्डलस्य च सर्वशः ॥ १ ॥

महादेव उवाच

महेश्वरि प्रवक्ष्यामि स्वात्मीकारादिकं क्रमात् ।
सम्यक् तु निर्णयेनैव सावधानेन तच्छृणु ॥ २ ॥
स्नातः शुचिः सुवासाश्च सपुण्ड्रः ससुसाधनः ।
सुचित्त(ो) भावभक्तिश्च विशेन्नम्रस्तु मण्डे(ण्ड) ले ॥ ३ ॥
अभुक्तश्चाप्रावृत-मूर्धानुष्णीषस्त्वपूजितः ।
अतर्कितो दिवा भुक्तो यदा रात्रौ समागतः ॥ ४ ॥
तदा गुर्वाद्याज्ञया तु स्नात्वा सेवेत [1]नान्यथा ।
भुक्त्वा न मण्डले गच्छेत् सर्वथा परमेश्वरि ॥ ५ ॥
पूजागृहाद् बहिः स्थित्वा देवतादर्शनं चरेत् ।
कुलद्रव्यं तथा भुक्त्वा मोहाद्[2]वापि प्रमादतः ॥ ६ ॥
यः सेवेत स वै देवि देवताशापमाप्नुयात् ।
फलाद्यभ्यवहारस्तु न शक्तानां कदाचन ॥ ७ ॥
व्रतोक्तफलहारादिरशक्तातुरयोर्भवेत् ।
एवं सामयिको भक्त्या मानस्तम्भविवर्जितः ॥ ८ ॥
अनाहूतोऽपि [3]चाहूतो व्रजेन्मण्डलमुत्तमम् ।
प्रविश्यैवं गन्धपुष्पाक्षतैः सम्पूज्य संविशेत् ॥ ९ ॥
स्त्रीभिश्च पुरुषैश्चापि न स्थेयं मिलितैः शिवे ।
स्पर्शादिहेतुना कामक्रोधाद्युद्भवहेतुतः ॥ १० ॥

---

1. चान्यथा–क. ।
2. हादपि–ख. ।
3. वाहूतो–क. ।

पृथक्स्थानस्थितास्तस्मात् स्त्रियश्च पुरुषा अपि ।
न स्त्रीषु पुरुषस्तिष्ठेन्न स्त्रीपुरुषमध्यगा ॥ ११ ॥
भूमौ समाविश्य कर्म विधिनाऽपि कृतं शिवे ।
तन्निरर्थकतामेति भिन्नकुम्भस्थ-तोयवत् ॥ १२ ॥
अतस्त्वासनगो भूयादाचार्यस्तान् प्रपूजयेत् ।
वर्ण-विद्या-[1]क्रमज्येष्ठान् पूजयेत् पृथगास्थितान् ॥ १३ ॥
सर्वान् सम्पूज्य पात्राणि दद्याज्ज्येष्ठक्रमेण तु ।
असम्पूज्य शिष्यमपि यो दद्यात् पात्रमम्बिके ॥ १४ ॥
तस्मै कुप्यति सा देवी यस्मात् सर्वं हि तन्मयम् ।
अदीक्षितोऽपि संन्यासी वनी पूज्योऽग्रतः शिवे ॥ १५ ॥
कौलिको यदि संन्यासी तस्योपास्तिविधिं शृणु ।
सन्ध्या-जपादिकं सर्वं कर्तव्यं प्रोक्तवर्त्मना ॥ १६ ॥
पूजां तु कुर्याद् बाह्यां वा मानसीं वाऽनुकूलतः ।
आश्रम-त्रितयस्थं तु गुरुं न प्रणमेद् बहिः ॥ १७ ॥
तथाश्रम-कनिष्ठं च मनसैव नमेत् सदा ।
उच्छिष्टमपि नो ग्राह्यं पादयोर्न च तर्पयेत् ॥ १८ ॥
कुमारी-शक्ति-शेषं तु स्वीकुर्याद् यत्नतो यतिः ।
गुरुपत्न्याश्च मातुश्च नान्यासां तु कदाचन ॥ १९ ॥
असंन्यासी गुरुरपि शिष्यं तं प्रणमेत् सदा ।
नारायणात्मकं मत्वा तेन दोषो न चोभयोः ॥ २० ॥
चतुर्थाश्रमसंस्थस्तु गुरुर्ज्येष्ठो यदि स्वतः ।
कर्तव्यस्तु प्रणामो वै तर्पणं चापि चर्वणम् ॥ २१ ॥
अदीक्षितं कनिष्ठं वा पित्रादिं पूजयेत् पुरः ।
विद्या-सम्बन्धतो योनि-सम्बन्धः प्रबलो यतः ॥ २२ ॥
प्रसङ्गात्पूजितश्चादौ स्वात्मीकाराय सर्वथा ।
प्रतीक्षेत् स्वात्मनो ज्येष्ठानन्यथा पतितो भवेत् ॥ २३ ॥

---

1. क्रमाज्ज्ये–क. ।

विशेषार्घ्यात्तु शक्तीनां वीराणां हेतुपात्रतः ।
अन्यथा पात्रदानात् तु देवताशापमाप्नुयात् ॥ २४ ॥
विशेषार्घ्याच्छक्तिशेषं वीरशेषं च हेतुतः ।
स्वीकुर्वन्नैव दुष्येत वीरः शक्तिरपीश्वरि ॥ २५ ॥
ग्राह्यं पात्रं दक्षकरे दीक्षावद्भिर्नरैः शिवे ।
अन्यैर्वामेन हस्तेन ग्राह्यमेवं विनिर्णयः ॥ २६ ॥
एवं समुपविश्यैव तर्पयेन्मूर्ध्नि वै गुरून् ।
देवतां हृदये तद्वदात्मानं मूलपङ्कज ॥ २७ ॥
हुनेत् कुण्डलिनीवह्नौ द्रव्यशेषं समन्त्रकम् ।
देवतातुष्टये तद्वन्महाफलसमाप्तये ॥ २८ ॥
पूजादिकमकृत्वा वा स्वीयां(यं) सामयिकार्चने ।
व्रती वापि हुनेदेव न दोषस्तत्र विद्यते ॥ २९ ॥
व्रतादिशङ्कया यस्तु न व्रजेदाहु(हू)तोऽपि सन् ।
व्रतं तस्य प्रतिहतमनर्थं च समाप्नुयात् ॥ ३० ॥
तस्मात् कनिष्ठाहूतोऽपि प्रविशेदेव मण्डले ।
गुरूणां सन्निधौ तत्तन्मन्त्रैर्नामयुतैः शिवे ॥ ३१ ॥
चरणे परमेष्ठ्यादींस्तर्पयेत् पूजयेदपि।
अदीक्षितानां देवेशि गुर्वादिक्रमतस्तथा ॥ ३२ ॥
तर्पणं मस्तके प्रोक्तं न गुर्वाद्यङ्घ्रिपङ्कजे ।
स्वगुरून् सन्तर्प्य पश्चाच्छिष्यैस्तर्पणमाददेत् ॥ ३३ ॥
असन्तर्प्य गुरून् स्वीयान् क्रमेण परमेश्वरि।
न पात्रं नापि पूजां वा स्वीकुर्यादपि वै गुरुः ॥ ३४ ॥
एवं गुरूंस्तु चरणे पादुकां मूर्ध्नि तर्पयेत् ।
गुरूंस्तत्र शिवादीन् वा नवमाद्यानथ त्रयम् ॥ ३५ ॥
हृदि त्रिकोणवद्देवीर्महामाहेश्वरीमुखाः ।
अष्टोत्तरशतं मूलामात्मानं चात्मविद्यया ॥ ३६ ॥
समर्च्य ओघान् स्वे मूर्ध्नि हृद्याम्नायानपीश्वरि।
तत उत्थाय देवेशि भक्तिभावेन संयुतः ॥ ३७ ॥

शक्तिशेषं गुरूणां च शेषं ग्राह्यमथापि वा।
वीराज्ज्येष्ठात् तथाचार्याद् ग्राह्यं शेषं तु चर्वणम् ॥ ३८ ॥
तद-भावेऽपि चान्यस्माज्ज्येष्ठाद् ग्राह्यं हिमाद्रिजे।
कथञ्चिदादौ तु गुरोरगृहीते तु शेषके ॥ ३९ ॥
सर्वान्ते वा गुरोः शेषो ग्राह्य एव नगात्मजे।
आज्ञां होष्यामीति ततः प्रार्थयेत् पात्रहस्तकः ॥ ४० ॥
प्रार्थनं चाभ्यनुज्ञानं ज्येष्ठेषूत्थाय वै भवेत्।
अन्यथा चाप्यवज्ञानाद् देवताशापमाप्नुयात् ॥ ४१ ॥
आचार्यमेवाद्रिकन्ये कनिष्ठमपि प्रार्थयेत्।
त्रिखण्डं मातृकायास्तु अकथाद्यं यथाक्रमात् ॥ ४२ ॥
आत्मविद्या शिवाख्यं च तत्त्वं तत्तत्समूहकम्।
प्रकृत्याद्यं च मायाद्यं शिवाद्यं त्रितयं तथा ॥ ४३ ॥
शरीराणां स्थूलसूक्ष्मकारणानां तथा त्रयम्।
ब्रह्मविष्णुरुद्ररूपग्रन्थीनामगदेहजे ॥ ४४ ॥
मिथुनत्रितयं वाणीवल्लभौ श्रीहरी तथा।
विद्याशङ्कररूपौ च त्रितयं हेतु-संस्तुतेः ॥ ४५ ॥
मूलबीजत्रयं तत्तत्क्रमेण तु विशेषितम्।
ब्रह्मविष्णुपशुपतिभ्यो हुनेद् वह्निशक्तितः ॥ ४६ ॥
मूलमध्यशिखारूप–कुण्डल्यग्नौ शिवात्मके।
एवं पात्रत्रयं हुत्वा पात्रं प्रक्षालयेत् सुधीः ॥ ४७ ॥
तत्त्वत्रयान्तरे यस्तु पात्रं पाणिद्वयं तथा।
क्षालयेदनिमित्तेन तस्य कर्म निरर्थकम् ॥ ४८ ॥
सदाशिवाय च ततः समष्ट्या तुर्य-पात्रकम्।
हुत्वाऽन्ते क्षालितेनैव पूर्णपात्रं हुनेच्छिवे ॥ ४९ ॥
हिरण्यपात्रमन्त्रेण ततः प्रक्षाल्य शङ्करि।
शक्त्या स्वर्णादिसंयुक्तमर्पयेत् पात्रमम्बिके ॥ ५० ॥
यत्किञ्चिद्वापि पात्रस्थं दत्त्वाऽनन्तफलं भवेत्।
सुवासिन्या कुमार्या च त्रितत्त्वान्ते महेश्वरि ॥ ५१ ॥

आचार्याय प्रदातव्यं सावशेषं हि पात्रकम् ।
एवं प्रोक्तविधानेन हुत्वा पात्राणि वै क्रमात् ॥ ५२ ॥
उच्छिष्टं तु समादेयं हेत्वादेर्ज्ज्येष्ठतः क्रमात् ।
विद्यासम्बन्धतो वापि योनिसम्बन्धतस्तथा ॥ ५३ ॥
ज्येष्ठानामपि चोच्छिष्टं दीक्षितानां तु भक्षयेत् ।
पूर्वं दीक्षायुतो ज्येष्ठो महादीक्षायुतश्च वै ॥ ५४ ॥
नान्यो(न्ये) ज्येष्ठाः समाख्याता वयो-विद्या-विशेषतः ।
वयोहीनं योनिमात्रज्येष्ठं च परिवर्जयेत् ॥ ५५ ॥
दीक्षाहीनस्य चोच्छिष्टं जनकस्यापि दीक्षितः ।
न भक्षयेत् सकृद्वापि भुक्त्वा पातित्यमाप्नु(या?)यात् ॥ ५६ ॥
तथा गुरुसमेभ्यश्च सम्प्रार्थ्योच्छिष्टमाददेत् ।
गुरोर्गुरुमुखास्तद्वद् गुरुज्येष्ठा अपीश्वरि ॥ ५७ ॥
सर्वे ते गुरवः प्रोक्तास्तेषां शिष्योऽपि स स्मृतः ।
सुवासिनीभ्यः ' शिष्याभ्यो देयं नान्यत्र शेषकम् ॥ ५८ ॥
विद्यासम्बन्धहीनोऽपि ज्येष्ठ आचार्यसत्तमः ।
शक्तिशेषानन्तरतस्तस्माद् ग्राह्यं तु चर्वणम् ॥ ५९ ॥
एवं पात्राणि स्वीकुर्यादुल्लासे योग्यताक्रमात् ।
आरम्भस्तरुणस्तद्वद् यौवनः प्रौढ एव च ॥ ६० ॥
प्रौढान्त्यश्चोन्मनस्तद्वदनवस्थ इति क्रमात् ।
एतद्भेदस्तु विज्ञेयो बोधानां तारतम्यतः ॥ ६१ ॥
यौवनान्तेषु सर्वेषामधिकारो वरानने ।
आचार्यस्य चतुर्थान्तमन्ये त्वभ्यासशीलिनाम् ॥ ६२ ॥
पानमेतत् त्रिप्रकारं दिव्यवीरपशुक्रमात् ।
विशेषार्घ्योद्वासनान्तं दिव्यपानं प्रकीर्तितम् ॥ ६३ ॥
ततः पश्चाद् वीरपानमन्यत्[1] स्यात्पशुपानकम् ।
दिव्यमेव ब्राह्मणे तु वीरं च क्षत्रवैश्ययोः ॥ ६४ ॥

---

1. 'स्यात्' इत्यस्य स्थाने 'यत्'–क. ।

शूद्रस्य त्रितयं ज्ञेयमेवं शास्त्रस्य निर्णयः ।
एवं यथोक्तबोधान्ते जपध्यानादिकं चरेत् ॥ ६५ ॥
अभ्यासस्यानुरोधेन नात्यन्तं स्याद् बहिर्मुखः ।
उत्तमा मध्यमास्त[1]द्वदधमाश्चाधमाधमाः ॥ ६६ ॥
चतुर्धा कौलिकाः प्रोक्तास्तेषां भेदमिमं शृणु ।
अशेष-जगतामात्मप्रसरत्वं सुवेत्ति यः ॥ ६७ ॥
स कौलिकोत्तमो ज्ञेयो भावयत्यनिशं तु यः ।
जगद्देच्यात्मनामैक्यं स मध्यः कौलिको मतः ॥ ६८ ॥
योऽन्तराधारचक्रेषु मानसार्चापरः सदा ।
अधमः स तु विज्ञेयो यो बाह्यार्चारतः सदा ॥ ६९ ॥
अधमाधमः स ज्ञेयो भवेदेवं चतुर्विधाः ।
एवमभ्यासानुरूपाद् ध्यानाद्यं तु समाचरेत् ॥ ७० ॥
उत्तमः कुलयोगो हि यल्लाभान्नानुशोचति ।
तमेव सर्वथा जन्तुः साधयेद् गुरुमार्गतः ॥ ७१ ॥
स्वविकल्पैक-संसिद्धिसारं जगदशेषकम् ।
स्वशक्तिमात्रं जानीयात् कुलयोगस्त्वयं शिवे ॥ ७२ ॥
एवमभ्यस्य सुचिरं शाम्भवीमुद्रयान्वितः ।
यथेच्छं तु पिबन् मद्यं सर्वं सर्वत्र भक्षयन् ॥ ७३ ॥
वसन् वेश्यासु सततं जीवन्मुक्तो न संशयः ।
पिबन् मुहुः पतन् भूमावुत्थाय च पुनः पिबन् ॥ ७४ ॥
करेणादाय कलशमागलान्तं पिबन् वमन् ।
शीतोष्ण-सुखदुःखादि-द्वन्द्वं पश्यन् समं सदा ॥ ७५ ॥
जपपूजाविहीनोऽपि स जीवन्मुक्त उच्यते ।
अन्तर्लक्ष्यं बहिर्दृष्टिः सन्तुष्टो निश्चल-स्थितिः ॥ ७६ ॥
एषा तु शाम्भवी मुद्रा जीवन्मुक्ति-फलप्रदा ।
अथ वक्ष्ये मण्डलीयान् धर्मान् कौलिकसम्भवान् ॥ ७७ ॥

---

1. मा तद्व–कं. ।

गुप्त्यै नतिर्देवतायां भक्तिः कार्या सदा बुधैः ।
गुरु-दैवत-मन्त्राणां समयाचारवर्त्मनः ॥ ७८ ॥
न निन्दां शृणुयात् क्वापि न तिष्ठेत् तत्र सर्वथा ।
मन्त्रं मुद्रामात्मनाम शिष्यादन्यत्र नो वदेत् ॥ ७९ ॥
सुवासिनी-समूहं च दृष्ट्वा भक्त्या नतिं चरेत् ।
पशुहस्तगतं नैव कुर्याच्च कुल-पुस्तकम् ॥ ८० ॥
न गच्छे(च्छे)त् पशुसङ्गं वै पशुशास्त्रं विवर्जयेत् ।
पशवस्तु परज्ञानभक्तिश्रद्धाविवर्जिताः ॥ ८१ ॥
सच्छास्त्रनिन्दकास्तेषां शुष्कतर्कैकनिर्मितम् ।
पशुशास्त्रमिति प्रोक्तं साधकस्तु न तत्स्पृशेत् ॥ ८२ ॥
सर्वदा कुलशास्त्रं तु चिन्तनीयं प्रयत्नतः ।
मण्डले शिवरूपं तु सदा सर्वं विभावयेत् ॥ ८३ ॥
विशेषेण तु शक्तीश्च भावयेद् देवतात्मिकाः ।
न कुर्यादपमानं हि नाज्ञां तासामसंश्रयेत् ॥ ८४ ॥
कुलद्रव्यं निषेवेत मण्डलान्तर्न चान्यथा ।
मण्डलाद् बाह्यतो यस्तु कुलद्रव्यं निषेवते ॥ ८५ ॥
पशुपानं तेन कृतं सत्यं देवि ब्रवीमि ते ।
मण्डलाद् बाह्यतोऽप्येताः सुवासिन्यस्तवांशजाः ॥ ८६ ॥
निषेवन्त्यः कुलद्रव्यं न दोषं प्राप्नुवन्ति ताः ।
प्रातःस्मृत्यादिसन्ध्यान्तं भूशुद्ध्यादिकमेव च ॥ ८७ ॥
कुर्याज्जपेन्मुख्यमन्त्रानन्य[1]मन्त्रान् सकृत्पठेत् ।
पूजयेत् तु कथंचिद्वा शक्तिप्रज्ञानुसारतः ॥ ८८ ॥
स्तोत्रं च कवचं नाम्नामावलिं चापि नित्यशः ।
एष नैत्यकधर्मस्तु साधकानां सुसंमतः ॥ ८९ ॥
दीक्षां प्राप्य तु यो मर्त्यः सुकल्पश्चाप्युपासने ।
त्यक्तुमिच्छेत मोहेन [2]स्वदेहं पतितो हि सः ॥ ९० ॥

---

1. न्यान् मन्त्रान्-क. ।
2. स्वं देहं–क. ।

उपासनं[1] विहत्यासौ न दीक्षाफलमश्नुते ।
समानां शतकं जीवेद् देवतोपासनाय वै ॥ ९१ ॥
इतीच्छेत सदा मर्त्यो न [2]मृतिं दीक्षितः क्वचित् ।
दीक्षितस्यात्मसन्त्यागस्तस्मान्नैव विधीयते ॥ ९२ ॥
आत्मानं त्यक्तुमिच्छेत मोक्षार्थमपि यो नरः ।
प्रयागादिष्वपि शिवे दुर्लभा तस्य सद्गतिः ॥ ९३ ॥
तस्माद् दीक्षायुतो नैव उपास्तिविहतिं चरेत् ।
उपास्याचरणादेव भवेत् साधकसम्मतः ॥ ९४ ॥
एवं गुरूक्ति-सच्छास्त्र-विश्वासाद् भक्तियोगतः ।
सर्वमात्मवता कार्यमन्यथा नाशमृच्छति ॥ ९५ ॥
अयं सर्वोत्तमो धर्मः शिवोक्तः सुखसिद्धिदः ।
जितेन्द्रियस्य सुलभो नान्यस्यानन्तजन्मभिः ॥ ९६ ॥
यदूर्ध्वरेतसां सर्वत्यागिनामनिकेतिनाम् ।
क्षणेन स्मृतमात्रं[3] तु मोहमुत्पादयत्यलम् ॥ ९७ ॥
तदेवात्र हि संसिद्धौ कारणं सर्वमीरितम् ।
इतो मद्यमितो मांसं भक्ष्यमुच्चावचं तथा ॥ ९८ ॥
तरुण्यश्चारुवेषाढ्या मद[4]घूर्णितलोचनाः ।
तत्र संयतचित्तत्त्वं सर्वथा ह्यतिदुष्करम् ॥ ९९ ॥
भक्तिश्रद्धाविहीनस्य कथं स्यादेतदीश्वरि ।
महाविघ्नसहस्रौघमकरग्राहसङ्कुलम् ॥ १०० ॥
सन्मुक्ति-द्वीपनगरी सिन्धुमार्गं भयानकम् ।
दृढश्रद्धाकर्णयुतां भक्तिनौकां विना जनः ॥ १०१ ॥
सदाचारानुकूलोद्यद्वायुमात्रेण शङ्करि ।
न सन्तरेदुपायानां सहस्रैः प्रगुणैरपि ॥ १०२ ॥

---

1. नवि–क. ।
2. मृत्यु दीक्षितः–कय ।
3. मात्रेण मोह–ख. ।
4. मदारुणविलोचनाः–ख. ।

तस्मात् सदा भक्तियुतः श्रद्धाभावन-संयुतः ।
कौलमार्गमुपासीनः शुभां गतिमवाप्नुयात् ।
एतत्त्वया तु यत्पृष्टं तदाख्यातमगात्मजे ॥ १०३ ॥

॥ इति श्रीत्रिपुरार्णवे त्रिपुरासारसर्वस्वे स्वात्मीकारादिकथनं नाम चतुर्दशस्तरङ्गः ॥ १४ ॥

●

अथ पञ्चदशस्तरङ्गः

गिरिजोवाच

महेश करुणासिन्धो मत्प्राणप्रियवल्लभ ।
मुद्राणां लक्षणं ब्रूहि त्रिपुरार्णवसंस्थितम् ॥ १ ॥

शिव उवाच

शृणु प्रियतमे वक्ष्ये मुद्राणां लक्षणं परम्।
यद्दर्शनान्मुदं राति मुद्रा तस्मात्प्रकीर्तिता ॥ २ ॥
त्रिपुरार्णवसम्प्रोक्तविधिना संशृणु प्रिये।
संक्षोक्षि(भि)णी विद्राविण्याकर्षणी च वशङ्करी ॥ ३ ॥
उन्मादिनी महाङ्कुशा खेचरी बीजरूपिणी ।
योनिः पाशाङ्कुशौ चापबाणाश्चेति त्रयोदश ॥ ४ ॥
त्रयोदशविधा मुद्रा देवतायाः प्रदर्शने ।
मध्यादित्रितयं चोर्ध्वमुखं सम्मिलितं द्वयोः ॥ ५ ॥
अङ्गुलं पृष्ठमिलितमङ्गुष्ठाग्रयुतं तथा ।
ऋजुरूपे च तर्जन्यावग्रदेशसुयोजिते ॥ ६ ॥
संक्षोभिणी नाम मुद्रा प्रथमा परिकीर्तिता ।
अत्रैव मध्यमाद्वन्द्वं तर्जनीवत् स्थितं तथा ॥ ७ ॥
तत्पार्श्वे तर्जनीयुग्मं द्वितीयेयं प्रकीर्तिता।
अङ्गुष्ठादित्रयं प्राग्वद्युक्तं स्यात्परमेश्वरि ॥ ८ ॥
अनामा च कनिष्ठा च ऋजुरूपा च पूर्ववत् ।
तृतीयेयं च करयोः सम्प्रोतान्यङ्गुलानि च ॥ ९ ॥
मुष्टिरूपकरद्वन्द्वोदरसंस्थानि तानि तु।
चतुर्थीयन्तु विख्याता कनिष्ठाद्वितयं तु यत् ॥ १० ॥
दक्षोपरि स्थिता वामेत्येवं व्यत्यस्य तद्द्वयम्।
मध्यमाभ्यां धृतेऽनामातर्जन्यौ च प्रसारिते ॥ ११ ॥

मध्यमाग्रयुताङ्गुष्ठे मुद्रेयं पञ्च मी मता ।
वक्रतर्जनिकायोगादियं षष्ठी प्रकीर्तिता ॥ १२ ॥
वामानामाकनिष्ठोर्ध्वस्थितं तदितरद्वयम् ।
तर्जनीभ्या(म)वष्टब्धद्वयाग्रं मध्यपार्श्व(र्श्व)योः ॥ १३ ॥
तदग्रद्वितयं युक्तं तदन्तःसन्निधापितम् ।
अङ्गुष्ठाग्रद्वयं हस्तद्वयवेष्टनतः कृतम् ॥ १४ ॥
सप्तमी मध्यमायुग्ममनामावत् तथा पुनः ।
अनामा मध्यमावत्स्यादङ्कुशैवाष्टमी भवेत् ॥ १५ ॥
नवमी तु पुरा प्रोक्ता तर्जन्यौ मुष्टिनिर्गते ।
वेष्टिते व्यत्यस्य करौ मध्यच्छिद्रयुतं तथा ॥ १६ ॥
वामस्कन्धे तु विन्यस्ता दशमी सम्प्रकीर्तिता ।
वक्रतर्जनिका मुष्टेर्निर्गता चाङ्कुशा मता ॥ १७ ॥
तीर्थाऽऽह्वाने तु सम्प्रोक्ता क्रोंबीजेन तु संयुता ।
दक्षस्कन्धे सन्निविष्टा तीर्थाऽऽह्वानाङ्कुशा परा ॥ १८ ॥
वाममुष्टिर्हृत्समीपे द्वादशी परिकीर्तिता ।
तदग्रे दक्षिणा मुष्टिश्चरमा सम्प्रकीर्तिता ॥ १९ ॥
वाम-मध्यानामिके च ऊर्ध्वस्थे दक्षयोस्तयोः ।
दक्षमध्यानामिकाग्रे तथा वामस्थयोस्तयोः ॥ २० ॥
तर्जनीं च कनिष्ठां च योजयेद् वामदक्षयोः ।
अधोमुखी धेनुमुद्रा प्रोक्तैषा परमेश्वरि ॥ २१ ॥
दक्षतर्जन्यूर्ध्वतस्तु कनिष्ठायास्तथैव च ।
वामाभ्यां वेष्टयेत् जितेभ्यामङ्गुष्ठाग्रे सुयो ॥ २२ ॥
करपृष्ठद्वयं युक्तं मध्यमानामिकाद्वयम् ।
वक्ररूपं सुयुक्तं च तार्क्ष्यमुद्रेयमीरिता ॥ २३ ॥
अङ्गुलाग्राणि संयोज्य कुम्भमुद्रा तु कुम्भवत् ।
दक्षोध्व(र्ध्व)रीत्या संवेष्ट्य करौ प्रोताङ्गुलौ शिवे ॥ २४ ॥
पृष्ठतः परिवर्त्याथ मध्यमादित्रयं तथा ।
मुष्टौ स्थितं तर्जनिकाऽङ्गुष्ठौ बाह्ये ऋजूयुते ॥ २५ ॥

संहारमुद्रा सम्प्रोक्ता देवतोद्वासकर्मणि ।
तर्जनी मुष्टि-निर्मुक्ता भ्रामयेत् त्रिः प्रदक्षिणम् ॥ २६ ॥
ज्योतिर्मुद्रा तु सम्प्रोक्ता नियुक्तारातिके शिवे।
वामाङ्गुष्ठं दक्षमुष्टौ दक्षाङ्गुष्ठाग्रयोजितम् ॥ २७ ॥
वामाङ्गुलाग्रं चैषा तु शङ्खमुद्रा प्रकीर्तिता ।
दक्षोर्ध्वक्रमयोगेन तलोपरि तलं न्यसेत् ॥ २८ ॥
पृथक् कृतान्यङ्गुलानि कनिष्ठामूलदेशके ।
अङ्गुष्ठमूलयोगेन चक्रमुद्रा समीरिता ॥ २९ ॥
दक्षाङ्गुष्ठादिकं वामाङ्गुष्ठसन्ध्यादिषु क्षिपेत् ।
अङ्गुलाग्राणि संयोज्य करपृष्ठे तु मध्यमे ॥ ३० ॥
ऋजूर्ध्वाग्रे योजिते च कूर्परान्तं करद्वयम् ।
संयोजितं समाख्याता गदामुद्रेति शङ्करि ॥ ३१ ॥
दक्षे कनिष्ठामूले तु अङ्गुष्ठाग्रं विनिक्षिपेत् ।
ऋजुयुक्तोर्ध्वाङ्गुलानि खड्गमुद्रा भवेदियम् ॥ ३२ ॥
करयोस्तलमूलं च कनिष्ठाङ्गुष्ठमस्तकम् ।
संयोज्य चेषद्वक्राणि पृथगूर्ध्वाङ्गुलानि च ॥ ३३ ॥
परस्परं सम्मुखाग्राण्येषा पद्माभिधा भवेत् ।
पुरा प्रोक्ता योनिमुद्रा सैवात्रानन्तरा मता॥ ३४ ॥
दक्षमुष्टि-विनिर्गच्छत्तर्जन्याद्यङ्गुलत्रयम् ।
पृथगृजूर्ध्वाग्रकं तु त्रिशूलाख्या भवेदियम् ॥ ३५ ॥
तार्क्ष्य-धेनुद्वयं प्रोक्तं शृणु तत्पश्चिमं शिवे ।
दक्षमुष्टि-विनिर्गच्छत्तर्जन्याद्यङ्गुलद्वयम् ॥ ३६ ॥
तर्जनी-पृष्ठदेशे तु मध्यमोदर-योजनात् ।
ऊर्ध्वाङ्गुलाग्रा सम्प्रोक्ता मुद्रा डमरुसंज्ञिता ॥ ३७ ॥
मुष्टिद्वयं कनिष्ठायां करभान्तं तु योजितम् ।
उत्तानं तु तलं कृत्वा चाङ्गुष्ठद्वितयं ऋजु ॥ ३८ ॥
दक्षोत्तराग्रकं कुर्यान्मुद्रा शार्ङ्गाह्वया भवेत् ।
मुष्टिद्वयं विनिर्गच्छदङ्गुष्ठं चोर्ध्वमस्तकम् ॥ ३९ ॥

प्रागग्रां तर्जनीं कुर्यादियं नाराच-संज्ञिता ।
दक्षहस्तोर्ध्वयोगेन वेष्टयित्वा कनिष्ठिके ॥ ४० ॥
वाममध्यानामिकयोरग्रभागे तु वेष्टयेत् ।
तर्जन्या दक्षया वामतर्जन्यग्रेण योजयेत् ॥ ४१ ॥
दक्षाङ्गुष्ठा मध्यमाग्रमनामाग्रं नभोमुखम् ।
वामाङ्गुष्ठं दक्षपृष्ठे मुद्रा कौस्तुभ-संज्ञिता ॥ ४२ ॥
अधोमुखं दक्षहस्तमुत्तानं वामहस्तकम् ।
दक्षतर्जनिकां वामकनिष्ठोपरि निक्षिपेत् ॥ ४३ ॥
वामतर्जनिकायाञ्च कनिष्ठां दक्षिणां क्षिपेत् ।
वामतर्जनिकापृष्ठाद् वामाङ्गुष्ठोदरे क्षिपेत् ॥ ४४ ॥
दक्षमध्याऽनामिकाग्रे दक्षाङ्गुष्ठोदरे क्षिपेत् ।
वाममध्यानामिकाग्रे मुद्रा श्रीवत्ससंज्ञिता ॥ ४५ ॥
दक्षमुष्टिर्दक्षिणाग्रे मुद्रा मुसलसंज्ञिता ।
कनिष्ठाङ्गुष्ठयुगलकरपृष्ठाग्रयोः पृथक् ॥ ४६ ॥
एवंविधा योनिमुद्रा त्रिखण्डा सम्प्रकीर्तिता ।
एता मुद्रा जपादौ तु प्रदर्श्या देवतामुदे ।
एतन्मुद्राविवरणं प्रोक्तं शुश्रूषितं तु ते ॥ ४७ ॥

॥ इति श्रीत्रिपुरार्णवे त्रिपुरासारसर्वस्वे मुद्राविवरणं नाम पञ्चदशस्तरङ्गः ॥ १५ ॥

●

अथ षोडशस्तरङ्गः

पार्वत्युवाच

शङ्कराऽशक्तविषयां पूजां वद दयानिधे ।
असमर्थैस्तथा मन्दैर्नैषा कर्त्तुं प्रभाविता ॥ १ ॥

महादेव उवाच

शृणु देवि प्रवक्ष्यामि पूजां गौणां लघीयसीम् ।
मुख्य-द्रव्येण पूजायां न संक्षेपो विधीयते ॥ २ ॥
आपत्काले त्वावृतिं तु चतुर्थाद्यामथापि वा ।
षष्ठाद्यां वापि कुर्वीत मुख्या वै पञ्चिकास्वपि ॥ ३ ॥
होमं मन्त्रं समावृत्त्या सर्वभूताभिधं बलिम् ।
शान्तिस्तुतिं यथाशक्त्या चैवमन्यत्र शङ्करि ॥ ४ ॥
अनुकल्पेन पूजायामपीत्थं तु लघीयसीम् ।
अत्राप्यशक्तौ वक्ष्यामि समाहिततया शृणु ॥ ५ ॥
सामान्यार्घ्यमेकमेव पीठशक्तीश्च पूजयेत् ।
यथाशक्त्या समावाह्य सम्पूज्योक्तविधानतः ॥ ६ ॥
मूलां त्रिस्तिथि-नित्यां च षोडशीं तत्परामपि ।
त्रिगुरून् पादुकामङ्गत्रिकोणाखण्डदेवताः ॥ ७ ॥
अष्टादशेमाः सम्पूज्य चान्याश्चापि तु देवताः ।
माला-मन्त्रोक्तनाम्ना तु प्रत्येकं कुसुमाक्षतैः ॥ ८ ॥
पूजयन्नपि पूजायाः फलं प्राप्नोत्यसंशयम् ।
अलब्धे चोपकरणे मनसार्चां समाचरेत् ॥ ९ ॥
माला-मन्त्रजपो वापि कर्तव्यः परमेश्वरि ।
सर्वमेतद् बाह्यरते चान्तरोपासनेन तु ॥ १० ॥
आन्तरोपासना देवि तन्त्रेषु बहुधा स्थिता ।
तत्र किञ्चित् प्रवक्ष्यामि सावधानमनाः शृणु ॥ ११ ॥

सुषुम्णोर्ध्वं सुधारश्मि-कोटिकान्तिसमप्रभम् ।
अधोमुखं गुरुस्थानं सहस्रदलशोभितम् ॥ १२ ॥
सुषुम्णाधो रक्तवर्णं सहस्रदलपङ्कजम् ।
कुलाख्यं कर्णिकासंस्थं कुलकुण्डे स्थिता हि सा ॥ १३ ॥
कुण्डलीशक्तिरित्युक्ता तटित्कोटिनिभारुणा ।
अकुले पूर्णचन्द्राभः श्रीगुरुः परमेश्वरः ॥ १४ ॥
अहकारात्मनावेतौ भावयित्वा व्यवस्थितौ ।
चतुर्दलाधारपद्मादधःस्थाद्विषुंवाख्यकम् ॥ १५ ॥
षट्दलं रक्तवर्णं स्यात् तदाज्ञां द्योत-सप्तके ।
क्रमेण तां नयेद् देवीं गन्धाद्यैः पञ्चभिर्यजन् ॥ १६ ॥
ताम्बूलं प्रणतिं चापि ततस्तु शिवसंयुताम् ।
ध्यायन्क्षणं तु विश्रम्य शून्यत्रयमयौ स्मरेत् ॥ १७ ॥
अहकारौ तत्र तौ तु तत्त्वाद्यन्तौ प्रकीर्तितौ ।
तत्त्वाद्यः शून्यरूपौ वै विसर्गस्त्वन्त्य ईरितः ॥ १८ ॥
अहकारौ तु तस्माद् वै शून्यत्रितयरूपकौ ।
तदेव तेजस्त्रितयं(य) महंरूपं हृदि स्फु(स्म)रेत् ॥ १९ ॥
एवमादिप्रकारेण भावयन् भवजिज्जनः
एवंविधोपासकानां न पूजादिर्विधीयते ।
एवं ते सर्वमाख्यातं किमन्यच्छ्रोतुमिच्छति ॥ २० ॥

॥ इति श्रीत्रिपुरार्णवे त्रिपुरासारसर्वस्वे संक्षेपपूजाविधिर्नाम षोडशस्तरङ्गः ॥ १६ ॥

●

अथ सप्तदशस्तरङ्गः

देव्युवाच

महादेव ब्रूहि विभो पूजां नैमित्तिकाभिधाम् ।
कृपया परया युक्तो यद्यहं तव वल्लभा ॥ १ ॥

वृषध्वज उवाच

निशामय महादेवि वदतो मम तद्विधिम् ।
नित्यां नैमित्तिकां चापि साधकस्त्वाचरेत् सदा ॥ २ ॥
अशक्तो नित्यपूजायां मालामन्त्रं पठेच्छिवे
नैमित्तिकां सर्वथैव कुर्यात् साधकपुङ्गवः ॥ ३ ॥
तत्रासमर्थो गुर्वाद्यैः कारयेदर्चनं बुधः ।
प्रतिमासं चैकवारमपि वार्चां तु कारयेत् ॥ ४ ॥
तत्राप्यशक्तः षड्भिस्तु मासैर्वा कारयेत् तु ताम् ।
तत्रोक्तविधिना हेतुमुखैर्द्रव्यैस्तु भक्तितः ॥ ५ ॥
यथाशक्त्या पराशक्तेः पूजां वै कारयेत् सुधीः ।
आलस्यादथवा लोभात् षड्भिर्मासैरनर्चयन् ॥ ६ ॥
पशुर्भवेत् तस्य सङ्गं साधकः परिवर्जयेत् ।
पञ्चपर्वयुगाद्यादौ तथा पुण्याधिके दिने ॥ ७ ॥
तत्तद्द्रव्यैः पूजयेद् वै कुलपर्वस्वपीश्वरि ।
समातिथिः कुलतिथिर्द्वितीया दशमी तथा ॥ ८ ॥
कुलाकुलतिथिः षष्ठी चान्या स्यादकुला तिथिः ।
कुलवारौ भौमशुक्रौ कुलाकुलमयो बुधः ॥ ९ ॥
कुलं स्यात् समनक्षत्रं रौद्रवारुणमूलभम् ।
कुलाकुलं चाभिजिच्च तथाऽन्यदकुलं स्मृतम् ॥ १० ॥

कुलतिथ्यादिकं देवि कुलपर्वप्रकीर्तितम् ।
कृष्ण[1]त्रयोदशी शुक्ले[2] तृतीया दशमी तथा ॥ ११ ॥
असितद्वादशी चामा शुक्लषष्ठी सितेतरा ।
चतुर्दशी तथा शुक्ल[3]नवमी कृष्णपञ्चमी ॥ १२ ॥
पूर्णमासी शुक्लगता चतुर्थी कृष्णपक्षगा ।
एकादशीति चैत्रादिमासेष्वेकैकशो भवेत् ॥ १३ ॥
एतानि देवि(वी)पर्वाणि पूजयित्वा महाफलम् ।
कुलपर्वस्वपि तथा स्नानं दानं जपो व्रतम् ॥ १४ ॥
पूजनं चाप्यनन्तं स्यात् त्रिपुराप्रीतिकारकम् ।
नित्यपूजां दिवा कुर्याद् रात्रौ नैमित्तिकीं तथा ॥ १५ ॥
दिवापर्वसमायोगे दिवाऽपि परमेश्वरि ।
काले प्राप्ते नित्यपूजां पश्चात् कुर्यादगाङ्गजे ॥ १६ ॥
एवं सन्ध्यादिकं सर्वं मध्येऽन्त्ये वा समाचरेत् ।
मध्ये त्वावश्यके प्राप्ते समाप्यैकाङ्गमीश्वरि ॥ १७ ॥
पात्रादिस्थापनारूपं कुर्यादावश्यकक्रियाम् ।
एकदा पर्वणां योगे चाङ्गाधिक्ये च कर्मणाम् ॥ १८ ॥
उल्लिख्य तु निमित्तानि सङ्कल्पे त्वखिलानि तु ।
आवर्त्तयेत् पूजनं वै तत्तदङ्गेन मिश्रितम् ॥ १९ ॥
तदभावे तु चैक(के)न पूजनेन कृतार्थता ।
गुरु-शक्त्यादि-पूजा तु [4]सर्वान्ते भवतीश्वरि ॥ २० ॥
पूर्णिमायां चैत्रमासि त्रिपुरां दमनैर्यजेत् ।
पूजयेद् दमनं देवि तथैव कुसुमाक्षतैः ॥ २१ ॥
शिवप्रसादसम्भूत ! अत्र सन्निहितो भव ।
शिवकार्ये समुच्छिद्य नेतव्योऽसि शिवाज्ञया ॥ २२ ॥
रतिकामौ तत्र यजेद् यथाविभवविस्तरम् ।
समूलं वा तथा गुच्छमाहरेदस्त्रमन्त्रतः ॥ २३ ॥

---

1. ष्णा त्रयो–क.।
2. क्ला तृती–क.।
3. क्ला नव–क.।
4. 'सर्वान्ते भवतीश्वरि' इत्यस्य स्थाने 'पूजां कुर्यात् सर्वान्ततः शिवे'–क.।

अलाभे तु क्रयक्रीतं सम्पूज्या[1]हृत्य पूजयेत् ।
पात्रे संस्थाप्य सम्पूज्य नववस्त्रेण छादयेत् ॥ २४ ॥
जपेदघोरमन्त्रेण धेनुमुद्रां प्रदर्शयेत् ।
अघोरे वाक्तथा घोरे ह्रीं सर्वतः सर्व शर्वे- ।
भ्यो घोरतरे श्रीं नमस्तेऽस्तु रुद्ररूपेभ्यः ।
ह्रीं श्रीमादौ वेदमुखं प्रोक्षयेदिति मन्त्रतः ॥ २५-२६ ॥
दीक्षोक्तवत्तु कलशं पूर्णपात्रेण संयुतम् ।
तण्डुलैर्भरितं तत्र पूजयेत्त्रिपुराम्बिकाम् ॥ २७ ॥
वसुपत्रं कर्णिकायां नवयोनिं च बाह्यतः ।
भूपुरं सिन्दूरकृतं तत्र तत्कलशं क्षिपेत् ॥ २८ ॥
तद्दक्षिणेऽष्टपत्रस्य कर्णिका शोकगर्भिता ।
नानावर्णैः सुरुचिरा तरुमूले त्रिकोणकम् ॥ २९ ॥
त्रिकोणे कामदेवं तु रति-प्रीतियुतं यजेत् ।
पूजयेत् त्रिपुरां तद्वत् कलशे पर्वतात्मजे ॥ ३० ॥
यन्त्रादावपि सम्पूज्य सर्वत्र दमनैर्यजेत् ।
पञ्च-पूजादिहोमाद्यं ततो निर्वर्तयेत् क्रमात् ॥ ३१ ॥
तथाग्निं बलिदेवांश्च गुर्वाद्यं दमनैर्यजेत् ।
पूजान्ते तस्य निर्माल्यं धारयेन्मूर्ध्नि भक्तितः ॥ ३२ ॥
सवस्त्र-दक्षिणायुक्तं कलशं यत्प्रपूजितम् ।
दद्यात् तत्तु सुवासिन्यै ब्राह्मणायाथवा शिवे ॥ ३३ ॥
चैत्रादिज्येष्ठपर्यन्तं नागाङ्केन्द्र(न्दु)दिनेऽथवा ।
दमनैः पूजयेद् देवीं भक्तिश्रद्धासमन्वितः ॥ ३४ ॥
पवित्रैस्त्रिपुरामर्चेच्छ्रवणे प्रोक्तरात्रिषु ।
आश्विनान्तेषु वा पूजां पवित्रैः पर्वतात्मजे ॥ ३५ ॥
सुवर्ण-रौप्य-कौशेय-कार्पास-शण-मुञ्जकैः ।
दर्भैर्निमि(र्मि) तसूत्रेण पवित्रं तु विधीयते ॥ ३६ ॥

---

1. हृदित्य–मूलपाठात् ।

प्रोक्तेषु शणमुञ्जादि वनस्थानामुदीरितम् ।
भूभुजां तु सुवर्णादि सर्वेषां पट्टसूत्रजम् ॥ ३७ ॥
रक्तकौशेयसूत्रोत्थं त्रिपुरा-परमप्रियम् ।
वितस्तित्रितयं मालाकारवद्वेष्टयेत् क्रमात् ॥ ३८ ॥
तदर्धान्यूनमपि वा वित्तशाठ्यं विवर्जयेत् ।
तत्रान्त्यसूत्रेण समप्रदेशे ग्रन्थयेद् दृढम् ॥ ३९ ॥
संयोज्य सूत्रान्त्ययुगं ग्रन्थयेच्चरमं दृढ(म्) ।
ग्रन्थिभिः षण्णवतिभिस्तावत्सूत्रैर्विनिर्मितम् ॥ ४० ॥
एकं षोडशरूपं तु द्वयमेकं तदात्मकम् ।
तत्तदावृतिसंख्यानि सामान्यान्यानि पार्वति ॥ ४१ ॥
बलीनां तु त्रिसंख्यानि गुर्वादीनामपीश्वरि ।
अष्टगन्धेनानुघृष्य पात्रे शुद्धेऽधिवासयेत् ॥ ४२ ॥
महत्पवित्रं कलशे ततः षोडशरूपकम् ।
चक्रराजे सुवासिन्यामग्नावेकात्मकं तथा ॥ ४३ ॥
अन्यानि तत्तदावृत्तौ बल्यादिष्वपि वै क्रमात् ।
पूर्ववत्कलशं दद्यात् पवित्रैरिति पूजनम् ॥ ४४ ॥
एवमन्येषु तद्द्रव्यैर्देवतामग्निमेव च ।
सुवासिनीसामयिकानर्चयेद्विधिवच्छिवे ॥ ४५ ॥
आश्विनशुक्लप्रतिपत्समारभ्य महेश्वरि ।
नवरात्रव्रतं कुर्यात् तद्विधानं निगद्यते ॥ ४६ ॥
सम्पूज्याद्यतिथौ कुर्याज्जपं होमं शतं शतम् ।
द्वितीयादौ द्वित्रिशतजपहोमौ समाचरेत् ॥ ४७ ॥
नवम्यामधिकं चैकं शतं स्याज्जपहोमयोः ।
एका सुवासिनी तद्वदधिका पूजने भवेत् ॥ ४८ ॥
दुर्गामुमां तथा गौरीं पद्मामपि रमां तथा ।
लक्ष्मीं च भारतीं तद्वन्मेधामपि ततः परम् ॥ ४९ ॥
स्व(स)रस्वतीं नवम्यां तु महात्रिपुरसुन्दरीम् ।
पूजयेत् तु सुवासिन्यां नवम्यन्तं यथाक्रमात् ॥ ५० ॥

कुमार्यां वापि तद्वत्तु पृथङ्नैवेद्यमाचरेत् ।
मुद्गैस्तिलैस्तथा माषैर्हरिद्रा[1]द्यैर्गुडैरपि ॥ ५१ ॥
दधिभिश्च घृतैर्दुग्धैः संस्कृतान्नैश्च पायसैः ।
आवृत्यन्तं[2] तु निर्वर्त्य नैवेद्यस्य जपान्ततः ॥ ५२ ॥
शतं जपेत्तु होमान्ते शतधा च पृथग् हुनेत् ।
एवमेव द्वितीयादौ तथैव तु सुवासिनी ॥ ५३ ॥
पूजाङ्गतोऽन्या सम्पूज्या चालाभे पूजयेत् तु ताम् ।
इयं पूजा महापुण्या त्रिपुराप्रीतिकारिणी ॥ ५४ ॥
एतां विना हीयते वै त्रिपुरोपासकः शिवे ।
कार्तिके(तु)प्रकुर्वीत दीपपूजामगात्मजे ॥ ५५ ॥
घृतपक्वपिष्टजेषु डमरु-प्रतिभेषु वै ।
पात्रे तु. दीपान् प्रज्वाल्य क्रमेण तु समर्पयेत् ॥ ५६ ॥
अभ्य(भ्य)र्च्योक्तविधानेन यन्त्रराजं महेश्वरि ।
आवृत्त्यन्तं समभ्यर्च्य ततो दीपान् समर्पये(त्) ॥ ५७ ॥
दीपोपचारमन्त्रेण तत्तन्नामान्ततोऽर्पयेत् ।
अवृत्तौ पूजितानां तु क्रमेण प्राणवल्लभे ॥ ५८ ॥
नागनन्देदु(न्दु)संख्याता दीपाः स्युर्मुख्यकल्पकाः ।
सकृत् प्रपूजनादेवं वाञ्छितार्थान् समा लभेत् ॥ ५९ ॥
एवं प्रोक्त-निमित्तेषु कुर्यान्नैमित्तिकार्चनम् ।
अशक्तः सर्वपूजायां दमनं च पवित्रकम् ॥ ६० ॥
पूजयेन्नवरात्र[3]ञ्च सर्वपूजा-फलोदयम् ।
एतत्त्रयमकृत्वा तु न भवेदखिलं फलम् ।
एतत्ते सर्वमाख्यातं किमन्यच्छ्रोतुमिच्छसि ॥ ६१ ॥

॥ इति श्रीत्रिपुरार्णवे त्रिपुरासारसर्वस्वे नैमित्तिकपूजाकथनं नाम सप्तदशस्तरङ्गः ॥ १७ ॥

●

1. द्राभिर्गु–क. ।
2. त्यन्ते तु–क. ।
3. त्रे च–क. ।

अथाष्टादशस्तरङ्गः

देव्युवाच

देव देव महेशान परिपूर्ण सनातन ।
पुरा यः सूचितो मालामन्त्रस्तं कथयस्व मे ।
खड्गसिद्धिप्रदं नृणां महासाम्राज्यदायकम् ॥ १ ॥

ईश्वर उवाच

शृणु देवि प्रवक्ष्यामि यन्मां त्वं परिपृच्छसि ।
तस्य श्रवणमात्रेण ललिता प्रीतिमाप्नुयात् ॥ २ ॥
इदं रहस्यं तन्त्रेषु गोपितं परमार्थदम् ।
न वक्तव्यं कस्यचिद् वा लोभान्मोहादपीश्वरि ॥ ३ ॥
म(ा)लामन्त्रं महापुण्यं जप्त्वा सिद्धिमवाप्नुयात् ।
ऋषिस्तु वरुणादित्य उपस्थाधिष्ठितात्मकः ॥ ४ ॥
गायत्रीछन्द इत्युक्तं ललिता देवतेरिता ।
मूलवत् तु प्रविन्यस्य ध्यायेत्तां परदेवताम् ॥ ५ ॥
पद्मरागप्रतीकाशां त्रिनेत्रां चन्द्रशेखराम् ।
नवरत्नलसद्भूषां भूषितां पादमस्तकाम् ॥ ६ ॥
पाशाङ्कुशौ पुष्पशरान्दधतीं पुण्ड्रचापकम् ।
पूर्णतारुण्य-लावण्य-तरङ्गितकलेवराम् ॥ ७ ॥
स्वसमानाकार-वेष-कामेशाश्लेषसुन्दराम् ।
ध्यात्वैवं मानसैर्देवीमाराध्य प्रपठेत् ततः ॥ ८ ॥
अथ मालामन्त्रमिह प्रवक्ष्यामि शृणु प्रिये ।
व(ा)ग्लज्जा श्रीः समुच्चार्य तारं हृदयमेव च ॥ ९ ॥
त्रिपुरा-शब्दतः सुन्दरीति प्रोक्त्वा[1] ततः परम् ।
हृदयाच्छिरसस्तद्वच्छिखा-कवचनेत्रतः ॥ १० ॥

---

1. 'प्रोक्त्वा' इत्यस्य स्थाने 'प्रोक्ता'–ग. ।

अस्त्राद् देवि समालिख्य कामेश्वरि भगात् ततः ।
मालिन्यथ नित्यक्लिन्ने भेरुण्डे वह्निवासिनि ॥ ११ ॥
महाविद्येश्वरि शिवदूति वै त्वरिते कुलात् ।
सुन्दर्यथ तु नित्ये नीलपताके च तत्परम् ॥ १२ ॥
विजये सर्वतो मङ्गले ज्वालान्ते तु मालिनि ।
चित्रे महान्ते नित्ये च परमेश्वर-शब्दतः ॥ १३ ॥
परमेश्वरि मित्रीशषष्ठीशोड्डीशशब्दतः ।
चर्यानाथाच्च लोपामुद्रागस्त्यात्कालतापनात् ॥ १४ ॥
धर्माचार्यान्मुक्तकेशीश्वराद्दीपकलादिकात् ।
नाथान्मयि पठित्वा तु विष्णोरथ प्रभाकरात्[1] ॥ १५ ॥
तेजसश्च मनोजाच्च कल्याणादपि रत्नतः ।
वासुशब्दाद् देव मयि [2]श्रीरामानन्दतो मयि ॥ १६ ॥
अणिमा-लघिमाशब्दान्महिमेशित्वशब्दतः ।
वशित्व-प्राकाम्य-भुक्तीच्छाशब्दात्प्राप्तिशब्दतः ॥ १७ ॥
सर्वकामपदात् सिद्धे ब्राह्मि माहेश्वरीति च ।
कौमारि वैष्णव वाराहि माहेन्द्रि ततः परम् ॥ १८ ॥
चामुण्डे च महालक्ष्मि सर्वशब्दान्ततः पठेत् ।
संक्षोभिणि च विद्राविण्याकर्षिणि वशङ्करि ॥ १९ ॥
उन्मादिनि महाशब्दादङ्कुशे खेचरीति च ।
बीजे योनौ त्रिखण्डे च त्रैलोक्यान्मोहनादथ ॥ २० ॥
चक्रस्वामिनि तद्वत्तु प्रकटादपि योगिनि ।
कामाद् बुद्धेरहङ्काराच्छब्दात्स्पर्शाच्च रूपतः ॥ २१ ॥
रसाद्गन्धाच्चित्तधैर्यस्मृतिनामाच्च बीजतः ।
आत्मामृतशरीराच्चाकर्षिणीति पठेत्क्रमात् ॥ २२ ॥
सर्वाशापरिपूरकाच्च चक्रस्वामिनीति वै ।
गुप्तशब्दाद्यो[3]गिनीति ततोऽनङ्गपदात् क्रमात् ॥ २३ ॥

---

1. करा–मूलपुस्तके. ।
2. रामानन्दामयीति च–ग. ।
3. द्योतिनी–मूलपुस्तके ।

कुसुमे मेखले तद्वन्मदने मदनातुरे ।
रेखे वे[1]गिन्यङ्कुशे च मालिनीति च सर्वतः ॥ २४ ॥
संक्षोभणात्तु चक्रान्ते स्वामिनीति च गुप्ततः ।
तरयोगिनि पश्चात्तु सर्वशब्दान्ततः क्रमात् ॥ २५ ॥
संक्षोभिणि च विद्राविण्याकर्षिणि च वै ततः ।
आह्लादिनि च सम्मोहिनि स्तम्भिनि च जृम्भिणि ॥ २६ ॥
वशङ्करि रञ्जिनि चोन्मादिन्यर्थाच्च साधिनि ।
सम्पत्तिपूरणि मन्त्रमयि द्वन्द्वक्षयङ्करि ॥ २७ ॥
सर्वसौभाग्यदायाच्च कचक्रस्वामिनीति वै ।
सम्प्रदायाद्योगिनि च सर्वशब्दान्ततः क्रमात् ॥ २८ ॥
सिद्धिप्रदे च सम्पत्प्रदे प्रियङ्करि वै ततः ।
मङ्गलात् कारिणि तथा कामशब्दात् प्रदे तथा ॥ २९ ॥
दुःखाद् विमोचि(च)नि तथा मृत्युप्रशमनीति च ।
विघ्नान्निवारि(र)ण्यङ्गात् तु सुन्दरीति ततः परम् ॥ ३० ॥
सौभाग्यदायिनि तथा सर्वार्थात् साधकान्ततः ।
चक्रस्वामिन्यथ कुलोत्तीर्णयोगिनि वै ततः ॥ ३१ ॥
क्रमात्सर्वपदान्ते तु ज्ञे शब्दे(क्ते)च ततः परम् ।
ऐश्वर्याच्च प्रदे ज्ञानमयि व्याधिविना[2]शि(श)नि ॥ ३२ ॥
आधाराच्च स्वरूपे[3] वै पापादपि हरे ततः ।
आनन्दमयि रक्षास्वरूपिणीप्सिततः प्रदे ॥ ३३ ॥
सर्वरक्षाकराच्चक्रस्वामिनीति ततः परम् ।
निगर्भाद् योगिनि तथा वशिन्यथ ततः परम् ॥ ३४ ॥
कामेश्वरि मोदिनि[4] च विमले चारुणे ततः ।
जयिनि सर्वेश्वरि च कौलिनीति च सर्वतः ॥ ३५ ॥
रोगान्ते हरचक्रात्स्वामिनि रहस्ययोगिनि ।
वाणिन्यथ चापिनि च पाशिन्यङ्कुशिनी(नि) ततः ॥ ३६ ॥

---

1. वेगेन्य–ग. ।
2. नाशनि–ग. ।
3. रूपै वै–मूल-पुस्तके. ।
4. मोहिनि–ग. ।

महान्ते कामेश्वरीति वज्रेश्वरि भगान्ततः ।
मालिनी(नि) श्रीसुन्दरि च सर्वसिद्धिप्रदादथ ॥ ३७ ॥
चक्रस्वामिन्यतिरहस्याद् योगिनि च श्रीद्वयम् ।
महाभट्टारिके सर्वानन्दान्ते मयचक्रतः ॥ ३८ ॥
स्वामिन्यथ परापररहस्याद्योगि[1]नी ततः ।
त्रिपुरे त्रिपुरेशीति(रेश्वरि) त्रिपुरात्सुन्दरी तथा ॥ ३९ ॥
त्रिपुराद्वासिनि तथा त्रिपुराश्रीस्ततः परम् ।
त्रिपुरामालिनि तथा सिद्धेम्बत्रिपुरां ततः ॥ ४0 ॥
क्रमान्महाशब्दतस्तु त्रिपुरात् सुन्दरीति वै ।
महेश्वरि महाराज्ञि शक्ते गुप्ते महापदात् ॥ ४१ ॥
महाज्ञप्ते[2] महानन्दे महा[3]स्पन्दे महाशये ।
श्रीचक्रनगरात् साम्राज्ञीत्यन्तेऽथ नमस्तु ते ॥ ४२ ॥
नमस्ते च शिरो लक्ष्मीर्माया वाग्बीजमेव च ।
एष मालामहामन्त्रः सर्वसिद्धिप्रदायकः ॥ ४३ ॥
एकत्रिंशत्सहस्रार्णः सर्वसाम्राज्यदायकः ।
पठित्वैतत्खड्ग[4]हस्तस्तेन खड्गेन संयुगे ॥ ४४ ॥
देवेन्द्रं विष्णुमपि च जयत्येव न संशयः ।
श्रीदेव्यावरणैर्युक्तः पूजाक्रममयः शुभः ॥ ४५ ॥
पूजाविधावशक्तोऽपि साधकः सकृदुच्चरन् ।
पूजाफलमवाप्नोति नात्र शङ्का महेश्वरि ॥ ४६ ॥
एतद्भेदं प्रवक्ष्यामि सावधानेन तच्छृणु ।
आदौ बीजचतुष्कं स्यात् ततो नम इतीरितम् ॥ ४७ ॥
मूलदेव्या[5] नम ततः षडक्षरमुदाहृतम् ।
ततो हृदयदेवीति चास्त्रदेव्यवसानकम् ॥ ४८ ॥

---

1. गिनीति च–ग. ।
2. महातप्ते–मूलपुस्तके. ।
3. स्पदे–मूलपुस्तके . ।
4. हस्ते हस्ते खड्गेन–ग. ।
5. व्या नाम–ग. ।

अङ्गावरणकं षट्कं भूतपक्षा(ज्वा)क्षरं स्मृतम् ।
कामेश्वरीं समारभ्य महानित्यावसानकम् ॥ ४९ ॥
नित्यास्तु नृपसंख्याका भूततर्काक्षरात्मकाः ।
[1]परमेश्वरीमारभ्य रामानन्दमयीति वै ॥ ५० ॥
गुरुमण्डलमेकोनविंशतिः स्यान्महे[2]श्वरः ।
भूपक्षचन्द्राक्षरकमणिमासिद्धितः शिवे ॥ ५१ ॥
तद्वत्प्रकटयोगिन्या सहितं भूपुरावृतिः ।
त्रिंशत्सङ्ख्यं पक्षवेदचन्द्रसंख्याक्षरात्मकम् ॥ ५२ ॥
कामाकर्षिणिमारभ्य गुप्तयोगिनिकावधि ।
नृपपत्रावरणं[3] कं वसुचन्द्रोन्मितं शिवे ॥ ५३ ॥
वसुनन्दाक्षरं तद्वदनङ्गकुसुमादितः ।
तथा गुप्ततराद्योगिन्यन्तमष्टदलावृतिः ॥ ५४ ॥
दिक्संख्यानन्दभूतार्णा सर्वसंक्षोभिणीत्यतः ।
सम्प्रदाय[4]योगिनीति मनुकोणावृतिर्भवेत् ॥ ५५ ॥
नृपसंख्या[5] नेत्रपङ्क्तिवर्णा स्यात् तदनन्तरम् ।
सर्वसिद्धिप्रदा-नाम्नः कुलोत्तीर्णात् तु [6]योगिनि ॥ ५६ ॥
इत्यन्तं दशकोणस्य देवताः सूर्यसङ्ख्यकाः ।
वसुनागाक्षराः सर्वज्ञामारभ्य निगर्भतः ॥ ५७ ॥
योगिन्यन्तं दशारस्य देवताः सूर्यसंख्यकाः ।
मुनिपर्वतवर्णाः स्युर्वशिनीतो रहस्यतः[7] ॥ ५८ ॥
योगिन्यन्तमष्टकोणदेवता दशसङ्ख्यकाः ।
नेत्रवेदाक्षरा बाणिनिनाम्नोऽतिरहस्यतः ॥ ५९ ॥
योगिन्यन्तं त्रिकोणस्य देवता दशसङ्ख्यकाः ।
भूतबाणाक्षरा श्रीश्रीमहाभट्टारिकापदात् ॥ ६० ॥

---

1. परमेश्वरमारभ्य वासुदेवमयीति वै–ग. ।
2. श्वरि–ग. ।
3. रणकं–ग. ।
4. दायायो–ग. ।
5. संख्यो नेत्र–ग. ।
6. योगिनी–ग. ।
7. स्यकाः–ग. ।

परापररहस्याद् योगिन्यन्तं बिन्दुदेवताः ।
रामसङ्ख्यानन्दनेत्रवर्णाथो त्रिपुरा[1]पदात् ॥ ६१ ॥
महात्रिपुरसुन्दर्यन्तं स्याच्चक्रेश्वरीगणः ।
नवसङ्ख्यः षट्समुद्रवर्णश्चाथो महामहात् ॥ ६२ ॥
ईश्वरीति समारभ्य महाश्रीचक्रतः परम् ।
नगरात् साम्राज्ञिनामपर्यन्तं ललिता भवेत् ॥ ६३ ॥
नवसङ्ख्यानन्दभूतवर्णाः पश्चात् षडक्षरः ।
स्वाहा विलोमबीजानां त्रयमेवं समीरितः[2] ॥ ६४ ॥
एकमेकत्रिंशता च सहस्रार्णोऽयमीरितः ।
एष मालाम(नु)र्देवि तिथिभेदेन संस्थितः ॥ ६५ ॥
तत्प्रकारं शृणु शिवे सावधानेन चेतसा ।
शुद्धो नमोऽन्तः स्वाहाऽन्तस्तर्पणान्तो जयान्तकः ॥ ६६ ॥
स्त्री-पुं-मिथुनभेदेन पुनः प्रत्येकतस्त्रिधा ।
सम्बुद्ध्यन्तस्तु शुद्धः स्यात् तद्वै त्रिपुरसुन्दरि ॥ ६७ ॥
सुन्दर्यै नम इत्येवं नमोऽन्तो भवतीश्वरि ।
सुन्दर्यै स्वाहेति रीत्या स्वाहान्तः समुदीरितः ॥ ६८ ॥
सुन्दरीं तर्पयामीति तर्पणान्तः प्रकीर्तितः ।
अथैवं[3] सुन्दरि जयेत्येवं स्यात् तु जयान्तकः ॥ ६९ ॥
एवं सुन्दरदेवेति पुम्भेदस्तु प्रकीर्तितः ।
स्त्रीभेदस्तूक्त एवेह मिथुनाख्यमथो शृणु ॥ ७० ॥
सुन्दरात् सुन्दरीत्येवं देवाद् देवीति वै क्रमात् ।
एवं रीत्या पञ्चदशप्रकारस्तु समीरितः ॥ ७१ ॥
जपे शुद्धस्तु पूजायां नमोऽन्तो होमकर्मणि ।
स्वाहान्तस्तर्पणान्तस्तु तर्पणे समुदाहृतः ॥ ७२ ॥

---

1. पुरे प–ग. ।
2. रितम्–ग. ।
3. थैव सु–ग. ।

स्तोत्रे [1]जयान्त उदित[2]स्त्वथैतस्य फलं शृणु ।
सकृज्जप्त्वा तु देव्यग्रे महापापात् प्रमुच्यते ॥ ७३ ॥
शतावृत्त्या तु ललिता प्रसन्ना तस्य सर्वतः ।
आवृत्तीनां सहस्रेण साक्षाद्देवी स्वरूपवान् ॥ ७४ ॥
सुगन्धिपुष्पैरभ्यर्च्य महापूजाफलं भवेत् ।
होमद्रव्यैस्तथा हुत्वा क्षीराद्यैस्तर्पयेत् तु यः ॥ ७५ ॥
जपान्तेनापि संस्तुत्वा तस्य पुण्यं न गण्यते ।
इति ते सर्वमाख्यातं यन्मां त्वं पृष्टवत्यसि ।
एवं मालामनुः प्रोक्तः पुनः किं श्रोतुमिच्छसि ॥ ७६ ॥

॥ [3]इति श्रीत्रिपुरार्णवे त्रिपुरासारसर्वस्वे मालामन्त्रकथनं नामाष्टादशस्तरङ्गः ॥ १८ ॥

●

1. जपान्त–ग. ।
2. तस्तथैतस्य–ग. ।
3. 'इति.....स्तरङ्गः' इत्यस्य स्थाने 'इति श्रीत्रिपुरार्णवे मालामन्त्रोद्धारो नामाष्टादशस्तरङ्गः'–ग. ।

अथैकोनविंशतिस्तरङ्गः

देव्युवाच

महेश्वर प्रियतम प्रोक्तं यत् त्रिपुरार्णवे ।
रहस्यार्चनकं श्रेष्ठं श्रोतुमिच्छामि तद्वद ॥ १ ॥

ईश्वर उवाच

शृणु देवि प्रवक्ष्यामि रहोयागं महत्तरम् ।
यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ॥ २ ॥
पुरा ह्येतन्मया देवि परमेण सुगोपितम् ।
विदित्वा संज्ञया पश्चात् प्रार्थितो बहुधा मया ॥ ३ ॥
तथापि न मया प्राप्तं ततस्तप्तं महत् तपः ।
दिव्यवर्षसहस्राणां दशकं तु तदा परः ॥ ४ ॥
श्रीकण्ठं प्रेषयामास स दृष्टो भगवान्भग(व) ।
पञ्चवक्त्रस्त्रिनयनो बालचन्द्रावतंसकः ॥ ५ ॥
तेनाहमुक्तो देवेशि वत्स किं तपसेच्छसि ।
ततः प्रणम्य साष्टाङ्गं मया श्रीकण्ठ ईरितः ॥ ६ ॥
भगवन् यदि सन्तुष्टो यद्यनुग्राह्यता मयि ।
रहोयागविधिं ब्रूहि यदुक्तं त्रिपुरार्णवे ॥ ७ ॥
अथ प्रहस्य श्रीकण्ठः प्रोवाच मधुराक्षरम् ।
शृणु वत्स त्वया चाद्य तपस्तप्तं महत्तरम् ॥ ८ ॥
अद्य यावन्न केनापि मत्तोऽन्येन श्रुतं त्विदम् ।
आज्ञया श्रीपरेशस्य तुष्टस्य तपसा तव ॥ ९ ॥
वदामि भक्तलोकानां सिद्धयै शृणु संयतः ।
श्रीपुरावाससंसिद्ध्या कैवल्य-प्राप्तये शिवे ॥ १० ॥
एकान्तपूजा कर्तव्या भक्तिश्रद्धायुतेन वै ।
दीक्षावतोऽधिकारोऽत्र नान्यस्य तु कदाचन ॥ ११ ॥

दीक्षाद्युक्तदिने पुण्यदेशे तीर्थादि-सन्निधौ ।
एकान्ते निर्भये देशे दुष्ट-कण्टकवर्जिते ॥ १२ ॥
विघ्नेश्वरं समाराध्य गुरुं चापि प्रपूजयेत् ।
स्वस्ति-वाचनकं कृत्वा श्राद्धमभ्युदयं तथा ॥ १३ ॥
मातृका अपि सम्पूज्य ततः सङ्कल्पमाचरेत् ।
गुर्वाद्याज्ञानुरोधेन आचार्यादिवृत्तिं चरेत् ॥ १४ ॥
आचार्यश्च तथा ब्रह्मा होता स्तोता पुरःसरः ।
पञ्चर्त्विजो वृत्तास्तत्र पाद्याद्यैः सुप्रपूजिताः ॥ १५ ॥
यागागारे चतुर्द्वारे मध्ये हस्तमितोच्छ्रितम् ।
चतुर्हस्तमितां वेदिं ईशान्ये योनिकुण्डकम् ॥ १६ ॥
वितान-कदली-स्तम्भ-मण्डितं यागमन्दिरम् ।
रङ्गवल्ली-पुष्पगुच्छ-सुधूपातिमनोहरम् ॥ १७ ॥
पूर्वद्वारबहिर्देशे हस्तत्रितयतो बहिः ।
ध्वजस्तम्भस्तु बैल्वो वा खादिरः पैप्पलोऽथवा ॥ १८ ॥
अष्टहस्तसमुच्छ्रायः स्थूलः अष्टाङ्गुलात्मना ।
समः श्लक्ष्णोऽतिरुचिरो वृत्तो वाच्यस्र एव वा ॥ १९ ॥
हस्तसम्मित-तत्काष्ठत्रयं तिर्यङ्निवेशितम् ।
ऊर्ध्वाधः काष्ठयुगले चतुष्कोष्ठतया स्थितम् ॥ २० ॥
काष्ठत्रये ह्येकपार्श्वे छिद्रयुक्तं ध्वजाग्रगे ।
चूडे हस्तमिते प्रोतं पताकाकारतां गतम् ॥ २१ ॥
तदधः पश्चिमदिशि वेदीं हस्तमितां शुभाम् ।
वेदाङ्ग(ङ्गु)लसमुत्सेधां त्रिकोणां मण्डपोन्मुखाम् ॥ २२ ॥
मृण्मयीं प्रतिमां तत्र ध्यानोक्तालङ्कृताकृति(तिम्) ।
अश्वारूढां तु संस्थाप्य मण्डपाभिमुखां शुभाम् ॥ २३ ॥
कुर्याद् ध्वजारोपणं वै आचार्यः प्रयतस्ततः ।
दक्षिणद्वार-वेद्योस्तु मध्ये होता ह्युदङ्मुखः ॥ २४ ॥
पद्मासनेन चासीनः कृताञ्जलिपुटः शुचिः ।
एवं स्तोता ह्युदग्भागे पूर्वाभिमुखतः स्थितः ॥ २५ ॥

पश्चिमद्वारदक्षे तु यजमानस्तु प्राङ्मुखः ।
ब्रह्मा दक्षिणतस्तस्य तथासीनो महेश्वरि ॥ २६ ॥
आचार्यः पृष्ठभागे तु संस्थितः स्यात् पुरःसरः ।
कर्मकाले तु सर्वेषां नियमस्त्वेवमीरितः ॥ २७ ॥
आचार्य आदौ सर्वत्र कर्मणां परमेश्वरि ।
कृताञ्जलिः प्रार्थयेद् वै ब्रह्माणं चोत्थितः स्वयम् ॥ २८ ॥
प्रत्युक्तस्तेन तत्पश्चात् कर्म कुर्याद् यथाविधि ।
देवतानां पूजनादावाह्वाने विनियोजयेत् ॥ २९ ॥
होतारं च ततः पश्चात् स्तोतारं स्तोतुमेव च ।
ब्रह्माज्ञां तु समादाय ध्वजारोपं समाचरेत् ॥ ३० ॥
ध्वजं सम्पूज्य पुष्पाद्यैः कुशयुङ्नववाससा ।
दशसहस्रसुदीर्घेण वेष्टयेन्मूलतः शिवे ॥ ३१ ॥
चूडा मूर्ध्नि दृढां बद्ध्वा मन्त्रपाठान्ततः शिवे ।
प्रलम्बयेद् वस्त्रशेषं पताकां पश्चिमोर्ध्वतः ॥ ३२ ॥
पृथिव्यां हस्तमात्रं तु समाविष्टं दृढात्मना ।
मण्डपाभिमुखं तत्र ध्वजारोपणमाचरेत् ॥ ३३ ॥
पुरःसरं तु विसृजेदादौ सम्भारसम्भृतम् ।
पुरःसरस्तु निर्गच्छेत् प्रत्यग्द्वारेण सर्वदा ॥ ३४ ॥
दक्षद्वारेण होता वै स्तोता चोत्तरद्वारतः ।
यजमानब्रह्मणोस्तु प्राग्द्वारेणैव निर्गमः ॥ ३५ ॥
आचार्यः सर्वतो यायाद् नान्यथा तु कदाचन ।
प्रविशेयुः सर्व एव तत्तत्सम्मुखद्वारतम् ॥ ३६ ॥
पुरःसरस्तु सामग्रीं संस्थाप्य ध्वजसन्निधौ ।
आचार्यं सन्दिशेत् सोऽपि तत आचार्यवित्तमः ॥ ३७ ॥
कुर्याद् ध्वजारोपणं तु सम्यगुक्त-विधानतः ।
ध्वजमभ्यञ्ज्य तैलेन स्नाप्य चोष्णेन वारिणा ॥ ३८ ॥
पुष्पाद्यलङ्कृतं कृत्वा समारोप्य पुरःसरः ।
सन्दिशेदथ आचार्यो वेष्टयेद् वाससोक्तवत् ॥ ३९ ॥

आहूतं संस्तुतं चेन्द्रं यजेद् देवसमावृतम् ।
विसर्जयेत् सर्वतश्चाप्यादौ सम्भारसम्भृतम् ॥ ४० ॥
पुरःसरं सोऽपि तत्र गत्वा सर्वं प्रकल्पयेत् ।
पात्रादिकं यथा युक्तमाचार्यमथ सन्दिशेत् ॥ ४१ ॥
आचार्यस्तत्र गत्वा तु विसृजेदग्रकर्मणि ।
पुरःसरेण सन्दिष्टो मन्दिरासुरकोणके ॥ ४२ ॥
तन्मण्डले क्षेत्रपालं बहिरभ्यर्च्य वै क्रमात् ।
महिषं पिष्टरचितं हस्तोच्चं समलङ्कृतम् ॥ ४३ ॥
कृष्णवर्णं तत्पुरतो दक्षिणाभिमुखं न्यसेत् ।
पूजयेदुपचारैश्च रक्तमाल्योपहारकैः ॥ ४४ ॥
ततस्तु मण्डपान्तर्वै वेदिकाधः प्रपूजयेत् ।
श्रीदेवीमुक्तविधिना कुलद्रव्यैरनुक्रमैः ॥ ४५ ॥
सुवासिनी ऋत्विगाद्याः स्वात्मीकुर्युर्यथाविधि ।
ततो निशीथसमये यजमानमुखाः शिवे ॥ ४६ ॥
स्व-स्व-स्थान-गताश्चापि कर्म कुर्युर्यथाविधि ।
ब्रह्माज्ञया च सङ्कल्प्य तिरस्करणिकार्चनम् ॥ ४७ ॥
सन्दिष्टश्चापि तन्मूर्तिपुरतः पात्रसंस्थितिम् ।
कृत्वा पीठं समभ्यर्च्य तथात्मानमपीश्वरि ॥ ४८ ॥
आहूतां च स्तुतां मूर्तौ तिरस्कृतिमथार्चयेत् ।
नीलैः पुष्पाक्षतैर्गन्धैर्नैवेद्यैर्वस्त्रभूषणैः ॥ ४९ ॥
पूजयेदावृतिं तस्याः परितो मण्डले पृथक् ।
सिन्दूरेण कृते देवि त्र्यस्रवेद्युपरिक्रमात् ॥ ५० ॥
षट्त्रिकोणे षडङ्गानि मोहिनीं स्तम्भिनीं तथा ।
भयङ्करीं महाभीमां परुषां दृष्टिदर्पहाम् ॥ ५१ ॥
नेत्रघ्नीं श्रोत्रहन्त्रीं च पूजयेदग्रतः क्रमात् ।
अष्टत्रिकोणके पश्चादश्वं खड्गं च पूजयेत् ॥ ५२ ॥
आरत्यन्तं ततः कृत्वा नीलवस्त्रविभूषणाम् ।
तरुणीं चारुसर्वाङ्गीं पूजयेत् तु सुवासिनीम् ॥ ५३ ॥

उद्वासरहितां पूजां समाप्योत्तरद्वारके ।
बहिः सुवेदिका-मध्ये रक्तचन्दनमण्डले ॥ ५४ ॥
त्रिकोणे भैरवं चोक्तरीत्या सम्पूजयेच्छिवे ।
मध्ये महाभैरवं च भैरवीसंयुतं ततः ॥ ५५ ॥
तदष्टदिक्षु ब्राह्म्यादियुक्ताश्चाप्यष्टभैरवाः ।
पूज्याश्च तद्बहि(:)र्देवि बटुकत्रयमर्चयेत् ॥ ५६ ॥
सम्पूज्य बटुकं तत्र भैरवीं च सुवासिनीम् ।
तिरस्करणिकायाश्च भैरवस्य च शङ्करि ॥ ५७ ॥
आवृत्त्यर्चनकाले तु स्तोता तत्स्तुतिमीरयेत् ।
ततः प्रातर्महेशानि कृतनित्यक्रियास्तु ते ॥ ५८ ॥
आज्ञया वेदिकामध्ये सर्वतोभद्रमण्डले ।
आहूतान् संस्तुतान् देवान् पूजयेदद्रिकन्यके ॥ ५९ ॥
कोणश्वेत-चतुष्के च मध्यश्वेत-चतुष्टये ।
शृङ्खलानां चतुष्के च कृष्णे कोणस्थिते ततः ॥ ६० ॥
तत्पार्श्वस्थ-हरिद्वर्णाष्टके रक्ताष्टके तथा ।
पीत-वीथी चतुष्के च प्रोक्त-द्वात्रिंशस्थानके ॥ ६१ ॥
मङ्गलादि-कोटिसङ्ख्ययोगिनीसहितान् शिवे ।
तन्नाथान् पश्चिमस्रोतः प्रोक्तानेकत्र युग्मशः ॥ ६२ ॥
मेखला-त्रितये दिक्पान् हेतीर्हेतुकभैरवान् ।
सम्पूज्यैवं समष्ट्या तु विश्वमूर्तिं मनोन्मयीम् ॥ ६३ ॥
आहूय पूजयेत् स्तुत्वा ततस्तदुपरि विन्यसेत् ।
धान्येषु कलशं तत्र पूजयेत् परमेश्वरीम् ॥ ६४ ॥
आह्वानस्तुतिपूर्वेण उपचारैः सुविस्तृतैः ।
वेदी-दक्षिणतो देवि कुशेष्वासादयेत् क्रमात् ॥ ६५ ॥
काष्ठपात्राणि ध्वजस्य सजातीयानि शङ्करि ।
इन्द्रस्य चतुरस्रं तु क्षेत्रपस्य त्रिकोणकम् ॥ ६६ ॥
तिरस्कृतेर्वर्तुलं तु भैरवस्य षडस्रकम् ।
पूर्वादि-पश्चिमान्तं तु सदृशाधारके न्यसेत् ॥ ६७ ॥

हेतुपात्रसमानानि तत्तदाकारमण्डले ।
मन्त्रपूर्वं समासाद्य संविद्देवीं समाह्वयेत् ॥ ६८ ॥
ततः संविद्धरां देवि तरुणीं तु(सु)वासिनीम् ।
वेणुपात्रस्थितां तत्र संविदं दक्षहस्तके ॥ ६९ ॥
धारयन्तीं मण्डपस्य बाह्याद् दक्षिणभागतः ।
क्षेत्रपालभैरवयोर्मध्येनैव पुरःसरः ॥ ७० ॥
हस्ते धृत्वा स्वयं बाह्यादुदग्द्वारात् प्रवेशयेत् ।
ततो वेदीपूर्वभागे संस्थितामासनोपरि ॥ ७१ ॥
अनुगच्छेदथाचार्यो दक्षद्वाराद् विनिर्गतः ।
क्षेत्रपालभैरवयोर्मध्ये नैव पुरःसरः ॥ ७२ ॥
प्रवेशयेद् गृहीत्वा तं स प्रणम्य तु तां ततः ।
मन्त्रेण संविदं या चेत् प्रत्युक्तिः स्तुतया ततः ॥ ७३ ॥
ब्रह्माणमाहूयेत् सोऽपि स्वद्वारनिर्गतस्तथा ।
पुरःसरेणैव तथा प्रादक्षिण्यात् प्रवेशितः ॥ ७४ ॥
याचितश्चापि प्रत्युक्तः होता स्तोता तथैव च ।
ततस्तु यजमानो वै पुत्रदारधनादिभिः ॥ ७५ ॥
याचेत् तां संविदं तत्र प्रत्युक्तस्तु तया तथा ।
स्वात्मदानेन तां याचेद् दत्वा तां संविदं ततः ॥ ७६ ॥
यजमानं गृहीत्वाऽथ निर्गच्छेत् तु सुवासिनी ।
आचार्योऽथ गृहीत्वा वै संविदं स्वासने विशेत् ॥ ७७ ॥
पूर्वद्वारक्रमेणैव निर्गच्छेद् यावदेव सा ।
यजमान-युता तावद् ब्रह्माद्यास्त्वगराट्सुते ॥ ७८ ॥
स्व-स्व-द्वारस्थितास्तां तु मन्त्रेण प्रतिरोधयेत् ।
क्रमेणैवमुदग्द्वारे स्तोता तां प्रतिरुध्यतु ॥ ७९ ॥
स्तुवीत पश्चादाचार्यः सुराग्रहप्रतिक्रयात् ।
यजमानं समादाय शक्त्या वस्त्रधनादिभिः ॥ ८० ॥
पूजयित्वोत्तरद्वाराद् विसृजेत् तु सुवासिनीम् ।
ततश्च संविदं वेद्या दक्षे न्यस्य कुशेषु वै ॥ ८१ ॥

सदशेन नूतनेन वस्त्रेणाच्छादयेत् ततः ।
ततः पात्राणि सर्वाणि क्रमेणासादयेच्छिवे ॥ ८२ ॥
वेद्याः पश्चिमदिग्भागे पूजा-पात्राणि सादयेत् ।
तूष्णीमेव धातुजातमयान्यथ महेश्वरि ॥ ८३ ॥
वेद्युत्तरे वर्तुलं तु पात्रं हेतु-चतुर्गुणम् ।
मृण्मयं तदाधारेण युतमासादयेत् तथा ॥ ८४ ॥
तत्पूर्वतः पञ्चसङ्ख्य-पात्राणि मृण्मयानि वै ।
वर्त्तुलं मध्यपात्रं तु त्रिकोणानीतराणि तु ॥ ८५ ॥
बाह्याग्राणि समाधारे सादयेन्मन्त्रपूर्वकम् ।
तत्पश्चिमे पात्रयुग्मं पद्माभं दीर्घभूनिभम् ॥ ८६ ॥
पञ्चिकानां पञ्चपात्रं मन्त्रिण्याः पद्मसन्निभम् ।
दण्डिन्याश्चतुरस्रं स्याद् विशेषार्घ्यसमानि वै ॥ ८७ ॥
वेदिका पूर्वदिग्भागे नित्यापात्रं नृपान्नकम् ।
गुरुपात्रं त्रिकोणं तु आवृतीनां नवान्नकम् ॥ ८८ ॥
षडन्नं बलि-देवानां कुमार्यै तु त्रिकोणकम् ।
वटुकाय वर्त्तुलं चण्डं दिक्संस्थानि सादयेत् ॥ ८९ ॥
अथ हेतुविधिं कुर्यात् तद्विधानं शृणु प्रिये ।
समावहेत् सुराधात्रीं संविद्धात्रीविधानतः ॥ ९० ॥
प्राग्द्वारेण विशेत् सा तु अग्रपूजा वरेण तु ।
गृहीत्वा हेतुकलशं पूजयेद् विभवेन ताम् ॥ ९१ ॥
दक्षिणावस्त्रभूषाद्यैर्विसृजेत् तां सुवासिनीम् ।
मण्डपाद् बहिराग्नेय्यां कुर्यात् संस्कारमण्डपम् ॥ ९२ ॥
तत्र चुल्ली-चतुष्कं तु प्राक्संस्थं स्यादुदङ्मुखम् ।
मूलेन प्रोक्ष्य तोयेन कुशैश्चुल्लीः परिस्तरेत् ॥ ९३ ॥
त्रयं पालाशसमिधां न्यसेच्चुल्लीषु चैकशः ।
मण्डपे पुनरागत्य वेद्याः पश्चिमतः शिवे ॥ ९४ ॥
कुशानस्त्रेण संस्तीर्य तत्र पात्रं महत्तरम् ।
द्रोणान्यूनं क्षालितं तु अस्त्रेणाथ महेश्वरि ॥ ९५ ॥

मूलेन विन्यसेत् तस्मिन् पञ्चरत्नानि विन्यसेत् ।
मन्त्रेण च नमोऽन्तेन पञ्चतिक्तमपीश्वरि ॥ ९६ ॥
मूलेन निक्षिपेत् तत्र ततो हेतुं च निक्षिपेत् ।
यजमानधृतं तस्मिन् मन्थानं सन्निवेश्य च ॥ ९७ ॥
पुरःसरस्तथाचार्यः पूर्वपश्चिमतः स्थितौ ।
निर्मथेत् तां सुराह्वानं तत्स्तुतिं चापि शृण्वतः ॥ ९८ ॥
हेतुसूक्तजप(पं कुर्वन्ना)चार्यः परमेश्वरि ।
आच्छादयेत् ततः पात्रं वरुणाह्वानपूर्वकम् ॥ ९९ ॥
पुरःसराहृतं तोयं शुद्धं स्रोतः-समुद्भवम् ।
वायुकोणे समास्तीर्य कुशान् पात्रे सुविन्यसेत् ॥ १०० ॥
तस्मिन् पवित्रसहिते वस्त्रपूतं क्षिपेज्जलम् ।
परिस्तीर्य समाच्छाद्य आपोहिष्ठां पठेत् सुधीः ॥ १०१ ॥
हिरण्यवर्णामपि च पवमा (नं च सूक्तकम्) न वाकक ।
गङ्गामाहूय चावाह्य पूजयेदुपचारकैः ॥ १०२ ॥
तेनोदकेन प्रक्षाल्य अरणीयुगलं ततः ।
कुशान् कृष्णाजिनं चापि समास्तीर्याग्निकोणके ॥ १०३ ॥
मन्त्रेणारणियुग्मं तु विन्यसेत् तस्य चोपरि ।
पुरःसरस्तथाचार्यो निर्मथेत् तां क्रमेण तु ॥ १०४ ॥
अग्निं सम्प्रार्थयन् होता स्तोता चापि समाह्वयेत् ।
स्तूयात् त्रिवारमेवं तु अग्निं निष्पाद्य शङ्करि ॥ १०५ ॥
कुण्डे संस्थापयेदग्निं दीक्षोक्तविधिना ततः ।
आग्नेयादग्निमन्त्रेण उद्धृत्याङ्गारपञ्चकम् ॥ १०६ ॥
अग्निनामसमायुक्त्या गच्छेत् संस्कारमण्डपम् ।
होताऽग्रतः समाह्वानं स्तोता स्तोत्रन्तु पृष्ठतः ॥ १०७ ॥
मध्ये पुरःसरेणाग्निं नयेदाचार्यसत्तमः ।
ब्रह्मा च यजमानश्च तस्य दक्षिणवामयोः ॥ १०८ ॥
ताम्रपात्रस्थितं चाग्निं काष्ठत्रिपदिका-धृतम् ।
स्व-स्व-द्वारेण निष्क्रान्ता दक्षिणद्वारसङ्गताः ॥ १०९ ॥

मण्डपस्य प्रकुर्वाणाश्चान्वारब्धाः प्रदक्षिणम् ।
संस्कारमण्डपे गत्वा प्रत्यक्चुल्यां विनिक्षिपेत् ॥ ११० ॥
शकलैर्योजयित्वा च ज्वालयेन्मन्त्रपाठतः ।
ततः पुनः समागत्य चैवं हेतुघटं नयेत् ॥ १११ ॥
तत्तद्द्वारस्य पुरतस्त्रिपद्यां विनिधाय च ।
पञ्चोपचारैरभ्यर्चन् निक्षिपेच्चुलुकोपरि ॥ ११२ ॥
तत्क्रियाकुशलं विप्रं वृणेत् तत्र महेश्वरि ।
साधकाचार्यमिति वै सम्पूज्य कुसुमादिभिः ॥ ११३ ॥
मण्डपे प्रविशेत् पश्चादाचार्यादि महेश्वरि ।
हेतोर्विधिं चाग्निविधिं कृत्वा पश्चान्महेश्वरि ॥ ११४ ॥
कुर्यात् संविद्विधिं देवि वेद्यां वायव्यकोणके ।
जलपात्रं पूर्वभागे मृत्कुण्डेऽस्त्रेण संविदम् ॥ ११५ ॥
क्षिप्त्वा प्रक्षाल्य तूष्णीं तु तीर्थतोयं विनिक्षिपेत् ।
मन्त्रेण तोयं सङ्गृह्य मन्त्रेणानुप्रपूरयेत् ॥ ११६ ॥
आचार्यो निर्मथेत् तं तु पठन् भैरवसूक्तकम् ।
ततो दृषच्चोपदृषत्प्रक्षाल्य कलशोदकैः ॥ ११७ ॥
उत्तरद्वारमध्ये तु निक्षिपेत्तदुदङ्मुखम् ।
प्रक्षाल्य संविदं नूत्नवस्त्रेण परिपीडयेत् ॥ ११८ ॥
वंशपात्रे विनिक्षिप्य मन्त्रेण दृषदि न्यसेत् ।
ततश्छागं समानीय क्षेत्रपालस्य दक्षतः ॥ ११९ ॥
तरुणं चित्रवर्णं च पुष्टं सर्वाङ्गसंयुतम् ।
संस्नाप्य तीर्थतोयेन वस्त्रेण परिवेष्टयेत् ॥ १२० ॥
गन्धाद्यैश्चाप्यलङ्कृत्य तदङ्गान्यभिमन्त्रयेत् ।
तद्गायत्रीं त्रिधा कर्णे जप्त्वा तत्पृष्ठमालभन् ॥ १२१ ॥
तद् बोधमन्त्रं त्रिर्जप्त्वा रज्जुं तत्राभिमन्त्र्य च ।
शङ्कौ निवेश्य मन्त्रेण बन्धयेत् तद्गले ततः ॥ १२२ ॥
भूमौ तु निखनेच्छङ्कुं ध्वजजातीयकं तथा ।
अरत्निसम्मितं पश्चात् खड्गं च छुरिकामपि ॥ १२३ ॥

क्रमेणादाय मन्त्रेण तथा तीर्थेन क्षालयेत् ।
मन्त्रेण कुशरज्जुं तु तन्मुष्टावभिवेष्टयेत् ॥ १२४ ॥
गन्धाद्यैस्तु समभ्यर्च्य मन्त्रं जप्त्वा तु विन्यसेत् ।
क्षेत्रपाल-दक्षपार्श्वे ततो मत्स्यान् समानयेत् ॥ १२५ ॥
जलकुण्डे विनिक्षिप्य क्षेत्रपालस्य वामतः ।
जीवयुक्तांस्तु विषमसंख्यांस्तेष्वेकमद्रिजे ॥ १२६ ॥
तीर्थोदकेनाभिषिच्य तद्विन्दुं तन्मुखे क्षिपेत् ।
मन्त्रेण योजयित्वा तं छादयेद् वाससा ततः ॥ १२७ ॥
ध्वजजातीयके पीठे हस्तमात्रसुदीर्घके ।
षोडशाङ्गुलविस्तारे वह्निकोणे निवेशिते ॥ १२८ ॥
त्रिकोणं चापि षट्कोणं विलिखेन्मण्डलद्वयम् ।
सुराधात्र्यास्तथा संविद्धात्र्या अपि महेश्वरि ॥ १२९ ॥
रक्तचन्दनकेनैव तत्पश्चात्पुलकान्तरे ।
मन्त्रिण्याश्चापि दण्डिन्याः प्रोक्तमष्टदलान्तरम् ॥ १३० ॥
मण्डलद्वितयं कुर्यात् तथा तद्दक्षतः शिवे ।
द्विगुणे फलके देवि मण्डलानि प्रकल्पयेत् ॥ १३१ ॥
पञ्चसङ्ख्यस्रोतसानां पंक्तिपञ्चकरूपतः ।
वेदभूतबाणरामवेदसङ्ख्यानि तानि तु ॥ १३२ ॥
त्रिकोणानि च सर्वाणि उदक्संस्थानि शङ्करि ।
प्रत्यङ्मुखानि सर्वाणि तेष्वाह्वानादिपूर्वकम् ॥ १३३ ॥
दैवतानि च सम्पूज्य उपचारैस्तु पञ्चभिः ।
ततः सपर्यां श्रीचक्रे कुर्याद् वै सुविधानतः ॥ १३४ ॥
पायसं श्रपयित्वाऽथ नैवेद्ये विनियोजयेत् ।
इन्द्रादीनावाहितांस्तु सर्वान् पञ्चोपचारकैः ॥ १३५ ॥
सम्पूज्य त्रिस्तर्पयेच्च ततो होमादिकं शिवे ।
सामयींश्चापि सम्पूज्य समाप्यार्चनकं ततः ॥ १३६ ॥
यजमानो ऋत्विजश्च कुर्युः पायसभोजनम् ।
रक्षणं सुविधायाथ स्वापं कुर्युः पवित्रतः ॥ १३७ ॥

रात्रौ तु साधकाचार्यः प्रथमं सुविधानतः ।
यन्त्रविद्यासु कुशलो यन्त्रात् समवतारयेत् ॥ १३८ ॥
ततोऽर्धरात्रसमये प्रोत्थायर्त्विङ्मुखाः शिवे ।
पवित्रभूतास्ते सर्वे कर्म कुर्युर्यथोक्तवत् ॥ १३९ ॥
ततस्तु शमितारं वै सच्छूद्रं विनियोजयेत् ।
उपासनायुतं भक्तिश्रद्धायुक्तं महेश्वरि ॥ १४० ॥
दद्यान्मन्त्रेण खड्गं तु तस्मै प्रत्यङ्मुखस्ततः ।
शमितोदङ्मुखः छागं प्रार्थयेत् प्राङ्मुखं पशुम् ॥ १४१ ॥
ततोऽस्त्रमुच्चरंश्छिन्द्यात् सकृद्घातेन वै गले ।
गतप्राणं अधःपृष्ठ-प्राङ्मूर्धानं विनिक्षिपेत् ॥ १४२ ॥
मस्तकेन च संयोज्य ततस्तु छुरिकां तथा ।
दद्यात्तस्मै तथा मत्स्यान् घातयेदखिलानपि ॥ १४३ ॥
तांश्चापि वस्त्रे निक्षिप्य शमितारमुपस्थितम् ।
सम्पूज्य वस्त्रमन्नं च दत्त्वा तं तु विसर्जयेत् ॥ १४४ ॥
पुरःसरः(रं) पशोरङ्गे सिञ्चेत् कलशतो यतः ।
मन्त्रैः प्रोक्तक्रमेणैव आचार्येण सहैव तु ॥ १४५ ॥
गृहीत्वा छुरिकां मन्त्रैः पशोर्विशसनं चरेत् ।
बद्ध्वा विसृज्य तच्चर्म चाङ्गानि प्रविभागशः ॥ १४६ ॥
उपलक्ष्य तु सूक्ष्मेण मत्स्यानप्येवमेव तु ।
निवेदयेत् पाकशालामध्ये मन्त्रेण शङ्करि ॥ १४७ ॥
प्रदर्शयेत् साधकाचार्याय सोऽपि पचेत् पृथक् ।
एकत्र वापि देवेशि तदङ्गान्यभिसंज्ञया ॥ १४८ ॥
आचार्यः पुनरागत्य पशोर्मत्स्यस्य चैव तु ।
शोणितं पतितं भूम्यै तद्देव्यै तु समर्पयेत् ॥ १४९ ॥
निखनेत् तत्र चास्थीनि मलपित्तकफादिकम् ।
खुरचर्मादिकञ्चापि ततो मण्डपमध्यतः ॥ १५० ॥
चणकास्तुं समादाय मन्त्रेणोलूखले क्षिपेत् ।
मन्त्रेण कण्डयेच्चापि निस्तुषात्तीर्थतोयतः ॥ १५१ ॥

निषिच्य पश्चान्मन्त्रेण पञ्चतिक्तसमायुताम् ।
संविदं पेषयेत् त्रिर्वै तत्पश्चात्तु पुरःसरः ॥ १५२ ॥
पेषयेत् सूक्ष्मरूपेण गालयेद् वाससापि च ।
अर्धमानेन सितया मिश्रयेत्तु प्रमाणतः ॥ १५३ ॥
तीर्थं तोयेन संसाध्य न्यसेत् काष्ठस्य भाजने ।
त्रिकोणरूपे साधारे चणकान् पेषयेत् ततः ॥ १५४ ॥
निवेदयेत् साधकाचार्याय पात्रं तु संविदः ।
वेद्यधश्चोत्तरदिशि कुशेष्वाच्छाद्य साधयेत् ॥ १५५ ॥
ततस्तु साधकाचार्यः प्रागन्ते चुल्लिकात्रये ।
द्वितीयादित्रयं कार्यं तत्पिष्टेनान्यपिष्टकम् ॥ १५६ ॥
सम्मेल्य मुद्रां संसाध्य पशोरङ्गानि सर्वतः ।
सुपक्वानि पृथङ् न्यस्य पलान्यूनं सुपात्रके ॥ १५७ ॥
मूर्धानं च वपां मेद्रं वृषणं च समग्रकम् ।
अन्यत्सर्वं मेलयित्वा संस्कुर्याल्लवणादिभिः ॥ १५८ ॥
तृतीयं चापि संस्कुर्याद् विधिना सुविधानवित् ।
अथाचार्यमुखाः सर्वे नित्यं निर्वर्त्य वै ततः ॥ १५९ ॥
स्व-स्व-स्थानस्थिताः सर्वे कर्म कुर्युर्यथाविधि ।
वेदिकायां पश्चिमतो यन्त्रराजं निधाय तु ॥ १६० ॥
द्वारपूजादिपात्राणां प्रतिष्ठान्तं निवर्त्तयेत् ।
मण्डलेशाह्वानपूर्वं ततः पात्रे तु काष्ठजे ॥ १६१ ॥
चतुरस्रे हस्तमिते गर्तेष्वाज्यमुपस्तरेत् ।
मन्त्रेण तत्तदङ्गानि क्रमेणैव विनिक्षिपेत् ॥ १६२ ॥
अग्नेरुत्तरतस्तद्वै कुशेष्वासादयेच्छिवे ।
प्रार्थ्याथ सम्यगाच्छाद्य कुशैर्वस्त्रेण चोपरि ॥ १६३ ॥
ब्रह्माग्निमध्ये गर्ते तु अङ्गुलद्वयनिम्नके ।
अङ्गुलद्वितयोच्चात्ममेखला–सुविराजिते ॥ १६४ ॥
प्राक्-प्रत्यक्-दीर्घरूपे वै सार्ध-हस्तप्रमाणके ।
हस्तमात्र-सुविस्तारे प्रोक्ष्यास्त्रेण कुशान् न्यसेत् ॥ १६५ ॥

तेषु पात्राण्यासादयेत् स्रुक्त्रयं स्रुवमेव च ।
हस्तदीर्घं दक्षिणतः प्रागग्रं तत्र पूर्वतः ॥ १६६ ॥
चतुरङ्गुलविस्तारं मध्येऽष्टाङ्गुलसम्मितम् ।
पार्श्वयोर्दीर्घवृत्तं वै द्वादशाङ्गुलमानतः ॥ १६७ ॥
शेषपात्रं च संसाद्य संस्कुर्यादुक्तरीतितः ।
प्रत्यग्भागे द्वयं चैव द्वादशाङ्गुलदीर्घकम् ॥ १६८ ॥
षडङ्गुलसुविस्तारमुच्चं स्याच्चतुरङ्गुलम् ।
संविद्ग्रहणिकाख्यं च सुराग्रहणिकाख्यकम् ॥ १६९ ॥
एवं सर्वं तु संस्कुर्यात् शेषपात्रात्त्रयं शिवे ।
चतुरङ्गुलदण्डेन पार्श्वयोरुभयोर्युतम् ॥ १७० ॥
संविद्भैरवसूक्ताभ्यामभिमन्त्र्य तु संविदम् ।
आकाशे तर्पयेत् तत्त्वमुद्रया भैरवं त्रिधा ॥ १७१ ॥
इन्द्रस्य पात्रादारभ्य पात्राणि स्थापयेत् क्रमात् ।
हेतुद्रव्येण सम्पूर्य यजेत् तत्तन्मनुं क्रमात् ॥ १७२ ॥
उपचारान्मूलदेव्याः सम्पूज्य तदनन्तरम् ।
वेद्याः प्राङ्नैर्ऋतमरुद्भागे पीठत्रयोपरि ॥ १७३ ॥
चतुरस्रे चाष्टदले वृत्तेषु क्रमतो यजेत् ।
ब्रह्मविष्णुशिवान् सूर्यपावकेन्दूंश्च पूजयेत् ॥ १७४ ॥
आवृतिं तु समाप्याथ पूजाङ्गं होममेव च ।
ततः प्रवर्त्तयेद् याग इन्द्रादिक्रमतः शिवे ॥ १७५ ॥
तत्र तत्र पूजयित्वा उपचारैस्तु पञ्चभिः ।
इन्द्रं तिरस्कृतिं क्षेत्रपालं भैरवमेव च ॥ १७६ ॥
विश्वमूर्तिं संविदाख्यां सुराख्यामपि देवताम् ।
गङ्गां च वरुणञ्चैव मन्त्रिणीं दण्डिनीं तथा ॥ १७७ ॥
नित्याश्चौघगुरूंश्चापि षडङ्गाद्यखिलावृतीः ।
ब्रह्माद्यान् सूर्यमुख्यांश्च तथाम्नायस्य देवताः ॥ १७८ ॥
क्रमेणैता यजेद् देवि आह्वानस्तुतिपूर्वकम् ।
होतुर्यागस्य मन्त्रान्ते स्वाहान्तं नाम वै पठन् ॥ १७९ ॥

यजेत् क्रमेण त्वाचार्यो ब्रह्माज्ञादि-क्रमेण वै ।
क्रमेण स्रुक्त्रये देवि उपस्तरणपूर्वकम् ॥ १८० ॥
मन्त्रेण संविदं हेतुं पश्वङ्गमगकन्यके ।
द्विधाऽवदानं पश्वङ्गेऽभिघारः पुनरेव च ॥ १८१ ॥
संविद्धेत्वोश्चतुर्धा तु ग्राह्यं दर्व्या महेश्वरि ।
तत्तत्पात्रात् तु गृह्णीयाद्धेतुं सामान्यतोऽन्यतः ॥ १८२ ॥
श्रीपात्रान्मूलदेव्यै तु पश्वङ्गहविषः शिवे ।
ऊर्ध्वे हेतुस्रुचं न्यस्य वामे संवित्स्रुचं नयेत् ॥ १८३ ॥
पुरःसरेण पात्राणामुद्घाटनपिधानकम् ।
कुर्यादादौ स्रुवेणाज्यं जुहुयात् क्रमतः शिवे ॥ १८४ ॥
स्रुक्त्रयं क्रमतो न्यस्य स्थाने पश्चाद् घृतं हुनेत् ।
इन्द्रादि-मुख्यदेवांस्तु त्रिधा हुत्वा तदाकृतिम् ॥ १८५ ॥
प्रोक्तेषु सकृदाज्येन हुत्वा पश्चात् तु संविदम् ।
हेतुं पश्वङ्गकं चापि जुहुयात् प्रोक्तरीतितः ॥ १८६ ॥
संविच्छेषं हेतुशेषं हुतस्य शेषपात्रके ।
क्षिपेदेवमङ्गशेषं प्राक्पात्रेऽपि महेश्वरि ॥ १८७ ॥
एवं भैरवपर्यन्तानिष्ट्वा शेषन्तु संविदः ।
षोडशाङ्गुलदीर्घे तु अष्टाङ्गुलसुविस्तृते ॥ १८८ ॥
चतुरङ्गुलनिम्ने च पात्रे शेषे विनिक्षिपेत् ।
पूर्वद्वारवेदिकयोर्मध्ये दर्भान् परितस्तरेत् ॥ १८९ ॥
संवित्पात्रात् संविदं तु तत्पात्रे सुप्रपूरयेत् ।
मन्त्रेणानीय दर्भेषु तेषु मन्त्रेण विन्यसेत् ॥ १९० ॥
उदग्दक्ष-सुदीर्घेण शक्तिं तत्र सुपूजयेत् ।
भैरवीं वस्त्रभूषाद्यैः प्रत्यङ्मुखतया स्थिताम् ॥ १९१ ॥
दक्षिणोत्तरयोस्तस्य आचार्ययजमानकौ ।
प्रत्यग्दिशि तथा ब्रह्मा तद्दक्षे चोत्तरेऽपि च ॥ १९२ ॥
होता स्तोता शक्तिदक्षे निषीदेच्च पुरःसरः ।
यजमानस्य पत्नी तु स्याच्चेत् तद्वामतः स्थिता ॥ १९३ ॥

मन्त्रेण पात्रदण्डे तु गृहीत्वा पात्रमुद्धरेत् ।
आचार्यो यजमानश्च शक्तिमन्त्रेण पाययेत् ॥ १९४ ॥
अन्वारब्धाः सर्व एव द्विस्तूष्णीं पाययेदनु ।
ततस्तस्येच्छया सम्यक् पाययित्वा ततः परम् ॥ १९५ ॥
पत्नीं तथा पाययेद् वै ब्रह्माचार्यस्ततः परम् ।
होता स्तोता चापि पुरःसरश्च यजमानकः ॥ १९६ ॥
तथा पिबेयुः सर्वे वै आचार्ययजमानयोः ।
पाने ब्रह्मा दण्डधर आदौ शक्तिमुखे सकृत् ॥ १९७ ॥
ब्रह्मा पिबेत् स्वस्य मुखेऽनन्तरं ब्रह्मणोऽपि च ।
आचार्यः स्वमुखे पश्चादेवमन्येषु वै क्रमात् ॥ १९८ ॥
प्रादक्षिण्येन सर्वेषां पाने पानमुदाहृतम् ।
विच्छेदो नैव कर्तव्यो यजमानस्तृतीयकम् ॥ १९९ ॥
पत्नीसत्त्वे तन्मुखेन पानं दक्षे स्थितः पिबेत् ।
सर्वत्रैवं सशेषन्तु भैरवाग्रे समुत्सृजेत् ॥ २०० ॥
मन्त्रेणाचार्यकः पश्चाद् यागं कुर्याद् यथाक्रमम् ।
तलेन दक्षिणेनैव पात्राधः संस्पृशन् पिबेत् ॥ २०१ ॥
सुवासिनीं वस्त्रभूषादक्षिणाद्यैः सुपूजयेत् ।
पश्चात् तु विश्वमूर्त्यादीन् क्रमेणैव यजेच्छिवे ॥ २०२ ॥
नित्याद्या आवृति-प्रान्ता घृतेन जुहुयात् पृथक् ।
षोडशीं सप्तदशिकां त्रिगुरून् पादुकामपि ॥ २०३ ॥
चक्रेश्वरीमखण्डां च पञ्चिकाद्याः क्रमाद् यजेत् ।
तुरीय-समयामाम्नायानां च समयां तथा ॥ २०४ ॥
यजेत् ततस्तु ब्रह्मादीन् प्रोक्तरीत्यागकन्यके ।
एवं यागं समाप्याथ बलिपूजादिकं चरेत् ॥ २०५ ॥
सुवासिनीपूजनान्ते कुर्यात् पूर्णाहुतिं शिवे ।
स्रुचां त्रयेऽपि च घृतसंविद्धेतु-प्रपूरणात् ॥ २०६ ॥
मुख्याङ्गेनापि संयोज्य क्रमेण परमेश्वरि ।
आह्वानस्तुतिमन्त्रांस्तु सकृदाद्ये द्वयं ततः ॥ २०७ ॥

स्वाहान्तनाम्नैव देवि ततोऽग्नेस्तु प्रपूजनम् ।
प्रायश्चित्ताहुतीश्चैव चाग्नेरुत्तर-कर्म च ॥ २०८ ॥
दिक्पालानां बलिं दद्यान्मन्त्रैश्च तिरस्कृतेः ।
भैरवाय बलिं दत्त्वा क्षेत्रपालाय चेश्वरि ॥ २०९ ॥
तिरस्कृत्यादिके देवि पुरुषाहारसम्मितम् ।
हेतुपात्रमितं हेतुं बलिं दद्यात्पृथक् पृथक् ॥ २१० ॥
दिक्पालेषु बिल्वफलमितान् पिण्डान् बलिं हरेत् ।
भैरवस्य बलिं श्वभ्यः शूद्राय क्षेत्रपालजम् ॥ २११ ॥
तिरस्कृतेर्बलिं दद्यात् सर्वेभ्योऽपि महेश्वरि ।
ततः खड्गं समादाय अस्त्रान्तं बलिमन्त्रकम् ॥ २१२ ॥
पठन् पिष्टलुलायं तु सम्पूज्य छेदयेत् सकृत् ।
ततः पूजां सामयिकीं कृत्वा संवित्प्रपानके ॥ २१३ ॥
पात्रे तु संविच्छेषन्तु गृहीत्वा किञ्चिदेव तु ।
सकृत् पिबेत् पुरोक्तेव पुनः प्रक्षाल्य तत्र तु ॥ २१४ ॥
हेतुशेषं समापूर्य सर्वपात्रस्य शेषकम् ।
निक्षिप्य तत्र संस्थाप्य संवित्पात्रं समुद्धरेत् ॥ २१५ ॥
सामयीभ्यः समर्प्याथ शेषं भैरवसन्मुखे ।
उत्सृजेद् भुवि तत्पात्रे तोयमापूर्य विन्यसेत् ॥ २१६ ॥
ततो हेतुप्रपाणन्तु परितः पूर्ववत् स्थिताः ।
सुवासिनीस्तु क्रमशः पाययेदेकवक्त्रतः ॥ २१७ ॥
ततस्तस्मात् समुद्धृत्य सामयिभ्यः समर्पयेत् ।
सर्वे सामयिकास्तत्र पिबेयुर्यौवनान्तकम् ॥ २१८ ॥
ततो ब्रह्ममुखाः सर्वे पिबेयुः पूर्ववच्छिवे ।
ततः पश्वङ्गशेषाणि भक्षयेयुर्महेश्वरि ॥ २१९ ॥
ब्रह्माङ्गं ब्रह्मणे दद्याच्छेषं सर्वं विमिश्र्य तु ।
आचार्याद्याः सामयिका भक्षयेयुः पृथक् पृथक् ॥ २२० ॥
ततो देवीं विसृज्यैव क्रमादन्या विसर्जयेत् ।
शान्तिस्तवान्तं निर्वर्त्य ऋत्विजः पूजयेत् ततः ॥ २२१ ॥

यजमानो दक्षिणां तु प्रदद्यात् क्रमशः शिवे ।
पलं सुवर्णमाचार्ये ब्रह्मणे तत्समं भवेत् ॥ २२२ ॥
होतुः स्तोतुस्तदर्धं स्यात् तदर्धं तु पुरःसरे ।
सुवासिनीर्ब्राह्मणांश्च दक्षिणाद्यैः सुपूजयेत् ॥ २२३ ॥
ततो ध्वजाधः पीठे तु यजमानं महेश्वरि ।
कुम्भोदकेनाभिषिच्य शेषं कर्म समाप्य च ॥ २२४ ॥
सम्पूज्य साधकाचार्यं दक्षिणाद्यैः सुतोषयेत् ।
वस्त्रपात्रादिसामग्रीमाचार्यायाखिलां ददेत् ॥ २२५ ॥
पूजां समाप्य देव्यै तु कर्म सर्वं समर्पयेत् ।
एतत्ते सर्वमाख्यातं रहोयागविधानकम् ॥ २२६ ॥
एतत्कर्त्तुर्यत्तु पुण्यं तत्संशृणु ब्रवीमि ते ।
अश्वमेधसहस्रं वा राजसूयशतं तथा ॥ २२७ ॥
वाजपेयायुतमपि नैतस्य सदृशं भवेत् ।
महादानानि सर्वाणि महातीर्थ-व्रतानि च ॥ २२८ ॥
क्रतवोऽप्यखिलाश्चैतत्कलां नार्हन्ति षोडशीम् ।
मनुष्य-देव-गन्धर्व-सिद्ध-विद्याधरादिषु ॥ २२९ ॥
एकान्तपूजकसगो नान्यो भवति कश्चन ।
स एव धन्यो जगति य एकान्तार्चको भवेत् ॥ २३० ॥
ब्रह्मादीनां दर्शनीयः पूजनीयः स एव वै ।
सर्वपापविनिर्मुक्तः सर्वदुःखविवर्जितः ॥ २३१ ॥
सर्वसौख्य-समायुक्तो देहान्ते श्रीपुरं व्रजेत् ।
वर्षाणामयुतं दिव्यं दिव्यदेहो निवस्य तु ॥ २३२ ॥
भुक्त्वाभीष्टान् सुविपुलान् दुर्लभाँस्तत्र शङ्करि ।
अन्ते श्रीकण्ठमुखतः प्राप्य ज्ञानं महत्तरम् ॥ २३३ ॥
परं निर्वाणमाप्नोति सत्यं सत्यं महेश्वरि ।
यः कोऽप्यत्र महायागे संविच्छेषं पिबेच्छिवे ॥ २३४ ॥
योषिद्वा पुरुषो वापि हेतुशेषमथापि वा ।
अङ्गशेषं तथा वापि तस्यानन्तफलं भवेत् ॥ २३५ ॥

सर्वपाप-विनिर्मुक्तः शतपूजा-फलं लभेत् ।
अश्वमेध-वाजपेयफलं प्राप्नोत्यसंशयम् ॥ २३६ ॥
यजमानस्य तुर्यांशमाचार्यः सुकृतं लभेत् ।
अन्येषामष्टमांशं तु फलं भवति निश्चयम् ॥ २३७ ॥
अन्ते मण्डलपूजां तु कुर्यात् तत्र महेश्वरि ।
अङ्गलोपादिदोषाणां शान्तये परमेश्वरि ॥ २३८ ॥
अग्निनाशे पात्रनाशे हविर्नाशेऽपि शङ्करि ।
अयुतं प्रजपेत् पश्चात् तद्विधिं च पुनश्चरेत् ॥ २३९ ॥
अन्यत्र युक्त्या प्रजपेत् सहस्रं शतमेव वा ।
न बुध्या लोपयेत् किञ्चित् सर्वथा पर्वतात्मजे ॥ २४० ॥
अन्यथा दण्डिनी देवी दण्डयत्यतिभीषणा ।
जिह्वाच्छेदं मन्त्रलोपे करच्छेदं क्रियाहतौ ॥ २४१ ॥
करोति ' दण्डनाथा सा तस्मात् कुर्यात् समाहितः ।
ऋत्विजा यस्य तु भवेत् स्खालित्यं तेन शङ्करि ॥ २४२ ॥
मण्डलार्चा सुकर्तव्या ततः पापाद् विशुद्ध्यति ।
इत्येतत् ते समाख्यातं किं पुनः श्रोतुमिच्छसि ॥ २४३ ॥

॥ इति श्रीत्रिपुरार्णवे त्रिपुरासारसर्वस्वे रहोयागकथनं नामैकोनविंशतितरङ्गः ॥ १९ ॥

●

अथ विंशतिस्तरङ्गः

गिरिजोवाच

वृषध्वज महादेव प्रोक्तमेकान्तपूजनम् ।
अतिगोप्यं महापुण्यं त्रिपुरार्णवसंस्थितम् ॥ १ ॥
महाश्चर्यमयं सर्ववाञ्छितार्थ-प्रदायकम् ।
तत्रोपयुक्तमन्त्रांस्तु कथयस्व कृपामय ॥ २ ॥

श्रीवृषध्वज उवाच

शृणु देवि प्रवक्ष्यामि रहोयाग-समुद्भवान् ।
मन्त्रानाथर्वणानेकस्वर्यांस्तान्प्रपठेच्छिवे ॥ ३ ॥
ब्रह्मन् ध्वजं रोपयिष्ये इत्युत्थाय तु प्रार्थयेत् ।
सर्वत्रैवं कर्मनामप्रार्थनं समुदीरयेत् ॥ ४ ॥
ॐ रोपयेति प्रत्युक्तिः कृताञ्जलिपुटो वदेत् ।
एवं सर्वत्र कर्मादौ प्रार्थनं प्रतिवागपि ॥ ५ ॥
मन्दमध्योच्चभेदैस्तु स्वरैर्मन्त्रान् पठेत्तथा ।
विलम्बमध्यद्रुतकैरुच्चारैरगनन्दिनि ॥ ६ ॥
होतरिन्द्रमावहेति स्तोतरिन्द्रं स्तुहीति च ।
होतुः स्तोतुश्च गिरिजे विनियोगमुदाहरेत् ॥ ७ ॥
वानस्पत्य वनस्पते त्वं हि महान्महत्तर।
त्वं वेत्थ क्रतूनन्यान् क्रतुराजानममृतंवहम् ॥ ८ ॥
त्वं वज्रभृद्देवराज्ञो मीढुष्टमस्य वृषस्य देवानाम्।
क्रतूनां क्रतुराज्ञां सदनं त्वां वाससाभि संवृणोमि ॥ ९ ॥
त्वं यजमानस्यामु० भ्रातृव्यानपनयामु० यजमानमुन्नय।
यथा त्वमुज्जृम्भणोस्येवममु० त्रिपुरुषनाम अमुकस्य क्रतुवरं मुन्निनीहि ॐ ॥१० ॥
क्रमस्वरेण मन्त्रोऽयं पठितव्यो ध्वजावृतौ।
पुरःसरध्वजविधिं पुरः प्रतिविधेहि॥ ११ ॥

पुरःसरविसर्गे तु मन्त्रः प्रोक्तो हिमाद्रिजे ।
आचार्योऽयं प्रतिविहितो ध्वजविधिः ॥ १२ ॥
मध्यस्वरेण सर्वत्र मध्योच्चारेण वै पठेत् ।
विसर्गश्चापि सन्देशः सर्वत्रैवं महेश्वरि ॥ १३ ॥
आयाहि दिवस्पते सहस्राक्ष शचीपते ।
यजमानस्यामुं वीतिं जुषाण वृत्रहन्तम ॥ १४ ॥
वानस्पत्ये शतवल्शेनिषण(ण्ण) अमुं वीतिं वर्धय सुरयाप्यायितः।
यजमानस्य क्रतुं ये समीयुरसुरा अरातयः ॥ १५ ॥
तांस्त्वं वज्रेण वृत्रघ्नेन पराणुददेवरजोऽस्मभ्यं सभाजित ।
सर्वत्राह्वानमन्त्रं तु तारान्त्यं समुदीरयेत् ॥ १६ ॥
इन्द्र त्वं सोमपा असि देवानां समभिष्टुतः ।
त्वां हि विद्वांसः सोमेनाभि यजन्ति संस्तुतं देवगणैरभीषुभिः॥ १७ ॥
महत्तरेषु क्रतुषु त्वमीड्यो यजमानस्यामृतत्वं वितन्वसे।
त्वं हि पुरोदिति गर्भेशयानमिन्द्रशत्रुमभिजघ्निवान् वज्रेण ॥ १८ ॥
पुनस्तान्देवान्विदधास्यभिष्टुतो लोके स्वर्गे सततं समिन्धसे ।
इन्द्रस्तुतिरियं देवि ध्वजयागविधौ स्मृता ॥ १९ ॥
आयाहि क्षेत्रपते चतुर्भुजेमं यज्ञं वह मण्डलस्थितः ।
भूतान्प्रेतान्बिभ्रन्शाकिनीश्चेमं क्षेत्रं विदधीह्युशत्तमम् ॥ २० ॥
अयं ते वीतिकृद्यजमानः संसहोत्रो बलिमुद्यच्छतीमम् ।
सैरिभोयं समभिश्लिष्टवर्ष्मा उद्यतस्ते वीतये तं समेहि ॥ २१ ॥
संकल्प्यास्ते संविदः शुप्रपाणाः परिस्तुताः पुरुधा घ्राणवेशाः ।
अभि तान् पाहि सुमनसा अपाभरेमं यज्ञं यजमानामृताय ॥ २२ ॥
त्वं हि क्षेत्रपालो भूतपतिर्योगिनीराट् रोचसे वर्ष्मणा नीलभासा ।
शूलं दण्डं नृकरोटिं च बिभ्रन्नभीतिदो भजतां भूतिदानः ॥ २३ ॥
इमं यज्ञमवसङ्गम्य स्वानां युक्तो विदधीह्यमृतं पारयास्मान् ।
एतत्त्वामृते ह्यवसादमीयान्नताः स्मो वयं नाथय नाथ चास्मान्॥ २४ ॥
आयातु वीरसूर्वाजिनी वाजयित्री तिरस्कृतिः।
त्वं सर्वतः सं तमसं लोकमोषं वितन्वती ॥ २५ ॥

इमं मखं मखकृतं समेहि मृत्योर्भ्रातृव्यान्मोचनाय ।
मोहिन्याद्याभिः संवृता मोहनाय तान्यान्वयं द्विष्मो येऽपि चास्मान्॥ २६ ॥
त्वं देवि भैरवि भीषणाभे सप्तिप्रोढे वेगगम्ये सुवेगे ।
कालाकल्पावासवर्ष्मप्रकाशे बिभ्रती कृपाणिं चपलाभं सुकल्पम्॥ २७ ॥
सौदामिनीव भजमानं द्विषां वै चक्षूंषि त्वमचिरं संवृणोषि ।
नेमं वीतिं रक्षयित्री त्वदन्या तां न प्रज्ञासिषुः सूरयोप्यादिमायाम् ॥२८॥
आयाहि भीमोग्र महाट्टहास सह प्रोग्रैर्बलिभुग्भूतसंघैः ।
आयाह्यमुं यजमानस्य सुक्रतुं सुकृतं चास्य पारयितुं समीहितम्॥ २९ ॥
मन्त्राहूतोऽस्मभ्यं समीहितं सुवर्द्धयथा साधयितुं स्म भैरव ।
वत्सानिव सौरभेय्यो चिराय प्रैहि प्रीत्यान् भजमानाबिभर्त्तुम्॥ ३० ॥
त्वं कालवर्ष्मा धृतदण्डोरुणाक्षो ज्वालावक्त्रो लेलिहन् दिक्तटानि ।
अनुयातैर्बलिभुग्भिः समेतो घनस्वनैर्भीषणैर्भीषयन् गाम् ॥ ३१ ॥
सटाभिः पिङ्गाभिर्व्यापयस्यन्तरालं द्यावापृथिव्योर्नृत्यमानः सूनृतम् ।
रुद्रैरादित्यैः समरुद्भिरश्विभ्यां देवासो विश्वे सततं समीडिरे ॥ ३२ ॥
तिरस्कृतैर्भैरवस्य परिवारसमर्चने ।
प्रोक्तस्तोत्रद्वयेनैव त्रिः स्तुवीत क्रमेण वै ।
स्वरोच्चारात्रिभेदेन प्रत्येकं गिरिनन्दिनि ॥ ३३ ॥
आयान्तु ते सिद्धनाथाः सयोषा यासां गणाः कोटिशो भीषणा गाम् ।
चंक्रम्यमाणा अपि सर्वाः समेता समागच्छन्तु मण्डले सुप्रधानाः ॥ ३४ ॥
अवन्तु ते सिद्धनाथाः सयोषास्त्विमं क्रतुं यजमानं मण्डलञ्च ।
याभिर्निचिताः सर्वलोका अलोका लोकालोकाः सगमाश्चागमाश्च ॥३५॥
आयाहि विश्वमूर्ते त्वं विश्वस्य विभावनः।
द्यावा-पृथिव्यावपि सरितः सागरा गिरयस्तैः समेतः॥ ३६ ॥
इमं वीतिं सुनिगूढं च कर्त्तुं समाहूतो देवः समेहि ।
वर्षिष्ठेषु श्रेष्ठतमेह यज्ञं प्राक्रम्यारं यजमानस्य भूतये ॥ ३७ ॥
त्वं विश्वमूर्ते भव सुक्रतो नो विश्वान्यङ्गानि पुरुधा ते विभान्ति ।
द्यौस्ते मूर्धा दिशः श्रुतिर्ज्योतींष्यक्षिणी वदनं ह्याशुशुक्षणिः ॥ ३८ ॥
उदरं नभो वारिधयश्च कुक्षी विदिशो बाहा अंघ्रयो वै तलानि॥ ३९ ॥

अस्थीनि शैला ओषधयो वनस्पतयो लोमानि नाड्यः सरितो वेगवाहाः ।
सर्वं वपुरधिदेवासश्च सर्वे त्वयीष्टे सर्वमिष्टं सुमर्त्यैः ॥ ४० ॥
इमं क्रतुं परि सर्वैः सुपर्वभिर्भरस्व सर्वानधियज्ञं कृणुष्व ।
आयाहीमं वीतिमीश प्रेष्ठेमनोन्मनि त्वां यजमानः प्रकामम् ॥ ४१ ॥
विश्वशक्तिं विश्वजन्यामभिराद्धुं समुद्यतः सह होत्रैः समीहः ।
मनोन्मनीं त्वां विश्वमूर्तेर्भवित्रीं विश्वप्राणां विद्युदादित्यवर्णाम् ॥ ४२ ॥
विश्वप्रह्वां विष्णुमायां विराजीमभिकुर्मो वयममृताय लोके।
हिरण्यवर्णामित्यादि पह्वये श्रियमन्तकम् ॥ ४३ ॥
ऋचां चतुष्टयं मूलदेव्याह्वाने समीरयेत् ।
चन्द्रां प्रभासामित्यादि ऋचां चैव (च)तुष्टये ॥ ४४ ॥
मे गृहादिति पर्यन्तं स्तोता स्तोत्रमुदीरयेत् ।
इमं त्वा देवराजायेन्द्राय भूतराजाय क्षेत्रपाय ॥ ४५ ॥
तमो राज्ञै तिरस्कृत्यै बलिभुग्राजाय भैरवायासदे ।
मन्त्राः पात्रासादनेमी चत्वारः क्रमतोऽम्बिके ॥ ४६ ॥
आयाहि संविदं धारयित्रि क्रतुमेतं पारय त्वं हविर्भिः ।
अस्मभ्यमभिदुर्मतिं हतं कृणुष्व शं विधात्री ॥ ४७ ॥
त्वं शेमुषीणामधिपत्नी त्वं वै नीहारस्य प्रहर्त्री सङ्गतानाम् ।
त्वं याज्यानां प्रसवित्री सुपोष्ट्री सुनेत्री कामानामसि बोधयित्री॥ ४८ ॥
देवि नो देहि क्रतवे पारणायेमां संविदमभिषूत्यै सुनीताम् ।
वरं यत्ते प्रेक्षितं प्राप्नुहीममाचार्योऽहन्त्वां प्रपन्नोऽभि याचे ॥ ४९ ॥
आचार्या त्वं क्रतुषु यद्वेत्थाद्यं मौल्य-मूलं गरिष्ठम् ।
तेनाहं संविदमिमां विक्रीणे क्रतुपारिणीम् ॥ ५० ॥
ब्रह्मन्नेहि संविदमभियाचस्व चेति वै ।
तत्तन्नाम्ना समाह्वानं सर्वेषां क्रमतः शिवे ॥ ५१ ॥
ब्रह्मादयः स्व-स्वनाम्ना याचेयुर्मन्त्रयोगतः।
तत्तन्नामसमायोगात्प्रत्युक्ता अपि ते तया ॥ ५२ ॥
पुत्रा दारा अपि गेहं धनानि पशवोऽश्वा यच्च किञ्चित्स्वमस्ति ।
सर्वैरेतैर्मौल्यमूलैः क्रतूनां विक्रीणीहीमां संविदं याचतो मे॥ ५३ ॥

न मे पुत्रैर्धनगेहादिभिर्वा यन्मुख्यं स्वं क्रतुषूपयुक्तम्।
तदेकं दातुं प्रतिजानीहि तेन विक्रीणेऽहं संविदं ते समिष्टाम् ॥ ५४ ॥
प्रब्रूहि तन्मे प्रतिजाने ददानि प्रत्तं तद्विद्धि न ह्यदेयं तवास्ति।
असुभ्योऽपि यद्गरीयस्त्वमृच्छ नाहं प्रव्रजे सन्तमसं दुरन्तम् ॥ ५५ ॥
क्रतुष्वेको यजमानो गरीयान् येन स्विदृतेन क्रतवी भवन्ति।
तं त्वां गृहीतमभिजानीहि सुक्रतो क्रमेणैनामीप्सतां ते स होता॥ ५६ ॥
नेदं द्वारमभिनिर्गन्तुमर्हं मया ब्रह्मणा समभिक्रान्तवर्त्म।
निवर्त्तस्वान्यद्वारेण नाहं स्वं मार्गं दद्मि नहि तेऽत्राभिसंक्रमः ॥ ५७ ॥
होता पुरःसरः स्तोता त्विममेव समीरयेत्।
स्व-स्वनामसमायुक्तं द्रुतमुच्चस्वरेण च ॥ ५८ ॥
त्वं संविदं धारयन्ती सुधात्री क्रतुष्वेवं हविषः प्रापयित्री।
देवीं त्वां हविषो धारयित्रीमृते यज्ञा ह्यवसन्ना भवेयुः ॥ ५९ ॥
इन्द्रस्त्वामभिराध्य वृत्रहन्तमो अभिराध्यो वितायिभिः।
स्तोमन्ते शतधृतिर्विश्वमूर्तिरचि(ची)क्लृपत् ॥ ६0 ॥
अमृतास्त्वामनुजग्मुः सुवीतिषु समीडिता हैमवती सुजानिना।
छन्दांसि मन्त्रास्त्वयि संसृज्यमानाः समीयिवांसो·महिमानं महान्तम् ॥ ६१ ॥
वयं स्मस्ते ह्यनुचरास्तारयास्मान्सुवर्चसे।
यजमानं निष्क्रीणीमहे छन्दितेन तव निष्क्रयेण ॥ ६२ ॥
ओमित्युदाहृत्य पश्चात्सा ब्रूयान्मन्दमध्यतः।
आचार्यो मे कल्पय सुराग्रहं समभिष्टुतम् ॥ ६३ ॥
देवि संविद्धारयित्रि नः सुराग्रहमभिकल्पयामो वयम्।
समाहूतमभिष्टुतं विश्वमेध्यं पाहीमं सुक्रतुं यजमानोऽभिराधति॥ ६४ ॥
देव्यत्र प्रस्तरे निषीदास्मान् क्रतुं सुसमृद्धान् विधेहि।
एतेन त्वां सदशेन छदामहे यजमानस्य विवृतिं त्वं समाछद ॥ ६५ ॥
इमं त्वां देवताभ्यः खिलाभ्यः श्रीदेव्यै मूलरूपायै।
रश्मिरूपाभ्यो लक्ष्मीभ्यः कोशाभ्यः कल्पलताभ्यः कामदुघाभ्यो रत्नाभ्यः ॥६६॥
देव्यै मन्त्रिण्यै दण्डिन्यै तिथिदेवताभ्यो नित्याभ्यः।
नाथेभ्य ओघगुरुभ्यो रश्मिभूताभ्य आवृतिभ्यः ॥ ६७ ॥

देवेभ्यो बलिदेवेभ्यो बालायै कुमार्यै नाथाय वटुकायासदे ।
संवित्स्थाने सुरेत्युक्त्वा सुराह्वानं समीरयेत् ॥ ६८ ॥
अभियाचनमन्त्रेऽपि तथा संयोजयेच्छिवे ।
तथा स्तोत्रा स्तुता चापि यजमाने सुरापदम् ॥ ६९ ॥
सुराग्रहे चाग्रपूजां विनिवेश्य च शङ्करि ।
इमां त्वामाद्य-द्वितीय-तृतीय-चतुर्थसंस्काराय ॥ ७० ॥
भूः परिस्तृणामि भुवः स्वर्भूर्भुवः स्वः परिस्तृणामीति प्रत्येकम्।
एता आद्याय सदाशिवाग्नये समिधो निक्षिपामि ॥ ७१ ॥
एता द्वितीयाय तृतीयाय चतुर्थायेश्वररुद्रविष्ण्वग्नये इति ।
त्वं सुरे निर्जरोभिर्निधीनां सम्राज्ञी अभिनिर्मिता ॥ ७२ ॥
त्वां पूरयामि क्रतवेऽस्य पूरय स्वकामान्याननु देवासः।
अमृतस्येव मन्दरस्त्वं मयासि धृतस्त्विह ॥ ७३ ॥
पयसीव सारं मन्थानाभिनिर्गम यशंवह।
सुरा सदित्वं विनिविश्यमानोऽस्मान् पुषाण हविषः पारणेन॥ ७४ ॥
सन्तर्प्य देवीः सुगुणैर्हविर्भिरियाम तत्स्वाराज्यं समीड्यम्।
स्तोत्रे सुवर्चसेऽन्ते तु निर्मथ्नतस्त्विमौ गुणनिर्मोचनाय ॥ ७५ ॥
हेतुस्त्वं शर्मणः खलु देवासस्त्वामभीवृताः।
ऋतं यद्ब्रह्म भुवनस्य प्रेष्ठं तद्धेतुस्त्वमभिष्टुता ॥ ७६ ॥
वीर्ये मुनीनां तपसाभि सम्भृते हेतुर्विप्राणामपि सत्यवाचि ।
लोकचक्षुर्महत्तमस्त्वयि प्रेष्ठश्च धारकः ॥ ७७ ॥
तवान्तराये पितरो मनुष्या देवासश्चाभवन्शर्मगर्धाः।
हेतुस्त्वं तेषां वृषभो जनायेमं सधीचीनमभिसं विधेहि ॥ ७८ ॥
अपिधानेनामुना संवरस्व स्तोमं गुणानां नातियादितोन्ये।
अनेनैव सुक्रतोररातीनभिरोधामि यजमानस्य श्रेयसे॥ ७९ ॥
आयाहि वरुण क्रतुपारणायाप्याययय हवींषि वर्धमानः ।
स्रोतोभिः समुद्रैरपि चोदपानैः समेतोत्र वीतिं निभृतं पुनीहि ॥ ८० ॥
इमं मे व० प्रियासः ४
इमं त्वां सुक्रतवेऽभिवर्धनाय सदे पवित्रं पावनाय पवित्रपते ।
संवर्धस्व सन्निवर्तस्वाहीनं सुक्रतुं कुरु ।

संवर्त्ता इव सागरं पात्रेऽभि पूरयामि ।
इमं त्वाभिवर्धनाय भूः परिस्तृ० ।
आयाहि गङ्गे सरितां वरिष्ठे क्रतोरस्य पावयितुं हवींषि ।
यथासुषेरुपरिष्टाद्धि भिन्नादरं पुरा पावयितुं हि लोकान् ।
त्वं देवि गङ्गे महति खे निषण्णा पुरमाजगतीः पातुमारात्प्रवृत्ता।
सहस्रमूर्ध्नोऽङ्गुष्ठभेदात्पुनाना शतधृतिं मीढुषं विश्वमूर्तिम् ।
द्यावा भूमिं संवृता ते पृषत्कैस्तमोहन्त्री लघुसंस्पर्शनेऽपि ।
तीर्थान(ा)मधिपत्नी सम्राज्ञी सरितां पतेः ।
त्र्यम्बकं हरिमात्मभुवं पुनासि स्पृष्टैकान्ते लोकयात्रा वरिष्ठम्।
परमे व्योम्नि पतितानात्मनोऽङ्गेन यश्चरन्तः परिपाहि सुक्रतुम्।
अग्निगर्भमरणिं पूर्वमभि मृजामि तथोत्तरम् ।
अग्नि० पाये कुशान्संस्तरामि तथा कृष्णाजिनम् ।
त्वां क्षेत्रमसि वीतीनां त्वामभि संसदामि ।
हिरण्मयः प्रस्तरराडिवाभि विशस्व योनौ।
यज्ञानां सुक्रतूनां सत्राणामुत कव्यानाम् ।
देवानामपि जीवातुरसि वैश्वानर सुप्रसीद ।
अग्न आयाहि० बर्हिषि ।
अग्न आयाहि सुक्रतुं पारयस्व समेधितः ।
अभितर्पय देवान्हविषास्मान्सुपुष्टिभिः ।
आयाह्यग्ने वीतिमलङ्कृधि सुपुष्टः पुष्टिमान्कृधि ।
इमं नो यजमानं बर्हिषोऽस्मादजीजनः ।
अग्ने त्वन्नो० रयिन्दाः ।
त्वां हविर्निर्वप्तये कामाग्निमाददे ।
तथा सदाशिवेश्वररुद्रविष्णून् ।
निर्वप्तये हविषो निर्वप्तिम् ।
हवि० प्तिम् ।
इत्याह्वानान्तं ।
संवर्धस्व समेधस्वाग्ने हविषो निर्वप्तये संदधामि ।
इमानि वानस्पत्यान्याच्छिन्नानि संदधामि ।

अभिवर्धस्व वैश्वाना(न)र हविषां साधनाय ।
काष्ठानीव यजमानस्य पाप्मनो निर्दह ।
आयाहि त्वं वीतये यजमानस्य श्रेयसे ।
आह्वयाम सुरे मन्त्र-कृतैरुशत्तमै स्तोमैः ।
आयाहि त्वं शतधृतिना समीडिते अभीष्टुतैरुरुभिरुक्थशंसैः ।
यजमानस्य कामान् पुष रायस्पोषाय सन्नता ।

हेतुसूक्तम्–

देवैरध्वर्णवं निर्गतासि निर्वप्तये सुरे त्वामधिश्रये।
गन्धं रसं चांक्ष विषमं विमुञ्चानर्हं यत्ते मादनम् ।
सुधारसं यत्ते पुरा स्कन्नं तेनाभि निर्गच्छ ।
वैश्वानरस्त्वामुन्नयतु सुश्लोक्यामश्लोक्यामपनोदतु ।
अपां मेध्यं यज्ञियं तदभिगृह्णामि ।
आपस्तन्वो मा भवन्तु पुनर्नः प्रतिपूरिताः ।

भैरवस्तुतिः–

दृषदसि वीतिसाधनं त्वामभिनिक्षिपामि ।
उपदृष०/त्वां दृषदि निक्षि० ।
येऽत्र वै कृता दोषा देवानामवमोददाः।
तीर्थेन तान्निर्णुदामः सुहिता भव संविदे ।
अभिपीडितान्तर्दोषान्प्रविमुञ्चीयेत आसन्भैरवीयैः
प्रेतैः संगतिना । सुवंशे पात्रेऽभिप्रसृता यजमानं सु शं कृणु ।
आसादिता दृषदि वायुना गर्भदोषान्निर्गमय ।
पशुरसि क्रतुपारगः ।
एभिस्तीर्थैरभिपावितो भव ।
एत वासः संवृणोमि तेनासुरैः संवृतो भव ।
देवानां तर्पणः सुमेध्यो ब्रह्मभावनः ।
मूर्धा ते क्षेत्रपतये भूयात् । ग्रीवा तिरस्कृत्यै । हृदयं मूलराज्ञे(ज्ञै)।
दक्षपार्श्वं मन्त्रिण्यै । वाम० दण्डिन्यै । उदरं पञ्चिकाभ्यः ।
नाभिर्नित्याभ्यः । वपा अग्नये । वस्तिर्गुरूणाम् ।
आन्त्राणि भैरवाय । क्रोडमावृतिभ्यः । दक्षभुजं कुमार्यै ।

वामभुजं वटुकाय । ककुदं बलिदेवताभ्यः । मेढ्रं ब्रह्मणे ।
वृषणमिन्द्राय । दक्षजङ्घा गङ्गायै । वामं वरुणाय । अन्यान्यन्येभ्यः।
पशुपाशाय० दयात् । शिवोत्कृत्तमि० ह्यसि । इमामगृभ्ण० कव्या।
मेढी भव खचक्रस्य ध्रुवो भव ।
बध्नामि त्वां रशनया मान्यत्र पराक्रम ।
देवैरुपयुक्तोऽमृतमश्नुहि ।
निखनामि त्वामगराजे वाचालो भव ।
कृपाणिं त्वां करालं नैर्ऋतोद्यतम् ।
समाददे विशसनाय पशोरस्य सुक्रतौ ।
तीर्थेनाभिनिर्णिक्तः सुदृढान्शमलान् जहि ।
बद्धो मेखलया विकृतोऽभिसंविश ।
कृपाणिं त्वामभिमन्त्रये दुर्गा त्वामभिसंविशतु वरेण्या ।
छुरिकां त्वां करालामित्यादि०। राजीवारोहितवक्षः स्रोतो देवताभ्यः ।
कामद्रवः श्यावमुखाः । अमुष्मिन्संविशध्वं सुहितास्थो वीतये ।
मीनोसि सु० भव । एतत्तीर्थं संपिबामृतत्वमधिगच्छ ।
संयुजामि त्वाममीषु पावितः पुनीहीमान् । एतं वासः० भावनः।
आयाहि सुरां धार० पारय पूजिता त्वं० धात्री । त्वं शेमु० धयित्री ।
त्वं सुरां धारयन्ती० महिमानं महान्तम् । एवं संविद्धात्र्याः।
आयाहि मन्त्रिणि मन्त्रवतां वरिष्ठे गीतैर्हास्यैरभिराध्नुमो वयम् ।
आयाहि मन्त्रकृताहूता संवृता रश्मिगणैर्महीषुभिः ।
त्वं मन्त्रज्ञा मन्त्रिणि मातृमूर्तिर्गीतैर्वाद्यैरपि नर्मवाग्भिः ।
सभाजिता शुकवाक्संश्रुतीनां रसज्ञा महाराज्ञी प्रेयसी मूलशक्तिः।
मणेर्मेचकस्वाङ्गकान्त्यावहा सा तन्त्रीयुक्तां कच्छपीं धारयन्ती।
विद्याबलानां शेमुषीणां विधात्री पाह्यस्मान् पूरय सुक्रतूक्थम् ।
आयाहि दण्डिन्यमुमीडितं वै विधातुमत्र समावृता स्वीयसंवारवेशैः ।
विताय क्रतुमभिरायो बलानि भवस्वेमं यजमानं शरण्या।
त्वं दण्डिन्युग्रदण्डप्रचण्डा मन्यूनां राज्ञी किरिवक्त्राभिरम्या ।
अधिक्षिपस्यनुगंतॄ प्रतीपान् जगद्दण्डेने(न)जयसि त्वमेका।
त्वया हीनास्तूत्पथा संविशेयुः सर्वेऽन्योन्यं प्रविशेयुर्वपूंषि।

सीरं मुसलं प्रहिणोत्यातिवेलान् हिरण्मयेन वपुषा सूर्यवर्चसा।
आगच्छतामुं वीतिं गुरवः सुमेधसः पूर्वं स्रोतः सन्निधाना वरेण्याः।
समाधाय सुक्रतुं पारयं त्वस्मान् प्रपन्नानभिराधमानान्।
पूजनीया गुरवः सर्वतश्च समीडिता सर्वगुणप्रधानाः।
शिवात्मानः संवरणाः समीहासुशेवधयः काम्यमानस्य लोके।
अत्रैव गणपतिं पीठानि समयदेवा(व)तां योजयेत्।
एवं दक्षिणस्रोतसि भैरवान् सिद्धान् बटुकान् पददेवते समयदेवताम्।
पश्चिमस्रोतसि दूतीर्मण्डलानि वीरभैरवान् नाथान् समयदेवताम्।
उत्तरस्रोतसि मुद्रा वीरावलीः समयदेवताम्।
मालिनीं मन्त्रराजं मण्डलगुरून् समयदेवतां योजयेल्लिङ्गादिविपरिणामश्चेति।
शमनोसि शामित्रमभिगमय।
इमं खड्गमभिसंगृहाणेमं पशुं वीतये सन्नियच्छ।
पशूनां त्वा पशुराजं सुक्रतवे संयुनज्मि।
मा मा हिंसीर्मे हिंसितः सुकृतेन त्वोन्नयामि।
छुरिकामुक्तवद्यात्प्रार्थ्य मत्स्यं तथा चरेत्।
इदं वासोभि ददामि ते शमित्रे व्रीहीनां द्रोणमभिसंगृहाण।
तेनेममभि मा हिंसन्तु रायस्पोषाः सन्तु पशवः क्रतूनाम्।
मूर्धान्ते क्षेत्रपतयेऽभिषिञ्चामीति सर्वतः।
आददे त्वामसि-पुत्रीं शर्मकर्त्रीं यजमानस्य।
अनया त्वं विशसितः शर्मकृद्यजमानस्य भूयाः।
तत्ते बध्नामि रशनाभिर्नियोत्रैः।
मीनानां विशसनं च प्रोक्तं भवतीश्वरि।
मूर्धानमिमं क्षेत्रपतये शंसामीति सर्वतः।
क्षेत्रपतेः परिचरा लोहितपाः सुतीक्ष्णधियः।
ये तान् यजमानाय पातवे क्षतजेनाभिप्रीणयामि।
समाददे वोऽत्र वीतिदेवांस्तर्पयितुं संस्करणायोलूखले निक्षिपामि।
भरस्वेमांश्चणकानुलूखलोऽभियाचितः। आददे त्वां मुसलं कण्डनाय
तेनारातीः कण्डिताः स्युः समन्तात्।
भूरभिहनिष्यं भुवः सुवर्भूर्भुवः सुवरभि हनिष्ये।

अभिषिञ्चामीमान्सुवीतयोऽभिसंयुनज्मि ।
भूरभिषुणोमीत्येवं संविदि पेषणम् । पेषयेत्तद्वदेवात्र चणकानपि शङ्करि ।
त्वं सुक्रतूनां विदधासि वै फलं देवान्तोषय हविषा स्वेन संविदे।
निषीदात्र प्रस्तरे सर्वकामान् यजमानस्य वर्धय सुप्रणीता ।
आयाहि मण्डलेशात्र क्रतुं मण्डय मण्डले ।
देवताभिरभिसंवृतोऽभिगमय क्रतोः फलम् ।
त्वं मण्डलेशो मण्डलानि मण्डलेस्युशत्तमः ।
यजमानस्य सुक्रतुं पारय रायस्पोषः सर्वतः समभिष्टुतः ।
क्षेत्रपतेर्मूर्धानं निक्षिपामि सर्वत एवम् । नैऋत्यादिषु कोणेषु दिक्षु प्रागादितोऽपि च।
विदिक्षु तत्तदग्रेऽपि बहिः प्राग्दक्षिणोत्तरे ।
मध्ये च निक्षिपेदङ्गान्युक्तरीत्या क्रमेण तु । निषीदात्र प्रस्त० ।
र्धय सुप्रणीत ।
त्वं सुक्रतूनां० हविषा पाशवेन ।
इमां त्वां संविद्ग्रहणीं हेतुग्रहणीं हविर्ग्रहणीं स्रुचं स्रुवमासदे ।
तथा संविदादिशेषग्रहणीमासदे ।
त्वं शेमुषीणा० बोधयित्री । त्वं संविदं धा० नं महान्तम् ॥
त्वं कालवर्ष्मा० तं समीडिरे ॥ हिरण्यगर्भः सम० द्यामुते मां तं
देवमिहावहे । इति ऋक्त्रयम् ।
तस्मै देवाय हविषा विधेमेति स्तुतिः ।
आयाहि विष्णोऽत्र क्रतुपारणायेमं यज्ञं विततं पाहि चास्मान् ।
देवैः सम्यक् समीडितोऽत्र लोके लोकानवसि द्रुतमायाहि चात्र॥
तद्विष्णोः परमं पदम् ॥
विष्णोर्नुकं वी० ष्णवे त्वा ।
आयातु देवो भगवान्नीलकण्ठ इमं यज्ञं वहतु सर्वतः ।
गिरिव्रजो गिरिजाजानिरीशोऽस्मान् यजमानं पातु विद्विषः॥
त्र्यम्बकं यजामहे० मृतात् । अवतत्य धनुस्त्व० नाभव॥
आयाहि सूर्य क्रतुषु त्वमीशः सर्वं लोकं वहसि स्वमहिम्ना ।
धाम्नामस्युरुतरदेवपूज्य क्रतुमिमं पारय लोकमूर्ते॥
आयाह्यग्ने सोमेत्यादि ॥ उद्वयं तम० रुत्तमम् ॥ उदुत्यं जा० सूर्यम् ॥

अग्ने त्वं पारया० शंयोः । अग्ने त्वं० रयिन्दाः ॥ आप्यायस्व० सङ्गथे ॥
सोमो राजा नक्षत्राणामोषधीनाम् । अपां रसो रसमयः आप्यायकः ।
आयात्वमुकयजमानस्य यज्ञं पारयितुं पारणीयः । देवैरीड्यः
क्रतुराजे समिष्टः श्रेष्ठः पुष्टिं विदधीह्याशु रायः ॥
त्वं यज्वनां श्रेय ओजो बलं च रायः पुष्णासि यजमानं पाहि सर्वतः ।
तं त्वां हविषा यजामहे सुकृतं लोकं नयामुकास्मान् ॥
अनुक्ते सर्वतस्त्वैतदाह्वानं स्तुतिमीरयेत् । इमं हविः पशोरङ्गनामेन्द्रायते
बर्हिषदे हवामः । तेनास्य यजमानस्य सुकृतं काममभिवर्धताम्॥
प्रत्येकं यागमन्त्रोऽयं तत्तन्नामाङ्गसंयुतम् ।
इन्द्रो मे रिपुहा भूयाद्धविषा हुतेन संप्रीत इन्द्रायेदं न मम ।
तिरस्कृतिः पशुदृष्टिघ्नी । क्षेत्रपालः क्षेत्रपो । भैरवो भयहन्ता ।
विश्वमूर्तिः विश्वबोधनः । संवित्संवेदयित्री । सुरा सौमनस्यदात्री ।
गङ्गा पावयित्री । वरुण आप्यायनोः । मन्त्रिणी मन्त्रदात्री ।
दण्डिन्यरातिदण्डदात्री । नित्या नित्यार्तिहन्त्र्यः । गुरवो ज्ञानप्रदाः ।
अङ्गदेव्यङ्गपोष्ट्री । त्रिपुराद्यावृतिदेव्यः पृथक् सम्पत्कर्यः । ब्रह्मा
ब्रह्मवर्चसदः । विष्णुरोजोदः । शिवः शुभदः । सूर्याद्यास्तेजोदाः ।
आम्नायगा अशुभहरा इति ।
यजमानस्य यागान्ते त्यागमन्त्रा उदाहृताः ।
देवानां त्वा हविषामभिसन्नयामि संविदम् ॥
०मभ्यासदे० । मभिसंगृह्णामि० । मभिपिबामि० ।
उच्छिष्टभाग्भ्योभि समुत्सृजामि यजमानस्य पातवे ॥
हिरण्यवर्णामित्यादि तथाह्वानं स्तुतिर्भि(र्भ)वेत् ।
गन्धद्वारादि सप्तर्चं पठित्वा क्रमतः शिवे ॥
सुपूर्णां पूरयित्रीं त्वां प्रपद्ये सुन्दरीं श्रियम् ।
सुपूर्णं मा विदधीहि श्रीमति प्रेतसंविशे ॥
हविषा संविदा पारिप्लुतेन वसुधारया च ।
सर्वान्नः पूर्णानभिसंविधेह्यागस्कृते मयि शान्तिं विधत्स्व ॥
द्वाभ्यां युतं त्रिधा कृत्वा पूर्णाहुतित्रयं यजेत् ।
सुन्दर्यै त्रिपुराम्बायै कामदायै त्यजेत्तथा ॥

इति मन्त्रास्तु ते प्रोक्ता अथर्वणसमुद्भवाः ।
पाठमात्रेण मन्त्राणां तत्पूजाफलमाप्नुयात् ॥

॥ इति श्रीत्रिपुरार्णवे त्रिपुरासारसर्वस्वे मन्त्रकथनं नाम विंशतिस्तरङ्गः ॥२०॥

●

अथैकविंशतितस्तरङ्गः

शैलजोवाच

भगवन् श्रोतुमिच्छामि श्रीसूक्तस्य विधिं परम् ।
त्रिपुरार्णवसम्प्रोक्तं वद मे कृपया विभो ॥ १ ॥

भैरव उवाच

शृणु देवि प्रवक्ष्यामि श्रीसूक्तविधिमुत्तमम् ।
यस्य श्रवणमात्रेण त्रिपुरा वाञ्छितप्रदा ॥ २ ॥
हिरण्यवर्णामित्यादि पुरुषानहमन्तकम् ।
तिथिसंख्यर्चसंयुक्तं श्रीदेवीप्रीतिदायकम् ॥ ३ ॥
श्रीविद्यायाः सूक्तमिदं श्रीसूक्तमिति कीर्तितम् ।
श्रीविद्या त्रिपुरैव स्यात् त्रिपुरासूक्तमेव तत् ॥ ४ ॥
उपचारेषु मन्त्राणां योजनं यः समाचरेत् ।
एकैकशश्चतुर्धा च चतुर्भिस्त्रिस्त्रिभिस्तथा ॥ ५ ॥
चतुःषष्ट्युपचाराणां योजनैवं प्रकल्पिता ।
एकैकशः समस्तेन षोडशेषु प्रकल्पनम् ॥ ६ ॥
एवं पूजनमात्रेण सर्वपापैः प्रमुच्यते ।
न कर्मणां लोपदोषो भवतीति सुनिश्चितम् ॥ ७ ॥
सौभाग्यविद्यावर्णैस्तु पुटितं प्रतिमन्त्रकम् ।
यो हुनेतस्य ललिता वाञ्छितार्थान्प्रयच्छति ॥ ८ ॥
बिल्वपत्रैः पापनाशो भवेत्सौभाग्यसम्पदः ।
सुगन्धकुसुमैः सौख्यं तिलैः पापप्रणाशनम् ॥ ९ ॥
धान्यवृद्धिर्भवेद्धान्यहोमैस्तेजो घृतेन तु ।
अन्यैरप्यागमप्रोक्तैर्होमस्तत्तत्फलाप्तये ॥ १० ॥
शतावृत्त्या सहस्रैर्वा तथा दशसहस्रकैः ।
सर्वकामांस्तथा सौख्यं देवता-प्रीतिमाप्नुयात् ॥ ११ ॥

लक्षावृत्त्या श्रीपुरे तु वासः स्यात्कल्पकावधि।
तथाभिषेकैः श्रीचक्रे प्रोक्तवद्वा महाफलम् ॥ १२ ॥
वाग्बीजसम्पुटजपात् प्रतिमन्त्रमगोद्भवे ।
वाक्पतित्वं तु श्रीबीजपुटितैर्देवतात्मता ॥ १३ ॥
कामबीजेन पुटिताद्वशीकुर्याज्जगत्त्रयम् ।
पूजने यस्त्वशक्तः स्यात् त्रिधा सूक्तप्रपाठतः ॥ १४ ॥
पूजाफलमवाप्नोति हीयते न कथञ्चन ।
(श्रीसूक्तस्या)स्य जपतः फलं शतगुणं भवेत् ॥ १५ ॥
तस्य श्रीत्रिपुरादेवी (भवेत्सर्वा)र्थवर्द्धिनी ।
एतदावश्यकं देवि सर्वथा प्रपठेदिदम् ॥ १६ ॥
त्रिपुरोपास(को देवि त)स्मान्नित्यं पठेदिदम् ।
एतस्य सदृशं पुण्यं न किञ्चित्पर्वतात्मजे ॥ १७ ॥
(पापं ज्ञा)त्वैतदखिलं नश्यत्यामघटाम्बुवत् ।
इति ते देवि सम्प्रोक्तं विस्तरेण विधानकम् ॥ १८ ॥

॥ इति श्रीत्रिपुरार्णवे त्रिपुरासारसर्वस्वे श्रीसूक्तविधिर्नामैकविंशतिस्तरङ्गः ॥ २१ ॥

●

परिशिष्टम्

त्रिपुरार्णवस्य विभिन्नतन्त्रग्रन्थेषूद्धृतानां पद्यानां निदर्शनानि

श्रीविद्यार्णवे

द्वितीयश्वासे दग्धमन्त्रप्रसङ्गे–

आदौ कूर्चद्वयं मध्ये कूर्चबीजद्वयं तथा ।
अन्ते कूर्चद्वयं यस्मिन् मन्त्रराजे प्रदृश्यते ॥ १ ॥
स तु षट्कर्णको मन्त्रो दग्ध इत्यभिधीयते ।
जपतां सिद्धिरोधः स्यात् त्याज्यः सर्वैः सदा बुधैः ॥ २ ॥

द्वितीयश्वासे मन्त्रप्रसङ्गे–

हूङ्कारस्यैव नामानि कूर्चं माया सरस्वती।
जलं नीरं तथा कर्ण तटं कूले महेश्वरी ॥ १ ॥

द्वितीयश्वासे ऋतमन्त्रप्रसङ्गे–

आदावन्ते च मध्ये वाप्यधिकाक्षरयोगतः।
त्रस्तः सोऽभिहितो मन्त्री जपतामशुभप्रदः ॥ १ ॥

द्वितीयश्वासे गर्जितमन्त्रप्रसङ्गे–

मोहाद्वा लोभतो वापि विधिमुत्सृज्य यो जडैः।
दीयते स तु मन्त्रस्तु गर्जितो गर्हितः सदा ॥ १ ॥

द्वितीयश्वासे मन्त्रप्रसङ्गे–

स्वतन्त्रोक्तं परित्यज्य ज्ञात्वा वाऽतृप्तितोऽपि वा।
स्वगुरुप्रोक्ततो वापि मन्त्राः सिद्धिभ्रमादपि ॥ १ ॥
जपतर्पणहोमार्चामार्जनानि पुनः पुनः ।
कुर्वतो मन्त्रराजः स्यान्निर्जितो गर्हितः सदा ॥ २ ॥

द्वितीयश्वासे असहमन्त्रप्रसङ्गे–

नियमस्य च भङ्गेन मन्त्रः स्यादसहः सदा ।

द्वितीयश्वासे मन्त्रपुरश्चरणप्रसङ्गे–

वीर्यहीनो यथा देही स्वकर्मसु न क्षमः ।
पुरश्चरणहीनो यो तथा मन्त्रः प्रकीर्तितः ॥ १ ॥
नित्यनैमित्तिकाद्यैश्च पुरश्चर्यादिभिर्मनुः ।
भवेत् सत्त्वगुणोपेतः सेवया नृपतिर्यथा ॥ २ ॥

सत्त्वं गुणं समापन्नो मन्त्रः कल्पलतासमः।

द्वितीयश्वासे छिन्नमन्त्रप्रसङ्गे–

पल्लवाद्यैर्विलोपेन स्वरवर्णविलोपतः।
अपूर्णत्वं समापन्नः स मन्त्रश्छिन्नसंज्ञकः ॥ १ ॥

द्वितीयश्वासे मन्त्रप्रसङ्गे–

सानुनासिकवर्णेन संयुक्ताः स्तम्भिता मताः।
× × × ×
स्वरप्राप्ते ऋणप्राप्ते कालेषु विनियुज्यते।
अन्यदा विनियुक्तश्चेन्मन्त्रो मत्त उदाहृतः ॥ १ ॥
× × × ×
स्वापकालो वामवहो जागरो दक्षिणावहः।
स्वापकालजपान् मन्त्रोऽप्रबुद्धो हन्ति मन्त्रिणम् ॥ १ ॥
× × × ×
पुस्तके लिखितं दृष्ट्वा जपेद् यः साधकाधमः।
चत्वारि तस्य नश्यन्ति आयुः कीर्तिर्यशः श्रियः ॥ १ ॥
जपात्पत्रेषु मन्त्रः स्यात् क्रुद्धः सन् हन्ति साधकम्।
× × × ×
दुःखितास्ते समुद्दिष्टा वैरिवर्णैश्च संयुताः।

द्वितीयश्वासे कुण्ठितमन्त्रप्रसङ्गे–

प्रयुज्यन्ते सदा मन्त्रास्तत्तच्छान्तिं विना नरैः।
ते मन्त्राः कुण्ठतां यान्ति तस्माच्छान्तिं समाचरेत् ॥ १ ॥

द्वितीयश्वासे रुष्टमन्त्रप्रसङ्गे–

मौनं विना जपेन्मन्त्रं राक्षसैर्गृह्यते जपः।
मन्त्रोऽपि रुष्टतां याति सिद्धिं नैव प्रयच्छति ॥ १ ॥

द्वितीयश्वासेऽवमानितमन्त्रप्रसङ्गे–

मन्त्रे गुरौ देवतायामुपेक्षा क्रियते यदि।
अवस्थया वा वैषम्यान्मन्त्रः स्यादवमानितः ॥ १ ॥

द्वितीयश्वासे मन्त्रप्रसङ्गे–

मधुमत्यां महादेव्यां ऋणशोधो विशिष्यते ।
कालीमते तु मालिन्यामंशकाद्यं प्रशस्यते ॥ १ ॥
कथं ऋणित्वं मन्त्राणां साधकानां च मे वद ।
पूर्वजन्मकृताभ्यासे पापस्याफलाप्तिकृत् ॥ २ ॥
पापे नष्टे फलावाप्तिः काले देहक्षणादृणी ।
मन्त्रः सम्प्राप्तिमात्रेण प्राक्तनः सिद्धये भवेत् ॥ ३ ॥
सिद्धमन्त्राद् गुरोर्लब्धमन्त्रो यः सिद्धिभाङ्नरः ।
लक्ष्मीमदादनादृत्य मन्त्रभोगमवाप्नुयात् ॥ ४ ॥
स मन्त्रस्य ऋणी ज्ञेयो भजनं तस्य पूर्वगम् ।
तस्मादृणविशुद्धिस्तु कार्या सर्वैस्तु सर्वतः ॥ ५ ॥

द्वादशश्वासे द्वारपूजाप्रसङ्गे–

वामपादं पुरस्कृत्य प्रविशेद्यागमण्डपम् ।

चतुर्दशश्वासे कामेश्वरीनित्यायजनप्रसङ्गे–

ऋषिः सम्मोहनः प्रोक्तस्त्रिष्टुप्छन्द उदाहृतम् ।
कामेश्वरीदेवता स्याद् ब्रह्मबीजं तु बीजकम् ॥ १ ॥
शक्तिः कामकला प्रोक्ता धराबीजं तु कीलकम् ।

चतुर्दशश्वासे भगमालिनीनित्यायजनप्रसङ्गे–

ऋषिरस्यास्तु सुभगो गायत्रीच्छन्द उच्यते ।
देवतेयं तु बीजं तु हरब्लेमात्मकं प्रिये ॥ १ ॥
शक्तिः श्रीबीजमन्त्यं तु कीलकं परमेश्वरि ।

चतुर्दशश्वासे नित्यक्लिन्नानित्यापूजाप्रसङ्गे–

ऋषिर्ब्रह्मा समुद्दिष्टो विराट् छन्द इतीरितम् ।
नित्यक्लिन्ना देवतोक्ता वनिता द्राविणी परा ॥ १ ॥
बीजमाद्यं बह्निजायां शक्ति-मतम् ।

चतुर्दशश्वासे भेरुण्डानित्यामन्त्रोद्धारप्रसङ्गे–

ऋषिरस्या महाविष्णुर्गायत्री छन्द उच्यते ।
देवतेयं वरारोहे तृतीयं बीजमुच्यते ॥ १ ॥
बह्निजाया तु शक्तिः स्यात् कीलकं सृणिरेव च ।

चतुर्दशश्वासे वह्निवासिनीनित्यापूजाप्रसङ्गे–

ऋषिर्वशिष्ठश्छन्दः स्याद् गायत्री देवता त्वियम् ।
आद्यन्तं बीजशक्ती स्यात् कीलकं मध्यमेन च ॥

चतुर्दशश्वासे वज्रेश्वरी नित्यायजनप्रसङ्गे–

---------- ऋषिर्ब्रह्मा च गीयते ।
गायत्री छन्द आख्यातं देवता परमेश्वरी ॥ १ ॥
आद्यन्ते बीजशक्ती तु वाग्भवं कीलकं भवेत् ।

चतुर्दशश्वासे शिवादूतीनित्यायजनप्रसङ्गे–

ऋषी रुद्रोऽथ गायत्रीछन्दस्तद्देवता शिवा ।
आद्यन्ते बीजशक्तिं च मध्यं कीलकमुच्यते ॥ १ ॥

चतुर्दशश्वासे त्वरितानित्यायजनप्रसङ्गे–

ऋषिः सौरिर्विराट् छन्दो देवतेयं च पार्वति ।
कवचं स्त्री शक्तिबीजे क्षे च कीलकमीरितम् ॥

चतुर्दशश्वासे कुलसुन्दरीपूजाप्रसङ्गे–

ऋषिस्तु दक्षिणामूर्तिरहं शिरसि विन्यसेत् ।
छन्दः पङ्क्तिस्तु विज्ञेयं मुखे विन्यस्य देवताम् ॥ १ ॥
हृदये परमेशानीं विन्यसेत् कुलसुन्दरीम् ।
वाग्भवं बीजमित्युक्तं शक्तिस्तार्तीयमीरितम् ॥ २ ॥
कामबीजं कीलकं स्यात् पुरुषार्थे नियोजितम् ।

चतुर्दशश्वासे बालानित्यानित्ययोरभेदप्रसङ्गे–

नित्यानित्या तु बाला चे..... ।

चतुर्दशश्वासे नीलपताकार्चाप्रसङ्गे–

ऋषिः सम्मोहनश्छन्दो गायत्रं देवता मनोः ।
नित्या नीलपताकाख्या ह्रीं बीजं ह्रीं च शक्तिकम् ॥ १ ॥
कामबीजं कीलकं स्यात्..... ।

चतुर्दशश्वासे विजयानित्यार्चाप्रसङ्गे–

ऋषिरस्या अहिश्छन्दो गायत्री देवता स्वयम् ।

चतुर्दशश्वासे सर्वमङ्गलासपर्याप्रसङ्गे–

ऋषिश्चन्द्रो महेशानि गायत्री छन्द उच्यते ।
देवतेयम्..... ॥ १ ॥

चतुर्दशश्वासे ज्वालामालिनीनित्यापूजाप्रसङ्गे–

ऋषिस्तु कश्यपश्छन्दो गायत्रं देवता त्वियम्।
रेफास्त्रे बीजशक्ती तु कीलकं कवचं प्रिये॥ १ ॥

चतुर्दशश्वासे चित्रानित्यायजनप्रसङ्गे–

ऋषिर्ब्रह्मास्य मन्त्रस्य गायत्री छन्द उच्यते ।
विचित्रा देवता..... ॥ १ ॥

चतुर्दशश्वासे कुरुकुल्लासपर्याप्रसङ्गे–

ऋषिस्तु दक्षिणामूर्तिः पङ्क्तिश्छन्द उदाहृतम् ।
देवता कुरुकुल्ला..... ॥ १ ॥

चतुर्दशश्वासे वाराहीसपर्याप्रसङ्गे–

ऋषिस्तु दक्षिणामूर्तिर्गायत्री छन्द ईरितम् ।

पञ्चदशश्वासे प्रातःकालस्य त्रिपुरसुन्दरीस्तोत्रम्–

प्रातर्नमामि जगतां जनन्याश्चरणाम्बुजम् ।
श्रीमत्त्रिपुरसुन्दर्या जनन्या जगतां सदा ॥ १ ॥
प्रसन्नायाः स्वभक्तानां नमिताया हरादिभिः ।
प्रातस्त्रिपुरसुन्दर्या नमामि चरणाम्बुजम् ॥ २ ॥
हरिर्हरो विरिञ्चिश्च सृष्ट्यादीन् कुरुते यया ।
प्रातस्त्रिपुरसुन्दर्या नमामि पदपङ्कजम् ॥ ३ ॥
यत्पाद्यमम्बु शिरसि भाति गङ्गा महेशितुः ।
प्रातः पाशाङ्कुशशरपाशहस्तां नमाम्यहम् ॥ ४ ॥
उद्यदादित्यसङ्काशां श्रीमत्त्रिपुरसुन्दरीम् ।
प्रातर्नमामि पादाब्जं ययेदं भासते जगत् ॥ ५ ॥
तस्यास्त्रिपुरसुन्दर्या यत्प्रसादान्निवर्तते ।
यः श्लोकपञ्चकमिदं प्रातर्नित्यं पठेन्नरः ॥ ६ ॥
तस्मै दद्यादात्मपदं श्रीमत्त्रिपुरसुन्दरी ।

पञ्चदशश्वासे सन्ध्यावन्दनप्रसङ्गे–

सन्ध्या चतुर्विधा ज्ञेया बाला कौमारयौवना ।
प्रौढा च निष्कला चेति सन्ध्या देवि प्रकीर्तिता ॥ १ ॥
प्रातःकाले महादेवी विद्या वागीश्वरी मता ।
कामेश्वरी च मध्याह्ने सायाह्ने पुरभैरवी ॥ २ ॥
मध्यरात्रे महादेवी ज्ञेया त्रिपुरसुन्दरी ।
× × × ×
प्रातःसन्ध्येयमीशानि सर्वकर्मसु सर्वदा ।
कर्तव्या मन्त्रिणा नित्यं मन्त्रसिद्धिसमृद्धये ॥ १ ॥
प्रातःसन्ध्यां परित्यज्य देवतापूजनं चरेत् ।
अशुद्धः स दुराचारः सर्वकर्मबहिष्कृतः ॥ २ ॥
प्रातःसन्ध्यां परित्यज्य देवपूजादिकं चरेत् ।
होमान् कृत्वा महेशानि नारकी जायते नरः ॥ ३ ॥
प्रातःसन्ध्यां परित्यज्य होमं वा तर्पणं शिवे ।
कुर्वन्नकारणं विप्रस्त्यजन् श्वा च भवेद् ध्रुवम् ॥ ४ ॥
पिशाचो जायते देवी अपि वेदाङ्गपारगः ।
[1]सन्ध्यानामपि सर्वासां प्रातःसन्ध्या गरीयसी ॥ ५ ॥
तस्मात्तां न त्यजेद् विप्रस्त्यजन्नरकमाप्नुयात् ।
× × × ×
सन्ध्याहीनोऽन्यसन्ध्यायां पूर्वसन्ध्याक्रियामथ ।
विधायोत्तरसन्ध्यायाः क्रियां कुर्यात् समाहितः ॥ १ ॥

पञ्चदशश्वासे कालनित्याजपप्रकरणे द्वितीयवर्गारम्भात् पूर्वं स्तोत्रम्–

क्ष्माम्ब्वग्नीरणखार्केन्दुयष्टृप्राययुगस्वरैः ।
मातृभैरवगां वन्दे देवीं त्रिपुरभैरवीम् ॥ १ ॥
कादिवर्गाष्टकाकारसमस्ताष्टकविग्रहाम् ।
अष्टशक्त्यावृतां वन्दे देवीं त्रिपुरभैरवीम् ॥ २ ॥

---

1. 'सन्ध्याना.....माप्नुयात्' इति पाठः अतिरात्रयज्वकृतश्रीविद्यापद्धत्यां श्रीपदार्थ-दीपिकायामपि दृश्यते । तत्र 'सन्ध्या.....सर्वासां' इत्यस्य स्थाने 'सर्वासामपि सन्ध्यानाम्' इति पाठः वर्तते ।

स्वरषोडशकानां तु षट्त्रिंशद्भिः परापरैः ।
षट्त्रिंशत्तत्त्वगां वन्दे देवीं त्रिपुरभैरवीम् ॥ ३ ॥
षट्त्रिंशत्तत्त्वसंस्थाप्यशिवचन्द्रकलास्वपि ।
कादितत्त्वान्तरां वन्दे देवीं त्रिपुरभैरवीम् ॥ ४ ॥
षडध्वपिण्डयोनिस्थां मण्डलत्रयकुण्डलीम् ।
लिङ्गत्रयातिगां वन्दे देवीं त्रिपुरभैरवीम् ॥ ५ ॥
स्वयम्भूहृदयां बाणभ्रूकामान्तःस्थितेतराम् ।
प्राच्यां प्रत्यक्चितिं वन्दे देवीं त्रिपुरभैरवीम् ॥ ६ ॥
अक्षरान्तर्गताशेषनामरूपां क्रियां पराम् ।
शक्तिं विश्वेश्वरीं वन्दे देवीं त्रिपुरभैरवीम् ॥ ७ ॥
वर्गान्ते पठितव्यं स्यात् स्तोत्रमेतत्समाहिते ।

अष्टादशश्वासे [1]स्नानविशेषप्रसङ्गे–

[2]विधाय वैदिकं स्नानं ततस्तान्त्रिकमाचरेत् ।
मृदमस्त्रेण चादाय तेन तामभिमन्त्र्य च ॥ १ ॥
शिखामन्त्रेण संशोध्य मन्त्रयेन्मूल[3]मन्त्रतः ।
मूर्धादिपादपर्यन्तं विलिप्य च तया वपुः ॥ २ ॥
सम्मुखीकरणीं मुद्रां बद्ध्वा [4]प्राणान् निरुध्य च ।
निमज्य तूष्णीमुत्थाय नाभिमात्र[5]जले स्थितः ॥ ३ ॥
[6]प्राणायामं ततः कृत्वा मूलमन्त्रेण [7]मन्त्रवित् ।
विन्यस्य च षडङ्गानि कल्पयेत् तीर्थमग्रतः ॥ ४ ॥
ततः सम्प्रार्थयेत् तीर्थं [8]सूर्यात् तन्मण्डलं ततः ।
[9]घृणिमन्त्रेण मन्त्रज्ञो भित्त्वा चाङ्कुशमुद्रया ॥ ५ ॥

---

1. ताराभक्तिसुधार्णवेऽपि पञ्चमतरङ्गे स्नानप्रसङ्गे प्रकरणमिदं किञ्चित्पाठभेदेन त्रिपुरार्णवतन्त्रवचनादुपलभ्यते ।
2. 'विधाय.....माचरेत्' इति पाठस्तत्रैव तर्पणप्रकरणेऽपि स्मर्यते ।
3. मध्यतः–तत्रैव ।
4. 'प्राणान्' इत्यस्य स्थाने 'प्राणं'–तत्रैव ।
5. मात्रे जले–तत्रैव ।
6. प्राणायामत्रयं कृत्वा–ताराभक्तिसुधार्णवे ।
7. मन्त्रचित्–तत्रैव ।
8. सूर्यमण्डलगं ततः–तत्रैव ।
9. सृणिमन्त्रेण–श्रीविद्यार्णवे ।

तीर्थावाहनमन्त्रेण तीर्थमावाहयेत् प्रिये ।
मूलमन्त्रेण संयोज्य कल्पिते तीर्थमण्डले ॥ ६ ॥
तीर्थशक्तिं च तत्रैव समावाह्यार्कमण्डलात् ।
ध्यात्वा तन्मनुनाभ्यर्च्य गङ्गामन्त्रेण मन्त्रयेत् ॥ ७ ॥
सप्तकृत्वः शिवे [1]वच्मि शृणु मन्त्रद्वयं प्रिये ।
जलस्थं व्योमषड्दीर्घस्वरभिन्नं सबिन्दुकम् ॥ ८ ॥
सर्वानन्दमये तीर्थे शक्ते [2]चैहियुगं द्विठः ।
[3](एकविंशाक्षरः प्रोक्तस्तीर्थशक्तिमनुः प्रिये) ॥ ९ ॥
तारं नमो भगवति ब्रूयादम्बे ततोऽम्बिके ।
अम्बालिके महामालिन्येह्येहि भगवत्यथ ॥ १० ॥
अशेषतीर्थालवाले मायाश्री[4]बीजयोरथ ।
शिवजटाधिरूढे च गङ्गे गङ्गाम्बिके द्विठः ॥ ११ ॥
गङ्गाविद्येयमाख्याता त्रिपञ्चाशद्भिरक्षरैः ।
भुवनेश्या [5]समालेख्यामृतीकृत्य सुधाणुना ॥ १२ ॥
कवचेनावगुण्ठ्याथ संरक्ष्याऽस्त्रेण [6]मन्त्रयेत् ।
मूलेन देवतां तत्र साङ्गां सावरणां [7]प्रिये ॥ १३ ॥
समावाह्य जले ध्यात्वा [8]तत्पदद्वयनिर्गतम् ।
[9]ध्यात्वा तीर्थं स्मरन् मूलमन्त्रं मन्त्रेण तर्पयेत् ॥ १४ ॥
त्रिधा देवीं समुत्तीर्य जलाद् धौते [10]सुवाससी ।
परिधायाथ तिलकं कृत्वा सन्ध्यां समाचरेत् ॥ १५ ॥

---

1. 'वच्मि' इत्यस्य स्थाने 'चास्मिन्'–ताराभक्तिसुधार्णवे ।
2. 'चैहि' इत्यस्य स्थाने 'एह्येहि'–तत्रैव ।
3. 'एक — प्रिये' नास्ति–श्रीविद्यार्णवे ।
4. बीजमुच्चरेत्–ताराभक्तिसुधार्णवे ।
5. समालोड्याऽमृतीकृत्य–तत्रैव ।
6. मन्त्रवित्–तत्रैव ।
7. 'प्रिये' इत्यस्य स्थाने 'तथा'–तत्रैव ।
8. तत्पादद्वय–तत्रैव ।
9. 'ध्यात्वा.....तर्पयेत्' इत्यस्य स्थाने पाठोऽयं दृश्यते ताराभक्तिसुधार्णवे–'
'ध्यात्वा तीर्थं स्मरन् मूलमन्त्रं स्नायाज्जले त्रिशः ।
'उन्मज्ज्य मूलमन्त्रेण सिञ्चेत् कं कुम्भमुद्रया ।
आचम्य विधिना पश्चान्मूलमन्त्रेण तर्पयेत् ॥'
10. 'सुवाससी' इत्यस्य स्थाने 'शुभाम्बरे'–तत्रैव ।

पञ्चविंशश्वासे भुवनेश्वरीभैरवीप्रकरणे–

[1]हंसास्त्रयो दन्त्यसकाररूढा वस्वब्धिपङ्क्तिस्वरसंविभिन्नाः ।
आद्यौ सबिन्दू परतो विसर्गो मध्यं विरिञ्चीन्द्रहराग्नियुक्तम् ॥ १ ॥

पञ्चत्रिंशश्वासे श्रीचक्रक्रमाभ्यर्चनप्रसङ्गे–

मध्यत्रिकोणे रेखासु नित्यानां मण्डलत्रयम् ।
पञ्च पञ्च विभागेन मध्ये श्रीललितां यजेत् ॥ १ ॥
यद्दिने यां यजेत् तां तु सर्वावरणसंवृताम् ।
पूजयेत् सर्वसौभाग्यहेतवे ज्ञानसिद्धये ॥ २ ॥

सौभाग्यभास्करे–

नाडीत्रयं तु त्रिपुरा सुषुम्णा पिङ्गला इडा ।
मनोबुद्धिस्तथा चित्तं पुरत्रयमुदाहृतम् ॥ १ ॥
तत्र तत्र वसत्येषा तस्मात्तु त्रिपुरामते ।

पुरश्चर्यार्णवे–

द्वितीयतरङ्गे दीक्षाकालनिर्णये नक्षत्रफलप्रसङ्गे–

अश्विन्यां सुखमाप्नोति भरण्यां मरणं ध्रुवम् ।
कृत्तिकायां भवेद्दुःखी रोहिण्यां वाक्पतिर्भवेत् ॥ १ ॥
मृगशीर्षे सुखावाप्तिरार्द्रायां बन्धुनाशनम् ।
पुनर्वसौ धनाढ्यः स्यात् पुष्ये शत्रुविनाशनम् ॥ २ ॥
आश्लेषायां भवेन्मृत्युर्मघायां दुःखमोचनम् ।
सौन्दर्यं पूर्वफाल्गुन्यां प्राप्नोतीति न संशयः ॥ ३ ॥
ज्ञानं चोत्तरफाल्गुन्यां हस्तायां च बली भवेत् ।
चित्रायां ज्ञानसिद्धिः स्यात् स्वात्यां शत्रुविनाशनम् ॥ ४ ॥
विशाखायां भवेत् सौख्यमनुराधा च बुद्धिदा ।
ज्येष्ठायां सुतहानिः स्यान्मूलायां कीर्तिवर्धनम् ॥ ५ ॥
पूर्वाषाढोत्तराषाढे भवेतां कीर्तिदायिके ।
श्रवणायां भवेद्दुःखी धनिष्ठायां दरिद्रता ॥ ६ ॥

---

1. कृष्णानन्द आगमवागीशकृते बृहत्तन्त्रसारे द्वितीयपरिच्छेदे भुवनेश्वरीभैरवी-प्रकरणे श्लोकोऽयं दृश्यते ।

बुद्धिः शतभिषायां स्यात् पूर्वभाद्रे सुखी भवेत् ।
सौख्यं चोत्तरभाद्रे स्याद्रेवत्यां कीर्तिवर्धनम् ॥ ७ ॥

कैवल्याश्रमकृत-सौभाग्यवर्धिनीनाम-सौन्दर्यलहरीटीकायाम्–

प्रथमश्लोकस्य टीकायां विद्याप्रासादपदोद्धारप्रसङ्गे–

वाग्भवं प्रथमं बीजं कामराजं द्वितीयकम्।
तृतीयं शक्तिकूटाख्यं निगमत्रितयोद्धृतम् ॥ १ ॥
इत्थं कुमारीविद्याया बीजत्रयमुदीरितम्।

तृतायश्लोकस्य व्याख्यायाम्–

हरत्यज्ञानमज्ञानाज्जडिमानमतः पुनः।
इतः कामान्वितनुते कैवल्यं कलया विधोः ॥ १ ॥
वाग्भवं प्रथमं बीजं वेदानां पुरतो यतः।
त्रिपुरासंज्ञया भद्रे त्वद्रूपा विश्वविग्रहा ॥ २ ॥
वाच्यवाचकरूपेण व्याप्नोत्यमितवैभवम् ।

विद्यानन्दकृतार्थरत्नावलीनाम-नित्याषोडशिकार्णवटीकायाम्–

चतुर्थपटले ४५ सूत्रस्य व्याख्यानावसरे 'कामस्थं' इत्यस्य विवेचनप्रसङ्गे–

कामं प्राणं प्रकर्तव्यं मन्मथं कारयेत् तनुम् ।
कन्दर्पं मन्दिरं कृत्वा द्विधाभूतं च पार्वति ॥ १ ॥
मकरध्वजं न्यसेद् देवि षट्स्थानेष्वस्य सुव्रते ।
मोहनाभ्यन्तरे कृत्वा वेष्टयेत् तस्य मायया ॥ २ ॥

रामेश्वरकृत-परशुरामकल्पसूत्रव्याख्यायाम्–

प्रथमखण्डे दीक्षाविधौ शूद्रादौ केवलतान्त्रिककर्मप्रमाणप्रसङ्गे तथा तृतीयखण्डे श्रीक्रमे तान्त्रिकस्नानसन्ध्याप्रकरणे च–

त्रैवर्णिकैर्वैदिकान्ते तान्त्रिकं क्रियतेऽखिलम् ।

तृतीयखण्डे श्रीक्रमे तर्पणप्रोक्षणप्रसङ्गे–

मन्त्रानुक्तौ मूलमन्त्रं योजयेत् परमेश्वरि ।

तत्रैव श्रीचक्रस्वरूपतत्साधनद्रव्यप्रसङ्गे–

वृत्तं ततो भूपुराणां त्रितयं द्वारशोभितम्।

तत्रैव ब्रह्मरन्ध्रस्थिताधोमुखसहस्रच्छदपद्ममपि अकुलमिति प्रसङ्गे–

सुषुम्नोर्ध्वं सुधारश्मिकोटिकान्तिसमप्रभम् ।
अधोमुखं गुरुस्थानं सहस्रदलशोभितम् ॥ १ ॥
अकुलं तद्विजानीयात्..... ।

तत्रैव द्विपात्रविधिमुख्यत्वसमर्थनप्रसङ्गे–

आत्मयोगपराणां तु नाङ्गलोपेन हीयते।

तत्रैव कुलद्रव्यस्वीकारविधिसमर्थने–

कामान्मोहाद्यदि सुरां पिबेत् सकृदपि द्विजः ।
विद्वानपि च संत्याज्यः तन्त्रज्ञैरविचारितम् ॥ १ ॥

× × × ×

गौडी माध्वी च पैष्टी च त्रिविधं द्रव्यमीरितम् ।
ऐक्षवक्षौद्रजाताऽऽद्या गौडी स्यात् सात्त्विकी स्मृता ॥ १ ॥
मधूककुसुमद्राक्षातालवृक्षादिसम्भवा ।
माध्वीति कीर्तिता तज्ज्ञैः राजसी सा भवेच्छिवे ॥ २ ॥
पिष्टतण्डुलजाता या तामसी पैष्टिकी स्मृता ।
सात्त्विकी ब्राह्मणे ख्याता राजसी नृपवैश्ययोः ॥ ३ ॥

× × × ×

पूजनीया कलौ सर्ववर्णैः केवलमासवैः ।

× × × ×

अयं सर्वोत्तमो धर्मः शिवोक्तः सुखसिद्धिदः ।
जितेन्द्रियस्य सुलभो नान्यस्यानन्तजन्मभिः ॥ १ ॥
यदूर्ध्वरेतसां सर्वत्यागिनामनिकेतिनाम् ।
क्षणेन स्मृतिमात्रेण मोहमुत्पादयत्यलम् ॥ २ ॥
तदेवात्र हि संसिद्धौ कारणं सर्वमीरितम् ।
इतो मद्यमितो मांसं भक्ष्यमुच्चावचं तथा ॥ ३ ॥
तरुण्यश्चारुवेषाढ्या मदघूर्णितलोचनाः ।
तत्र संयतचित्तत्वं सर्वथा ह्यतिदुष्करम् ॥ ४ ॥
भक्तिश्रद्धाविहीनस्य कथं स्यादेतदीश्वरि ।

चतुर्थखण्डे ललिताक्रमे चतुःषष्ट्युपचारविधिप्रसङ्गे–

उक्तोपचारादधिकैः सम्भवे सति पूजयेत् ।

पञ्चमे खण्डे ललितानवावरणपूजायां कामकलाध्यानप्रसङ्गे–

सूक्ष्मध्यानेऽसमर्थश्चेत् स्थूलं ध्यायेद्यथोक्तवित् ।

तत्रैव बलिदानप्रसङ्गे–

बलिपात्रं ताम्रभवं नैवान्यत्तु कदाचन ।

तत्रैव मण्डललक्षणप्रसङ्गे–

इदं तन्मण्डलं देवि प्रारभ्यैतस्य पूजनम् ।

मार्तण्डमण्डलार्घ्यान्तं..... ॥ १ ॥

तत्रैव हविश्शेषप्रतिपत्तिप्रसङ्गे–

तथा पूजानिमित्तं वै प्रथमाद्यमुपाहृतम् ।

यज्ञियं तत्पवित्रं स्याद् दृष्ट्वा स्पृष्ट्वा शुचिर्भवेत् ॥ १ ॥

तथैव मण्डले प्राप्तं सर्वं तदमृतं भवेत् ।

विप्रेणान्येन वाऽऽनीतं देवतायै निवेदयेत् ॥ २ ॥

प्रथमाद्यैः संस्कृतैस्तु युक्तं तत्तदगात्मजे ।

अविशेषेण सर्वैस्तु ग्राह्यं शङ्काविवर्जितैः ॥ ३ ॥

तत्रैव भुक्तस्य निशेषः –

अतर्कितो दिवा भुक्तो यदा रात्रौ समागतः ।

तदा गुर्वाद्याज्ञया तु स्नात्वा सेवेन्न चान्यथा ॥ १ ॥

× × × ×

भुक्त्वा न मण्डलं गच्छेत् ------- ।

× × × ×

शक्त्या स्वर्णादिसंयुक्तमर्पयेत् पात्रमम्बिके ।

यत्किञ्चिद्वाऽपि पात्रस्थं दत्वाऽनन्तफलं लभेत् ॥ १ ॥

× × × ×

वीराज्ज्येष्ठात् तथाऽऽचार्याद् ग्राह्यं शेषं च चर्वणम् ।

तदभावेऽपि चान्यस्मात् ज्येष्ठाद् ग्राह्यं नगात्मजे ॥ १ ॥

× × × ×

अयं सर्वोत्तमो धर्मः कौलमार्गो महेश्वरि ।
असिधाराव्रतसमो मनोनिश्चलहेतुकः ॥ १ ॥
तत्र संयतचित्तत्वं सर्वथा ह्यतिदुष्करम् ।
भक्तिश्रद्धाविहीनस्य..... ॥ २ ॥

× × × ×

एवं सामयिको भक्त्या मानदम्भविवर्जितः ।
अनाहूतोऽपि वाऽहूतो व्रजेन्मण्डलमुत्तमम् ॥ १ ॥
व्रती वाऽपि हुनेदेव न दोषस्तत्र विद्यते ।
व्रतादिशङ्क्या यस्तु न व्रजेदादृतोऽपि सन् ॥ २ ॥
व्रतं तस्य प्रतिहतमनर्थं च समाप्नुयात् ।
तस्मात् कनिष्ठाहूतोऽपि प्रविशेदेव मण्डले ॥ ३ ॥

× × × ×

विद्यासम्बन्धतो वाऽपि योनिसम्बन्धतस्तथा ।
ज्येष्ठानामपि चोच्छिष्टं दीक्षितानां च भक्षयेत् ॥ १ ॥
दीक्षाहीनस्य चोच्छिष्टं जनकस्यापि दीक्षितः ।
न भक्षयेत् सकृद्वाऽपि भुक्त्वा पातित्यमाप्नुयात् ॥ २ ॥

× × × ×

षष्ठखण्डे श्यामाक्रमे मन्त्रस्नानप्रसङ्गे–

वस्त्रेणार्द्रेण चाङ्गानां कृत्वा प्रोञ्छनमादितः ।
मूलं जपन् सप्तधा तु आपादतलमस्तकम् ॥ १
तलाभ्यां संस्पृशेद् देवि मन्त्रस्नानं प्रकीर्तितम् ।
एतत्स्नानमशक्तस्य विहितं शुद्धिहेतवे ॥ २ ॥

तत्रैव द्वितीयप्रकृतिप्रसङ्गे–

मधुराम्लहिङ्गुबीजमरीच्याज्यसुपाचितम् ।
सुगन्धं मृदुपक्वं च सुस्वादु च मनोहरम् ॥ १ ॥

तत्रैव तृतीयप्रकृतिप्रसङ्गे–

अल्पकण्टकसंयुक्तं सुपक्वं स्वादुसंयुतम् ।
लिकुचाम्लादिसंयुक्तं विधिना संस्कृतं तथा ॥ १ ॥

तत्रैव चतुर्थद्रव्यप्रसङ्गे–

एतत्पर्युषितं सर्वमनर्हं पूजनादिषु ।
तत्पूजया प्रकुप्यन्ति योगिन्यस्त्वतिभीषणाः ॥ १ ॥

दशमखण्डे सर्वसाधारणक्रमे आदिमप्रतिनिधिप्रसङ्गे–

गुडोदकं तथा तक्रं..... ।

[एकमेव परमानन्दतन्त्रस्य टीकायां श्रीमहेश्वरानन्दनाथेन शताधिकाः श्लोकाः प्रमाणत्वेनोदाहृता यथायथं विद्यन्ते, परं श्रीविद्यार्णवे ये मन्त्रास्त्रिपुरार्णवनाम्ना मन्त्रभागे निर्दिष्टास्तेऽत्र न सन्ति, तेनेदं सिद्ध्यति यत् त्रिपुरार्णवः कोऽपि महान् ग्रन्थोऽवर्ततेति]

●


सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः
श्रुतम् मे गोपाय